अनुष्ठानादिकं निर्वर्त्य देवालयं गत्वा प्रदक्षिणीकृत्य पादौ संशोध्य द्वारपूजामारभेत्। तत्परिसमाप्य मण्डपं प्रविश्य आसने उपविश्य वामहस्ते भस्म निक्षिप्य दक्षिणहस्तेन अभिमन्त्रणं कुर्यात्। तदनु किञ्चिद्भस्म संगृह्य निर्ऋतिदिक्स्थराक्षसानां निरसनाय क्षिप्त्वा अस्त्रमन्त्रं समुच्चरन् दिग्बन्धनं कुर्यात्। ततः दक्षिणहस्तेन किञ्चिज्जलं गृहीत्वा अङ्गुलीभिः तद्भस्म मर्दयेत्। मर्दितेन भस्मना त्रिभिरङ्गुलीभिः क्रमशः मूर्धा – ललाट – श्रोत्र – कण्ठ – बाहु – नाभि – जानु – जङ्घाप्रदेशेषु त्रिपुण्ड्रधारणं कुर्यात्। [श्लो० ९-१२]

स्वललाटे धृतानि भस्मत्रिपुण्ड्रानि ब्रह्म – विष्णु – शिवाख्यत्रिमूर्तित्वेन भाव्यानि। ततः दिग्बन्धनं कृत्वा त्रिवारं प्राणायामम् आचरेत्। ततः भूतशुद्धिं परिसमाप्य स्वशरीरम् अमृतमयं ध्यायेत्। ततः करन्यासम् अङ्गन्यासम् अष्टत्रिंशत्कलान्यासं च समापयेत्। [श्लो० १३-१५]

स्वहृत्पद्मे शिवं संपूज्य नाभौ होमं च विधाय भ्रुवोर्मध्ये ईश्वरध्यानं कुर्यात्। एषैव आत्मशुद्धिर्भवति। [श्लो० १६]

ततः इन्द्रपावकयोर्मध्ये दिवानाथस्य पूजा अनुष्ठेया। तदनु उद्दीप्यस्वेति मन्त्रेण अभिषेकालङ्कारादीन् निर्वर्तयेत्। ततः दण्डि – पिङ्गल – गणेश – गुरूंश्च संपूज्य प्रभूतासनं संपूज्य

In Public domain. Digitization Muthulakshmi Research Academy

तत्र विमल – सार – आराध्य – परमसुखान् पद्मासनं च सम्पूज्य दलेषु दीप्तादिनवशक्तीः संपूज्य तदुपरि शिवसूर्यस्य पूजा कार्या। [श्लो० १७-२१]

कुङ्कुमसमानवर्णं सर्वैराभरणैर्भूषितं नेत्रद्वयेन युक्तं सौन्दर्यवदनसमन्वितं रक्तगन्धानुलिप्ताङ्गं रक्तमालासमोपेतं हस्तद्वये अम्बुजद्वयं तथा अन्यकरयोः अभयवरदयुक्तं प्रभामण्डलेन प्रकाशितं यज्ञोपवीतधरं उषादेव्या सहितं अरुणेन सह पद्मे रथे वा आरूढं सूर्यं ध्यात्वा षडङ्गैः पूजां कुर्यात्। ततः सूर्यपरिवारान् सोमाङ्गारबुधान् गुरुशुक्रशनैश्चरान् राहुकेतू च क्रमशः पूर्वादीशान्तस्थानेषु संपूज्य मुद्गान्नं पायसान्नं च धूपदीपैस्सह निवेदनीयम्। तदनु सूर्यचण्डेश्वरं नमस्कृत्य क्षमां प्रार्थयेत्। भानोः आलयं नास्ति चेद् देवाग्रे मण्डलं संपाद्य पूजयेत्। [श्लो० २२-२७]

स्थानशुद्धिः द्रव्यशुद्धिश्च विस्तरेण निरूप्यते। ततः पुण्याहो अनुष्ठेय इति निरूप्यते। ततः पञ्चगव्यपञ्चामृतादिस्नपनद्रव्याणि संस्थाप्य विघ्नेश्वरं संपूज्य वृषभपूजां कृत्वा ततः द्वारदेवान् समर्चयेत्। [२८-३६ पू०]

द्वारे गणेशं सरस्वतीं महालक्ष्मीं च समभ्यर्च्य दक्षिणपार्श्वे नन्दिनं गङ्गां, वामपार्श्वे महाकालं यमुनां, कवाटयोः विमलं सुवाहुं ऊर्ध्वं अधश्च भुवङ्गं पतङ्गं च संपूज्य अस्त्रं संपूजयेत्। ततः धूपदीपादिकं समर्प्य हविर्निवेद्य घण्टां संताड्य विघ्नान् निवार्य सद्योजातमन्त्रं समुच्चरन् अर्धमण्डपं प्रविश्य यवनिकां निरस्य गर्भद्वारं प्राप्य स्थाणुमन्त्रं जपन् गर्भगृहं प्रविशेत्। [श्लो० ३६ उ०-४२ पू०]

गर्भगृहं प्रविश्य षडङ्गमन्त्रैः रुद्रमभ्यर्च्य धूपदीपं दत्वा निर्माल्यं विसृज्य तत्काले शिवस्य मूर्ध्नि पुष्पं निक्षिप्य अस्त्रमन्त्रेण लिङ्गं प्रक्षाल्य पीठशुद्धिः अनुष्ठेया। ततः अस्त्रमन्त्रेण स्थलशुद्धिं विधाय गुरूपदिष्टमार्गेण मन्त्रशुद्धिं कुर्यात्। ततः प्रणवादिनमोन्तः मन्त्रजीवः इति अत्र उच्यते। [श्लो० ४२ उ०-४६ पू०]

शिवस्य विमलासनादिपञ्चासनानि, प्रत्येकं तत्रानुष्ठेयानि कर्माणि च निरूप्यन्ते। प्रथममासनं विमलासनम् तत्रावाहनादि अनुष्ठेयम्। द्वितीयम् अनन्तासनम् तत्र स्नानम्। तृतीयं पद्मासनं तत्र अर्चनम्, चतुर्थं योगासनं तत्र निवेद्यम्। पञ्चमं सिंहासनं तत्र विनोदं चानुष्ठेयम्। देवस्य पिण्डिकोर्ध्वे आसनादिकल्पनं कर्तव्यम्। तदुपरि सूर्यसोमाग्निमण्डलेषु ब्रह्म – विष्णु – रुद्राणामर्चनम्। तदुपरि शक्तिः तदूर्ध्वे शिवासनं परिकल्प्य शिवमूर्तिमावाह्य विद्यादेहं संकल्प्य पूजयेत्। [श्लो० ४६ उ०-५० उ०]

मध्ये शिवं प्रासादमन्त्रेणावाह्य शरच्चन्द्रनिभाकारं पञ्चवदनसंयुतं दशबाहुभिः एकेन हृदा गलेन च युक्तं द्वाभ्यां पद्भ्यां संयुक्तं चित्रवस्त्रधरं सर्वाभरणभूषितं जटामकुटयुक्तं दक्षिणहस्तैः टङ्कं, शूलं, असि, वज्रं अभयं च धरन्तं वामहस्तैः पाशं, वरदं, घण्टां अग्निमङ्कुशं च धरन्तं ज्योतीरूपं सदाशिवं ध्यात्वा पाद्याचमनादीन् दत्वा शिवम् अनन्तासने उपवेश्य स्नानकर्म समापयेत्। [श्लो० ५१-५७]

In Public domain. Digitization Muthulakshmi Research Academy

अनन्तासनस्थं शिवं ईशानादिक्रमेण गव्येन स्नाप्य ततः शुद्धोदकेन संस्नाप्य तैल – पिष्ट – आमलकादिभिः स्नाप्य मध्ये मध्ये जलेन स्नाप्य तत्तन्मन्त्रं समुच्चरन् नालिकेरजलं – मधु – दधि – क्षीर – घृत – गुल – इक्षुसार – गन्धोद – रत्नोदैश्च स्नाप्य अन्ते शुद्धोदकेन चाभिषेचयेत्। ततः शिवमन्त्रेण मन्त्रपुष्पं समर्प्य मन्त्रान्नं च निवेदयेत्। ततः लिङ्गं पीठं च वस्त्रखण्डेन संमार्ज्य दुकूलचित्रवस्त्राद्यैरलङ्कुर्यात्। [श्लो० ५८-६२ पू०]

ततः कन्दादिबीजान्तं पद्मासनं समभ्यर्च्य अष्टसु दलेषु वामादि अष्टशक्तीः अर्चयित्वा पीठे शुद्धस्फटिकसंकाशां मनोन्मनीं न्यसेत्। तदूर्ध्वे शिवमावाह्य पञ्चावरणमर्चयेत्। [श्लो० ६२ उ०-६४ उ०]

पीठोर्ध्वे पश्चिमे सद्योजातम् उत्तरे वामदेवं दक्षिणे अघोरं पूर्वे तत्पुरुषं ईशदेशे ईशानं चाभ्यर्च्य कर्णिकोर्ध्वे शिवं संपूज्य तेषाम् अम्बिका – गणाम्बिका – भागीरथी – गौरी – उमाश्च पञ्च शक्तीः क्रमशः सद्य – वाम – अघोर – तत्पुरुष – ईशानादिस्थानेषु पूजयेत्। अपि च हृदयादिषडङ्गान् तदीयशक्तीश्च आग्नेय – नैर्ऋत – वायव्य – ऐशान्यदेशेषु पूजयेत्। एवं गर्भावरणदेवताः संपूज्याः। [श्लो० ६५ पू०-७१]

ततः अनन्तेशं भूमिं च इन्द्रदेशे, सूक्ष्मं स्वाहादेवीश्चाग्नेयदेशे, शिवोत्तमं स्वधादेवीं च याम्यदेशे, एकनेत्रं क्षान्तिं च नैर्ऋते देशे, एकरुद्रं पुष्टिं च वारुणे देशे, त्रिमूर्तिं श्रुतिं च वायुदेशे, श्रीकण्ठं कीर्तिं चोत्तरदेशे, शिखण्डिनं मेधाशक्तिं चैशान्यामिति विद्येशावरणदेवान् तत्तच्छक्तीश्च पूर्वादीशान्तस्थानेषु पूजयेत्। [श्लो० ७२-७६ पू०]

एवं पूर्वदेशे वृषभं भद्रादेवीम्,आग्नेय्यां नन्दिनं कुन्दलीशक्तिं, दक्षिणे गणेशं भृङ्गिणीशक्तिं, नैर्ऋते महाकालं पद्मिनीं, पश्चिमे गुहं देवयानीं, वायव्ये भृङ्गिणं ह्लादिनीशक्तिं, गौरीं चोत्तरे, चण्डं रूपिणीं च ईशदेशे समर्चयेत्। एवं गणेशावरणदेवाः तच्छक्तयश्च सम्पूज्याः। [श्लो० ७६ उ०-८० पू०]

इन्द्रं देहिनीशक्तिं, अग्निं स्वाहां, यमं कालकण्ठीं, निर्ऋतिं दाहिनीं, वरुणं भोगिनीं, वायुं अघोरां, कुबेरं रम्भिनीं, ईशं हर्षिणीं, विष्णुं लक्ष्मीं, ब्रह्माणं सावित्रीं इत्येतान् दिक्पालावरणदेवान् तदीयशक्तीश्च पूजयेत्। [श्लो० ८० उ०-८३ पू०]

कुलिशं, शक्तिं, दण्डं, खड्गं, पाशं, अङ्कुशं, गदां, त्रिशूलं च पूर्वादीशान्तमभ्यर्च्य त्रिशूलवामपार्श्वे पद्मायुधं खड्गस्य दक्षिणपार्श्वे चक्रायुधं च समभ्यर्च्य प्रसन्नात्मा, गोपात्मा, गुणात्मा, कोमलात्मा, विषात्मा, विकृतात्मा, मङ्गलात्मा, महात्मिका इत्यष्टास्त्रशक्तयश्च पूज्याः। ततश्च अव्यक्तम् इन्द्रदेशे, नियतिं याम्यदेशे, कालं वारुणे देशे, कलं उत्तरे ऊर्ध्वच्छदं अधच्छदं मध्ये माधवं च संपूज्य तदुपरि योगासनं कल्पयित्वार्चयेत्। [श्लो० ८३ उ०-९१]

In Public domain. Digitization Muthulakshmi Research Academy

ततः धूपदीपादिकं दत्वा सोपदंशं नैवद्यं पानीयं मुखवासं ताम्बूलं च निवेदयेत्। पश्चात् नित्याग्निकार्यं बलिदानं च कारयेत्। उत्सवान्ते सिंहासनं प्रकल्प्य आग्नेयादिकोणेषु धर्मज्ञान वैराग्यैश्वर्यान् संपूज्य पूर्वादिचतुर्दिक्षु अधर्म – अज्ञान – अवैराग्य – अनैश्वर्यांश्च संपूज्य तन्मध्ये भुवनेश्वरं पूजयेत्। ततः गन्धपुष्पधूपदीपादींश्च समर्पयेत्। [श्लो० ९२-९७ पू०]

महेशस्य स्नानकरणसमये गन्धपुष्पस्रगादिभिः सह स्नानं प्रकर्तव्यम्। नैवेद्यान्ते निवेद्यं धूपान्ते दीपं वेदं स्तोत्रं नृत्तं गीतं वाद्यं इत्यादिभिः मूलबिम्बं संतोष्य महेशस्य यजनान्ते चण्डपूजादिकं मूलबिम्बादिवदाचरेत्। [श्लो० ९७ उ०-१००]

प्रतिमाः लोहजाश्चेत् प्रतिदिनं स्नानं नैवानुष्ठेयम्। पर्वणि पर्वण्येव स्नानं कार्यम्। दर्पणे चित्रे च लिखितान् बिम्बान् वस्त्रैः संमृज्य शोधनम् कर्तव्यम्। [श्लो० १०१-१०२ पू०]

अनन्तरं पुष्पाञ्जलित्रयेण नित्यपवित्रं समर्पणीयम्। तदनन्तरं ऋग्वेदादिमन्त्रैः सूत्रपुराण-वचनैः स्तोत्रैश्च संतोषयेत्। ततः प्रदक्षिणं नमस्कारं च विधाय जपं समर्पयेत्। पञ्चाङ्गं श्रावयित्वा कवचेन बन्धनं विधाय पूजासमाप्तिं विज्ञाप्य संहितामन्त्रैः अर्चयित्वा चुलूकोदकं समर्प्य अन्ते अर्घ्यं दत्वा विसर्जनं कुर्यात्। ततः निर्माल्यद्रव्यैः ध्वनिचण्डेश्वराय हुं फट् इत्युक्त्वा चण्डेशं ब्रह्माङ्गमन्त्रैः संपूज्य निर्माल्यं निवेदयेत्। [श्लो० १०२ उ०-१०७]

रात्रौ पूजासमाप्तिसमये धूपदीपादिकं समर्पयेत्। [श्लो० १०८ पू०]

प्रतिसन्ध्यं स्नानं नैवेद्यान्तं कृत्वा न्यूनातिरिक्तं क्षम्यतामिति क्षमां प्रार्थ्य प्रणमेत्। [श्लो० १०८ उ०-१०९ पू०]

पूजायामुपयुक्तानि मृद्भाण्डानि एकमासानन्तरं परित्याज्यानि। दारु – इष्टका – शिला – लोहान् जीर्णावधि उपयुज्य तदनन्तरं परित्यजेत्। एवमत्र शिवपूजाविधिः प्रतिपादितः। [श्लो० १०९ उ०-११०] इति शिवपूजाविधिपटलार्थसंग्रहः।

षष्ठेऽग्निकार्यविधिपटले आदौ स्थापन – संप्रोक्षण – गर्भन्यास – प्रायश्चित्तादिकर्मणि अन्यस्मिन् मङ्गलयागकर्मणि स्नपनपूजायां च अग्निकार्यमाचरणीयमिति प्रतिपाद्यते। [श्लो० १-२]

अग्निकार्यं कुण्डे अथवा स्थण्डिलेऽपि कर्तुं शक्यते। यदि कुण्डे होमोऽनुष्ठीयते तदा कुण्डानामाकारभेदेन वक्ष्यमाणप्रकारेण फलभेदो निरूप्यते। तद्यथा – चतुरश्रकुण्डं चेत् सर्वसिद्धिर्भवति, योनिकुण्डं चेत्पुत्रप्राप्तिः, चापाकृतिकुण्डं चेच्छत्रुक्षयः, त्रिकोणं चेच्छान्तिः, वृत्तं चेद्वृष्टिः, पञ्चाश्रं चेद्रोगनाशः, पद्मकुण्डं चेज्जयः, अष्टाश्रं चेद्वाञ्छितं फलं, सप्ताश्रं चेद्धान्यवृद्धिः, षडश्रं चेन्मोक्षप्राप्तिः इति। स्थण्डिलेऽग्निकार्यकरणेन सर्वकाम्यसिद्धिर्जायत इति निरूप्यते। [श्लो० ३-६]

In Public domain. Digitization Muthulakshmi Research Academy

होमकरणार्थं निश्चितं भूप्रदेशं गोमयेन संलिप्य हस्तविस्तारपरिमितं क्षेत्रं खात्वा उत्तरभागे विसर्जनं कार्यम्। तदनु तस्स्थलं शुद्धशुक्लसिकतैः संपूर्य एक – द्वि – त्र्यङ्गुलोत्सेधं समं कृत्वा प्रागग्रतया त्रिस्रो रेखाः उदगग्रतया तिस्रो रेखाश्च विलिख्य प्रागग्ररेखासु विधातारं विष्णुं सोमं उत्तराग्ररेखासु रुद्रं विष्णुं शक्रं चावाह्य पूज्याः इति प्रतिपाद्यते। [श्लो० ७-१२ पू०]

सूर्यकान्तोद्भवः अग्निः श्रेष्ठः, अरण्युद्भवः मध्यमः, श्रोत्रियागारजो अधमः इति अग्नेरुत्तम-मध्यमाधमत्वं संकीर्त्य अग्निं ताम्रपात्रे शरावे वा आनीय होतुरग्रे विन्यस्य क्रव्यादांशं नैर्ऋते निस्सार्य अघोरमन्त्रेण संप्रोक्ष्य हृन्मन्त्रेण गन्धादिना अर्चना कार्या। ततोऽस्त्रमन्त्रेण अवकुण्ठनं विधाय वह्नौ इन्धनं निक्षिप्य वह्नेरावाहनं कृत्वा कुण्डनाभौ कूर्चं विन्यस्य तत्र वागीश्वरीवागीश्वरौ ध्यात्वा गन्धपुष्पाद्यैः अभ्यर्च्य गर्भाग्निं नाभ्यग्निं बिन्द्वग्निं च संयोज्य संपूज्य कुण्डस्योपरि प्रदक्षिणेन त्रिः परिभ्राम्य अग्निबीजमनुस्मरन् योनिमार्गेण कुण्डे निक्षिप्य अर्घ्यं प्रदापयेत्। इत्येवं गर्भधानं निर्वर्त्य ततो वह्निं हृदा संपूज्य पुंसवनं समाप्य अघोरमन्त्रेणार्घ्यं दद्यात्। एवं सीमन्तकर्म समापयेत्। ततः तत्पुरुषमन्त्रेण अग्निं प्रज्वाल्य शिरोमन्त्रेण पुष्पाक्षतैः समर्चयेत्। एवं जातकर्म-संस्कारं समाप्य अस्त्रमन्त्रेण प्रोक्ष्य वक्ष्यमाणप्रकारेणाग्निं ध्यायेत्। [श्लो० १२ उ०-२०]

मुखद्वयेन श्रोत्रचतुष्टयेन नासिकाद्वयेन षण्णेत्रैः सप्तजिह्वाभिः सप्तहस्तैः पादत्रयेण एकेन हृदयेन युक्तं दक्षिणभागस्थैश्चतुर्भिर्हस्तैः अक्षमालां – स्रुवं – शक्तिं – स्रुचं च वहन्तं वामभाग-स्थैस्त्रिभिर्हस्तैः व्यजनं घृतपात्रं तोमरं च वहन्तं पिङ्गलवर्णं जटामकुटसंयुक्तं बालादित्यसमप्रकाशं उपवीतसमन्वितम् अग्नेः दक्षिणमुखे विद्यमानां हिरण्याजिह्वां अग्नेः पश्चिमभागे, कनकाजिह्वां मध्यभागे, रक्ताजिह्वां उत्तरभागे, कृष्णाजिह्वां दक्षिणभागे तथा अग्नेर्वामभागे विद्यामानां सुप्रभाजिह्वां पूर्वभागे, अतिरिक्ताजिह्वां आग्नेयभागे, बहुरूपाजिह्वां ईशभागे च प्रकल्प्य श्रृङ्गचतुष्टययुक्तं वृषारूढं पद्मपीठोपरि स्थितं ध्यात्वा अग्निमभ्यर्च्य सर्वसिद्धिप्रदायकं शिवं वह्निमध्ये ध्यात्वा पश्चिमाननम् आसीनं संप्रोक्ष्य पुष्पमिश्रितम् अर्घ्यं दत्वा शिवाग्निरिति नामकरणं निर्वतनीयम्। एवं गर्भाधान – पुंसवन – सीमन्त – जातकर्म – नामकरणाख्यान् पञ्चसंस्कारान् समाप्य उपस्थानं हृन्मन्त्रेण कर्तव्यमिति प्रतिपाद्यते। ततः अग्नेः परितः दर्भैरास्तरणं परिधिविष्ट-राणां विन्यासश्च करणीयः। [श्लो० २१-३१ पू०]

अग्नेः दक्षिणे पश्चिमे उत्तरे ब्रह्मासनस्य पात्रस्य प्रणीतासनस्य च त्रिभिः काशैः परिस्तरणं निक्षिप्य आज्यस्थालीं प्रणीतां प्रोक्षणीं स्रुक्स्रुवौ चरुं कूर्चं समिधं दर्वीम् अन्यानि होमद्रव्याणि च वामभागे निक्षेप्तव्यानि। पात्राणि द्वन्द्वरूपाणि अधोमुखानि सादयेत्। प्रोक्षणीपात्रमादाय जलेनापूर्य मध्यग्रन्थियुक्तं कूर्चं जलमध्ये निक्षिपेत्। ततः अङ्गुष्ठानामिकाभ्याम् उत्प्लवनं कर्तव्यम्। तेन जलेन अस्त्रमन्त्रेण प्रोक्ष्य होमयोग्यानि स्थापनीयानि। होतुर्दक्षिणभागे कूर्चं निधाय ब्रह्मबीजेनार्चयेत्। प्रणीतामादाय कूर्चं विन्यस्य जलेनापूर्य ब्रह्माक्षरं न्यसेत्। आपो वा इति जलमापूर्य होतुः वामे विन्यस्य विष्णुबीजेन पूजयेत्। [श्लो० ३२-३९]

In Public domain. Digitization Muthulakshmi Research Academy

दक्षिणे आग्नेये पूर्वे ऐशान्ये च विद्यमानेषु कुण्डेषु देशिकः उत्तराननो भूत्वा होमं कुर्यात्। निर्ऋतौ पश्चिमे वायव्ये उत्तरे च विद्यमानेषु कुण्डेषु पूर्वाननो भूत्वा होमं कुर्यात्। [श्लो० ४०]

आज्यस्थालीम् आज्येनापूर्य पश्चिमे अङ्गारं निक्षिप्य तस्योर्ध्वे आज्यपात्रं निक्षिप्य द्विकुशाग्रं निक्षिप्य पर्यग्निकरणं कर्तव्यम्। तत्कुशाग्रं वह्नौ निक्षिपेत्। ततः मध्यग्रन्थिपवित्रं घृतमध्ये विन्यस्य हृदयमन्त्रेण त्रिवारमुत्प्लवनं कर्तव्यम्। ततः पवित्रग्रन्थिं विस्रस्य जलं संस्पृश्य अग्निमध्ये निक्षेपणीयम्। तत आज्यं कुण्डस्योर्ध्वे प्रदक्षिणतया आनीय योनेरूर्ध्वभागे निक्षेपणीयम्। स्रुक्स्रुवौ गृहीत्वा अग्नौ प्रताप्य दर्भैस्सह अग्नेरूर्ध्वे समारोप्य अग्रं मध्यमं मूलं च संमृज्य संस्थाप्य दर्भान् अग्नौ विनिक्षिपेत्। [श्लो० ४१-४६]

पलाशादिहोमयोग्यसमिधः प्रतिपाद्य तेषाम् आयामनाहादिपरिमाणं च प्रतिपाद्यते। अग्नेः वारुणे दक्षिणे उत्तरे च परिधीन् निक्षिप्य आघारसमिधावपि निक्षेपणीयौ अनूयाजसमिधं प्रणीतोर्ध्वे स्थापयित्वा इन्द्रादिलोकपालानभ्यर्च्य परिषेचनं समापनीयम्। तत आज्यमभिघार्य अग्नेः वक्त्रोद्घाटनं कृत्वा आज्येन हुत्वा पञ्चसंख्याकैः समिद्भिः मूलमन्त्रेण होमयेत्। [श्लो० ४७-५५]

ततः अन्नप्राशनचौलोपनयनसमावर्तनविवाहान्तकर्मार्थं तत्तन्मन्त्रैः होमोऽनुष्ठेयः। [श्लो० ५६-५९]

वह्नेर्हृदयमध्ये आसनं परिकल्प्य परिवारसमन्वितान् देवान् ध्यात्वा धूपदीपौ दत्वा प्रधानस्य दशाहुतीर्दत्वा अन्येषां एकैकयाहुत्या होमं कुर्यात्। [श्लो० ६०-६१]

हिरण्यजिह्वायां तिलं हुत्वा अन्यानि सर्वद्रव्याणि कनकजिह्वायां होतव्यानि। अघोरमन्त्रेण हव्यवाहमन्त्रेण च स्विष्टकृद्धोमः कार्यः। ततः जयादिहोमोऽनुष्ठेयः। अग्नौ जायमानं शब्दं,वर्णं, गन्धं, शिखां, धूमं च दृष्ट्वा शुभाशुभं परीक्ष्य प्रायश्चित्तादिकं तत्र अनुष्ठेयम्। [श्लो० ६२-६४]

ततोऽस्त्रमन्त्रेण शतवारं हुत्वा द्वे मिन्दाहुती व्याहृतीभिः होतव्ये। तदनु अदितेन्वादिमन्त्रैः परिषेचनं कृत्वा परिधयः आघारसमिधश्च अग्नौ निक्षेपणीयाः। तत्परिसमाप्य ब्रह्मकूर्चस्य विसर्जनं कृत्वा अनूयाजसमिधमादाय वह्निमारोप्य रक्षयेत्। ततः विष्णुपात्रमादाय प्रोक्षणीस्थाद्भिः सेचयित्वा प्रतीच्यादिदिक्षु सेचयेत्। राक्षसानां तृप्तये हुतशेषं निर्ऋतिदिशि स्रावयेत्। विष्टराणि विसृज्य परिस्तरणानि आज्येन संसिच्य अग्नौ दग्ध्वा तद्भस्म गृहीत्वा तिलकधारणं कर्तव्यम्। तद्भस्मधारणाद् आयुश्श्रीकीर्तीनां वर्धनं रोगशान्तिश्च भवति। सर्वाणि अभीष्टफलानि च जायन्ते। एतदेव महाग्निकार्यम् इति एतत्पटलविषयं समाप्य अनन्तरं वक्ष्यमाण लीलावत्याख्याग्निकार्यस्य प्रतिज्ञा क्रियते। [श्लो० ६५-७३] इत्यग्निकार्यविधिपटलार्थसंग्रहः।

सप्तमे लीलावत्यग्निकार्यविधिपटले प्रथमश्लोके 'स्थापनादि क्रियास्सर्वाः संक्षेपाद्वक्ष्यते' इति प्रतिज्ञा क्रियते। परं तु द्वितीय श्लोकप्रभृति पटलसमाप्तिपर्यन्तं अग्निकार्यविधिमात्रं प्रतिपाद्यते। [श्लो० १]

In Public domain. Digitization Muthulakshmi Research Academy

अग्निकार्यं कुण्डे वा स्थण्डिले वा कर्तुं शक्यते इति अग्निकार्यस्य द्वैविध्यं विधीयते। ततः निरीक्षणादिसंस्काराः निरूप्यन्ते। [श्लो० २-३]

वह्निमूर्तिं समभ्यर्च्य पूरकेण गृहीत्वा नाभौ विश्राम्य रेचकेन समादाय बीजमन्त्रेण अर्चनीयः। अग्निं प्रज्वाल्य परिस्तरणादि समर्पयेत्। एतच्चाग्निकार्यं प्रणीताघारसमिधौ ब्रह्मकूर्चं विना आचरणीयम्। परिषेचनादि विधाय गन्धपुष्पादिना अर्चयित्वा पञ्चविंशतिसंख्याकैः मूलमन्त्रैः होमं कृत्वा वह्नौ आसनं परिकल्प्य परिवारसहिता देवताः तत्र पूजनीयाः। ततः प्रधानस्य पञ्चाहुतयः परिवारस्य एकैकाहुतिः तन्त्रशास्त्रोक्तमार्गेण द्रव्यैः कार्याः। इति प्रतिपाद्य जयादिहोमः मन्त्र-होमश्चात्र वर्जनीयः इति प्रतिपाद्यते। [श्लो० ४-९]

ततः मिन्दाहुतिहोमं, बीजमुख्यहोमं, महापाशुपतास्त्रेण प्रायश्चित्तहोमं चानुष्ठाय परिषेचनादि विधाय दर्भास्तरणानि आदायाग्नौ निक्षेपणीयम्। दग्धदर्भात् भस्म गृहीत्वा त्रिपुण्ड्रधारणं कुर्यात्। एवं समनुष्ठितं अग्निकार्यं लीलावतिरिति ख्यातं सर्वकर्मसु योग्यं भवति। एवं यः करोति सः पुण्यां गतिमवाप्नुयात्। एवं नित्याग्नियजनं प्रोक्तम्। [श्लो० १०] इति लीलावत्यग्निकार्यपटलार्थसंग्रहः।

अष्टमे नित्योत्सवविधिपटले प्रथमश्लोकप्रथमार्धेन नित्योत्सवविधिं वक्ष्ये इति प्रतिज्ञा क्रियते। परं तु प्रथमश्लोकोत्तरार्धप्रभृति बलिदानविषया एव निरूप्यन्ते। नित्यहोमसमाप्त्यनन्तरं आचार्येण वलिर्दातव्यः। एवं प्रातः मध्याह्ने सायाह्ने च त्रिष्वपि कालेषु बलिकर्म आचरणीयम्। अथवा द्विकालयोः एकस्मिन् काले वा बलिदानस्य विकल्पः विधीयते। [श्लो० १-२]

ततः गन्धपुष्पादिभिः चन्द्रशेखरं संपूज्य उष्णीषेण उत्तरीयेण च सहितं सर्वालङ्कारशोभितं परिचारकमाहूय छत्रचामरैस्सह शिरसा वाहयेत्। अथवा रथे आरोपयेत्। [श्लो० ३-४]

ततः देवदेवेशं विज्ञाप्य वाद्यघोषपुरस्सरं दीपज्वालाभिः सह प्रदक्षिणक्रमेण नीत्वा बलिपीठं प्रक्षाल्य पाद्यादिकं दत्वा गन्धपुष्पैः समभ्यर्च्य धूपदीपादिकं दत्वा बलिः दातव्यः। हृन्मन्त्रेण अञ्जलिना अर्घ्योदकं दातव्यम्। [श्लो० ५-७]

ततः द्वारस्योभयपार्श्वयोर्विद्यमाननन्दिकालयोर्बलिः दातव्यः। ततः क्रमशः पूर्वस्यां दिशि उक्षाणम् आग्नेय्यां सूर्यं तथा मातृवीरभद्रविघ्नेशान् तत्तत्स्थाने संपूज्य बलिं दद्यात्। निर्ऋतिदेशे गणेशं पश्चिमे जनार्दनं वायुदिग्भागे स्कन्दम् उत्तरतः दुर्गाम् ऐशान्ये क्षेत्रेशं च संपूज्य स्वस्वनामतः बलिर्दातव्यः। [श्लो० ८-१० पू०]

ततः वाद्यशब्दं विना केवलं शङ्खध्वनिना साकं द्वारदक्षिणे दण्डीशं वामे भृङ्गिणं चोद्दिश्य बलिर्दादव्यः। तदनु भूतपीठस्य परितः प्रदक्षिणक्रमेण इन्द्रादिलोकपालान् निर्ऋतेर्दक्षिणे विष्णुम् ईशानस्य वामभागे विरिञ्चिं च संपूज्य तत्तन्नाम्ना बलिदानं कर्तव्यम्। [श्लो० १० उ०-१५]

In Public domain. Digitization Muthulakshmi Research Academy

अस्त्रेशस्य पूजनेन अष्टादशगणानां तृप्तिर्जायत इति हेतोः भूतपीठस्य पुरतः अस्त्रेशस्य बलिः दातव्यः। अग्रपीठस्य परितः पूर्वादिचतुर्षु दिक्षु आमोद – प्रमोद – सुमुख – दुर्मुखान् ईशदिशि विघ्नकर्तारं कर्णिकोर्ध्वे अविघ्नं च संपूज्य बलिं दत्वा बलिदेवस्य तृप्तये स्तोत्रनृत्तगानादिकं समाप्य शनैः प्रदक्षिणं कृत्वा पादौ प्रक्षाल्य अन्तः प्रविश्य उत्सवबेरं मूलबेरस्याग्रे अथवा स्वस्थाने स्थापयेत्। ततः पाद्याचमनार्घ्यपुष्पारात्रिकादिकं करणीयम्। ततः चन्द्रशेखरस्यार्चनं कृत्वा मूलबेरं समर्चयेत्। [श्लो० १६-२२] इति नित्योत्सवविधिपटलार्थसंग्रहः।

नवमे सायरक्षाविधिपटले सायरक्षाकार्यस्यावश्यकत्वं तदानीं कार्यकरणं च प्रतिपाद्यते। आदित्यास्तमये प्रदोषकाले शम्भोः पुरतः तालयुक्तेन वाद्यघोषेण सह नटनादिकं कर्तव्यम्। तदानीं नयनोच्छिष्टनिवारणार्थं सर्वदेवेषु योग्यकं तदाराधनम् आरात्रिकं चानुष्ठेयम्। [श्लो० १-३ पू०]

विघ्नेश्वरं संपूज्य धूपदीपादिकं समर्प्य मण्टपे शुचिस्थाने शालिभिः स्थण्डिलं कल्पयित्वा पुण्याहकर्म निर्वर्त्य तत्पुरुषमन्त्रेण प्रोक्षणं कर्तव्यम्। तदनु अभ्यर्च्य आरात्रिकं त्रिपाद्यूर्ध्वे विन्यस्य हृन्मन्त्रेणाभ्यर्च्य अघोरमन्त्रेण दीपानारोप्य गन्धपुष्पादिभिरभ्यर्च्य अस्त्रमन्त्रेण धूपदीपादिकं समर्प्य अनन्तरम् आरात्रिकं दातव्यम्। सर्षप – तिल – निम्बपत्र – कार्पासबीजान् लवणेन सह गृहीत्वा लिङ्गस्य मूर्ध्नि संभ्राम्य तस्य आरात्रिकस्य मध्ये निक्षिप्य भसितं दातव्यम्। [श्लो० ३ उ०-७]

कृताञ्जलिः रुद्रकन्यकायाः अथवा दासस्य वा हस्ते आरात्रिकं वाहयित्वा वाद्यघोषैस्सह वृषाग्रे निक्षिप्य पादप्रक्षालनं कर्तव्यम्। एवम् एतत्कर्म करणेन लोकरक्षा भवति। इति सायरक्षा-विधिपटलार्थसंग्रहः।

दशमे पटले उपचारविधिर्निरूप्यते। ते च उपचाराः सावश्यं सौभाग्यं सौख्यं सौचक्रम् इति चतुर्विधाः इति निरूप्यते। [श्लो० १-२]

चतुर्विधोपचारेषु आद्यं सावश्यकाख्योपचारः। स च उपचारः आसनम् आवाहनं पाद्यम् आचमनम् अर्घ्यं स्नानं वस्त्रं गन्धं पुष्पं नैवेद्यम् इति दशभेदयुक्तः इति प्रतिपाद्यते। [श्लो० ३-४ पू०]

द्वितीयः सौभाग्यनामकोपचारः। स च उपचारः आसनम् – आवाहनम् – पाद्यम् – आचमनम् – अर्घ्यम् – स्नानम् – वस्त्रम् – गन्धम् – पुष्पम् – नैवेद्यम् – ताम्बूलम् – धूपम् – दीपम् – आरात्रिकं – भसितम् – चुलुकोदकम् इति षोडशभेदयुक्तः इति प्रतिपाद्यते। [श्लो० ४ उ०-६]

तृतीयःसौख्यनामकोपचारः। स च उपचारः आसनम् – आवाहनम् – पाद्यम् – आचमनम् – अर्घ्यम् – स्नानम् – वस्त्रम् – गन्धः – पुष्पम् – आभरणम् – नैवेद्यम् – पानीयम् – ताम्बूलम् – होमः – नित्योत्सवः – धूपः – दीपः – आरात्रिकम् – वेदः – स्तोत्रम् – नृत्तम् – संगीतम् – वाद्यम् – भस्म – मन्त्रार्पणम् इति पञ्चविंशतिभेदयुक्तः इति प्रतिपाद्यते। [श्लो० ७-९]

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थः सौचक्रनामकोपचारः। स च उपचारः आसनम् – आवाहनम् – पाद्यम् – आचमनम् – अर्घ्यम् – स्नानम् – वस्त्रम् – उपवीतम् – भूषणम् – गन्धः – पुष्पम् – नैवेद्यम् – पानीयम् – करप्रक्षालनम् – मुखवासः – ताम्बूलम् – होमः – नित्योत्सवः – धूपः – दीपः – आरात्रिकम् – व्यजनम् – चामरम् – छत्रम् – दर्पणम् – वेदः – स्तोत्रम् – गानम् – नृत्तम् – संगीतम् – वाद्यम् – पञ्चाङ्गश्रवणम् – भस्म – अष्टपुष्पम् – अञ्जनम् – चुलुकोदकम् इति षट्त्रिंशद्भेदयुक्तः प्रतिपाद्यते। [श्लो० १०-१५]

स्नानस्यादावन्ते नैवेद्यस्यादावन्ते धूपादौ च पाद्यमाचमनं च दातव्यम्। विलेपने नैवेद्ये उत्सवान्ते च त्रिषु कालेषु विशेषतः अर्घ्यम् दातव्यम्। आवाहनार्घ्यकाले स्नानान्ते धूपकाले च अष्टपुष्पाणि दातव्यानि। चतुर्ष्वपि कालेषु धूपदीपं समर्पणीयम्। स्नानादौ तदन्ते अर्चनान्ते नैवेद्यादौ उत्सवान्ते च महाघण्टा ताडनीया। स्नानकाले निवेद्ये बलिभ्रमणकाले धूपदीपादिदानकाले उषःकाले प्रातस्सायादिकालयोश्च वाद्यघोषं कारयेत्। [श्लो० १६-२३]

बलिभ्रमणकालेषु गणिकाभिः नर्तनं कारयितव्यम्। स्नानादौ तदन्ते पूजान्ते नैवेद्योत्थापने काले [मन्त्र]पुष्पकाले एवं पञ्चसु कालेषु शङ्खध्वनिः कारयितव्यः। स्नानकाले निवेद्ये उत्सवे धूपकाले तदन्ते च त्रिषु कालेषु ऋगाद्यध्ययसं कुर्यात्। [श्लो० २४-२७]

पूजान्ते चतुर्ष्वपि कालेषु विभिन्नभाषाभिः भक्तस्तोत्राणां पठनं कार्यम्। स्नानकाले निवेदनकाले उत्सवे धूपदानकाले च पटावरोहः कर्तव्यः। एवं प्रतिसन्ध्यम् उपचाराः आचरणीयाः। [श्लो० २८-३०]

सावश्योपचारस्य कालः त्रिपादेन त्रिनाडिका। सौभग्योपचारस्य कालः पञ्चनाडी। सौख्यनामकोपचारस्य कालः यामपरिमितः। सौचक्रनामकोपचारस्य कालः दशनाडी। एवं संपूज्यः। एतेषां कालातिक्रमणाद्दोषः भवति, न्यूनं चेद्दोषो न भवति। एवम् अभ्यर्चनेन सर्वसम्पत्समृद्धिः जायते। इति उपचारविधिपटलार्थसंग्रहः।

एकादशे वास्तुहोमविधिपटले वास्तुहोमः स्थापनकर्मणि तथा प्रोक्षणे गर्भन्यासे विमानस्थापने उत्सवे यागमण्डपे सभास्थानमण्टपे सकलस्थापने आद्योपलेष्टकास्थाने सत्रे नृत्तरङ्के प्रायश्चित्तादिके अन्यस्थापने च आचरणीयः। [श्लो० १-३]

वास्तुपूजा अवश्यं कर्तव्या। वास्तुपूजाविहीने राष्ट्रमेव नश्यति तस्मादवश्यं वास्तुपूजा अनुष्ठेया। इति वास्तुपूजानुष्ठानस्य आवश्यकता प्रतिपाद्यते। [श्लो० ४-५ पू०]

आचार्यः शिष्यैस्सह स्नानादिकं समाप्य करन्यासाङ्गन्यासादिकं सामान्यार्घ्यं च कृत्वा विघ्नेश्वरपूजां समापयेत्। ततः पुण्याहकर्म पञ्चगव्यपूजां च समापयेत्। तदनु शालिभिः स्थण्डिलं कृत्वा एकाशीतिपदयुक्तं वास्तुमण्डलं विधाय मध्ये विद्यमाननवपदे ब्रह्माणं तद्बहिः परितः पूर्वादिचतुर्दिक्षु क्रमशः समर्यकं – विवस्वस्तं – मित्रं – पृथ्वीधरम् च संपूज्य आप – आपवत्स –

In Public domain. Digitization Muthulakshmi Research Academy

सावित्र – सवितृ – इन्द्र – इन्द्रजय – रुद्र – रुद्रजयांश्च, आग्नेयादि समारभ्य पूजयेत्। ततः ईशानदिश्यारभ्य ३२ पदेषु क्रमशः ईशान – पर्जन्य – जयन्त – महेन्द्र – आदित्य – सत्यक – भ्रंश – अन्तरिक्षान् – पूर्वभागे, अग्नि – पूषा – वितथ – गृहक्षत – यम – गन्धर्व – भृङ्गराज – ऋषीन् दक्षिणभागे, निर्ऋति – दौवारिक – सुग्रीव – पुष्पदन्त – वरुण – शोष – रोग – पापयक्ष्मान् पश्चिमे, वायु – नाग – मुख्य – भल्लाट – सोम – मृग – अदिति – दितीन् उत्तरे च एकैकस्मिन् पदे संपूज्य चरकीं विदारीं पूतनां पापराक्षसीं च मण्डलबाह्ये आग्नेयादि विदिक्षु शूलेषु ईशानादि विदिक्षु विद्यानशूलेषु पूर्वादि वृत्तशूलेशुषु ईशान (स्कन्द) जृम्भ (अर्यमा) पिञ्चिक – बलिपिञ्चिकान् संपूज्य गन्धपुष्पादीन् धूपं दीपं नैवेद्यं च समर्प्य प्रणम्य बलिर्दातव्यः। [श्लो० ५ पू०-१९]

कुक्कुटाण्डप्रमाणेन नमोन्तेन साकं बलिर्दातव्यः। तत्तन्नाम्ना स्वाहान्तेन होमः कर्तव्यः। मण्डलस्येशानदिग्भागे शालिना मण्डलं विलिख्य परितः लाजैः पुष्पैः तिलैः दर्भैश्च परिस्तीर्य पञ्चचूर्णैः अलङ्कृत्य सवस्त्रं सकूर्चम् उदकोपेतं सहिरण्यकं पलाशपल्लवोपेतं नालिकेरफलेन युतं वास्तुकुम्भं परिवारघटं विना संस्थाप्य अर्चयेत्। ब्रह्मादिवास्तुदेवान् सर्वान् समभ्यर्च्य बलिमण्डल-पूर्वं अग्न्याधानादिविवाहान्तम् अग्निकार्योक्तमार्गतः अग्निकार्यं समाचरेत्। [श्लो० २०-२५] इति वास्तुहोमविधिपटलार्थसंग्रहः।

द्वादशे पटलेऽङ्कुरार्पणविधिर्निरूप्यते। तत्र आदौ वायुं सम्बुद्ध्य "बीजनिर्वापणं वक्ष्ये शृणु" इति प्रतिज्ञाय अङ्कुरार्पणानुष्ठानस्य निमित्तं प्रतिपाद्य रात्रौ बीजावापनं कर्तव्यमिति सहेतुकं प्रतिपाद्यते। [श्लो० १-२ पू०]

अङ्कुरार्पणकर्मणः अनुष्ठानमध्ये विसर्जनात्पूर्वं अन्यकर्माङ्गत्वेन अन्यदङ्कुरकर्म नानुष्ठेयम्। यस्मिन् दिवसे स्थापनकर्म आरभ्यते तद्दिनात्पूर्वं नवमे, सप्तमे, पञ्चमे, तृतीये दिने अथवा सद्यो वा अङ्कुरार्पणकर्मानुष्ठेयम्। [श्लो० ३ उ०-४]

प्रासादस्योत्तरभागे मण्टपं निर्माय तस्य मण्टपस्यान्तः इष्टदेशे अन्यत्र रुचिरे स्थाने वा गोमयादिना लेपनं विधाय ध्वजादिभिः अलङ्कृत्य शुद्धवारिणा प्रोक्षणं विधातव्यम्। ततः शालिभिः स्थण्डिलं निर्मातव्यम्। [श्लो० ५-६]

तच्च स्थण्डिलं स्वस्तिकं गोमुखम् इति द्विविधं भवति। तत्राद्ये स्वस्तिकविधाने द्वादश-संख्याकाः पालिकाः भवन्ति। द्वितीये गोमुखनाम्नि स्थण्डिले चतुर्विंशतिपालिकाः भवन्ति। ताश्च पालिकाः आकारभेदेन पालिकाः, शरावाः, घटिकाः इति त्रिविधा भवन्ति। पूर्वप्रतिपादितलक्षण-युक्ताः पालिकादयः बीजनिर्वापार्थं संग्राह्याः। [श्लो० ७-९]

In Public domain. Digitization Muthulakshmi Research Academy

प्रागुदक् पञ्च पञ्च सूत्रपातेन स्वस्तिकपदमण्डलं भवति। अस्मिन् मण्डले आहत्य षोडश-पदानि जायन्ते। तत्र मध्ये चत्वारि पदानि तत्परितः द्वादशपदानि च जायन्ते। एतदेव स्वस्तिक-पदमण्डलम् इत्युच्यते। [श्लो० ९ उ०-१०]

प्रागुदग् अष्टसंख्याकसूत्रपातेन गोमुखाख्यमण्डलं भवति। तत्र मध्ये नवपदं परिगृह्य चतुर्षु दिक्षु षट् षट् पदानि गृहीतव्यानि। एवं गोमुखमण्डलं परिकल्पनीयम्। ततः तिल-लाज-पुष्प-दर्भैः परिस्तरणं निक्षेपणीयम्। दर्भैः पालिकासुषिरादीनां घट्टनं कार्यम्। [श्लो० ११-१३ पू०]

आचार्यः शिष्यैस्साकं स्नानादिकं निर्वर्त्य शुद्धवस्त्रम् उष्णीषं च धृत्वा सकलीकरणं कुर्यात्। ततः सामान्यार्घ्यं संकल्प्य पुण्याहं पञ्चगव्यं च समाप्य विघ्नेश्वरपूजां कुर्यात्। [श्लो० १३ उ०-१५]

विघ्नेश्वरस्य भक्ष्यादिकं दत्वा नालिकेरं द्विधा भित्वा निवेदनं दद्यात्। नालिकेरफलं द्विधा विभक्तं चेत् सर्वसिद्धिर्भवति। अन्यथा दोषो जायते। ततः विघ्नेशं प्रार्थ्य अस्त्रेशमपि संपूज्य नमस्कारं कृत्वा अङ्कुरार्पणं कुर्यात्। [श्लो० १६-१९]

अङ्कुरार्पणकार्यस्य कृते प्रथमतः मृत्संग्रहणं कार्यम्। अतः मृदाहरणार्थं तत्रावश्यकानि द्रव्याणि अस्त्रेशं च परिचारकेण वाहयित्वा धाम्नः प्रदक्षिणं कृत्वा आलयस्य पूर्वभागे अथवा उत्तरे ईशाने वा मृद्ग्रणयोग्यस्थानं गत्वा तत्र अस्त्रेशं संस्थाप्य तस्य पुरतः स्थण्डिलं परिकल्पनीयम्। [श्लो० १९ उ०-२२]

स्थण्डिले नवकोष्ठं विलिख्य तस्य ईशानदेशे एकस्मिन् पदे विघ्नेश्वरं संपूज्य पुण्याहं कृत्वा अस्त्रमन्त्रेण प्रोक्षणं कुर्यात् । [श्लो० २२ उ०, २३]

नवसु कोष्ठेषु मध्यकोष्ठे ब्रह्माणं परितः अनन्तादिदेवताः पूज्याः। तेषां सघृतेन गुलसंमिश्र-दध्योदनेन बलिः दातव्यः। [श्लो० २४-२६ पू०]

ततः ताम्बूलं समर्प्य अर्घ्यं दत्वा सर्वाः देवताः उद्वास्य तेषामनुज्ञया मृदं गृहीत्वा "एतत्स्थानाश्रिता हे देवाः यूयं यथासुखं गच्छध्वम्"। इति विज्ञाप्य संपूज्य बलिमण्डलस्य पूर्वभागे पञ्चगव्येन संप्रोक्ष्य कुन्दालीं पृथिवीं च नववस्त्रेण संवेष्ट्य खनित्रे कूर्चं बद्ध्वा आधाररूपिणीं शक्तिं गन्धपुष्पादिना अभ्यर्च्य हृत्प्रदेशे शक्तिं विन्यस्य अस्त्रमन्त्रं समुच्चरन् भूमिं कुन्दाल्या खानयेत्। [श्लो० २६ उ०-३१ पू०]

मृद्ग्रहणानन्तरं तद्भूमिं समतलं कृत्वा आधारशक्तिमभ्यर्च्य धूपदीपादिकं समर्प्य सोष्णीषं सोत्तरीयकं परिचारकमाहूय शिरसा मृदं वाहयित्वा गजे वा रथे वा आरोप्य अथवा पादगमनेन वा स्वस्तिसूक्तैः मङ्गलवाद्यैः सह प्रदक्षिणं कृत्वा अङ्कुरमण्टपं प्रविशेत्। [श्लो० ३१ उ०- ३४ पू०]

In Public domain. Digitization Muthulakshmi Research Academy

अङ्कुरार्पणमण्डपं प्रविश्य पुण्याहं वाचयित्वा अस्त्रमन्त्रेण तत्स्थलं प्रोक्षयेत्। तत्र स्थण्डिलं कल्पयित्वा मध्ये सोदकं हेमपल्लवकूर्चैर्युक्तं सूत्रवेष्टितं वस्त्रयुक्तं नालिकेरफलेन च युक्तं कुम्भं स्थाप्य गन्धपुष्पादिना अभ्यर्च्य मध्ये अस्त्रेशं च संपूज्य ओषधीश्वरं सोमं तोषयेत्। [श्लो० ३४ उ०-३७ पू०]

तत्परितः पालिकादीनि संस्थाप्य आहृतं मृदं ईशानमन्त्रमुच्चरन् पालिकादिषु निक्षिपेत्। तत्र "तिल – सर्षप – मुद्ग – माष – शिम्ब – आढक – कुलुत्थ – यव – कार्पास" बीजानि क्षीरेण सेचयित्वा 'या जाता' इति मन्त्रमुच्चरन् धान्यपात्रं स्पृष्ट्वा शुभे मुहूर्ते देवेशं पूजयित्वा पालिकादिषु हृदयमन्त्रमुच्चरन् वापयेत्। [श्लो० ३७ उ०-४०]

बीजवापानन्तरं स्वस्तिकभेदप्रोक्तद्वादशपालिकादिषु "सहस्राङ्गी – भूषणी – मृकटी – शिखण्डिनी – शक्तिनी – शान्तिनी – पुष्पिणी –अस्त्राङ्गी – उषादेवी – साक्षिणी – शङ्खिनी पुष्पिणी" इति द्वादश देवताः पूज्याः। गोमुखभेदे स्वस्तिकाङ्कुरदेवताभिः सह श्रुतिः – स्मृतिः – धृतिः – मेधा – प्रशा – स्वाहा – स्वधा – क्षमा – कान्तिः – मोहा – जया – भद्रा – इति द्वादश देवताः अपि मेल्य चतुर्विंशतिपालिकादिषु पूज्याः। अनन्तरं शुद्धजलेन सेचयित्वा पालिकादयः नववस्त्रैः पिधातव्याः। [श्लो० ४१-४४]

पालिकादिषु उप्तानि बीजानि त्रिदिनेषु अङ्कुरितानि चेदुत्तमम्, चतुर्दिनेषु अङ्कुरितानि चेन्मध्यमम्, पञ्चाहेष्वङ्कुरितानि चेदधमम्। ऊर्ध्वं चेदशुभमिति फलं प्रतिपाद्य उत्पन्नानामङ्कुराणां वर्णभेदेन शुभाशुभफलभेदाः निरूप्यन्ते। एतादृशं शुभाशुभफलं निरीक्ष्य यः एतत्कर्मकरोति सः पुण्यां गतिं प्राप्नोति इति फलं प्रतिपाद्यते। [श्लो० ४५-५९] इति अङ्कुरार्पणविधिपटलार्थसंग्रहः।

त्रयोदशे पटले शिवालयेऽनुष्ठीयमानमहोत्सवस्य वैविध्यं तद्भेदाः तत्क्रमाश्च विशदतया प्रतिपाद्यन्ते। उत्सवकरणेन यजमानः सर्वान् कामांश्च मोक्षं चापि लभते। ध्वजारोहादितीर्थान्तं साकल्यम्, ध्वजारोहं विना क्रियमाणं पावनम्, विना बलिहोमादिकं शान्तिकम्, यजमानेच्छया क्रियमाणं मङ्गल्यं चेति चतुर्धा उत्सवस्य विभागः [श्लो० २, पू०-६ पू०] उच्यते। सावनं, चान्द्रं, नक्षत्रं, सौरं चेति चतुर्धा विभक्तेषु मासेषु साकल्यपावनोत्सवौ सौरमासेषु कर्तव्यौ, अन्येषु त्रिविधमासेषु शान्तिमङ्गलोत्सवौ करणीयावित्युक्त्वा सौरमासे सर्वोत्सवं कर्तुं शक्यते इत्युच्यते [श्लो० ६ पू०-८ पू०]। पुष्यमासादारभ्य मार्गशीर्षान्तं तत्तन्मासे तत्तन्मासर्क्षे चतुर्दश्यादितिथौ राजाभिषेके चापि उत्सवः क्रियते [श्लो० ९-१३]। शैवादिचान्द्रपर्यन्तम् उत्सवानां नवभेदाः, एकाहादारभ्य सप्तदशदिनपर्यन्तं क्रमेण तेषां अनुष्ठानं, तेषु आद्यं त्रयं कन्यसं मध्यमत्रयं मध्यममन्तिमं त्रयम् उत्तममिति च निर्धारः क्रियते। [श्लो० १४ पू०-१९ उ०] तदनन्तरं शैवाद्युत्सवानां प्रत्येकं वृद्धिदविजयसौख्यभेदाः विशदतया प्रतिपाद्यन्ते। क्वचित् स्थले सौख्यस्य त्र्याह्निकक्रम इत्यपरपर्यायः दृश्यते।

In Public domain. Digitization Muthulakshmi Research Academy

प्रायेण वृद्धिदविषये निर्दिष्टदिवसादेकदिनमधिकतया उत्सवः क्रियते तथा प्रतिदिनं बलिद्वयं च दीयते। उदाहरणतया एकदिनोत्सवे शैवे वृद्धिदक्रमे पूर्वदिने सायङ्काले समारभ्य परस्मिन्नहनि प्रभाते तीर्थोत्सवः, एकस्मिन्नेवाहनि बलिद्वयं च विधीयते। विजयक्रमे तु पूर्वस्मिन् दिने रात्रावुत्सवमारभ्य बलिमेकमेव दत्वा प्रातःकाले तीर्थोत्सवः विधीयते। ब्राह्मिकक्रमापरपर्याय-सौख्यक्रमे पुनः पूर्वस्मिन्नहनि मध्याह्ने वापराह्ने वा उत्सवारम्भमुखेन यानमेकं समापाद्य तस्मिन्नेव दिनान्ते तीर्थोत्सवः करणीयः इति विधीयते। अस्मिन् क्रमे बलिदानमेव नास्तीति विशेषः [श्लो० २० उ०-२४ पू०]। गौणोत्सवे वृद्धिदक्रमे पूर्वस्मिन् दिने सायंकाले समारम्भः यानं त्रिदिनोत्सव-करणं दिनं प्रति बलिद्वयनियमेन षड् बलयः चतुर्थदिने प्रभाते तीर्थोत्सवश्च इति क्रमः [श्लो० २५-२६]। गौणोत्सवे विजयक्रमे सायाह्नेऽस्त्रयागः चत्वारो बलयः चतुर्थदिने तीर्थोत्सवश्च इति क्रमः [श्लो० २७-२८ पू०]। ब्राह्मिकक्रमे नित्यपूजावसाने त्रिदिनेषु उत्सवः त्रिषु दिनेषु यानान्ते जलक्रीडा चेति क्रमः [श्लो० २८ उ०-२९ पू०]। भौतिकोत्सवे वृद्धिदक्रमे पूर्वस्मिन् दिने सायंकाले समारम्भः यानं दशबलिदानं षष्ठेऽहनि तीर्थोत्सवश्चेति [श्लो० ३०-३१ पू०], विजयक्रमे सायाह्ने समारम्भोऽष्टौ बलयः पञ्चमदिवसे तीर्थोत्सवश्चेति [श्लो० ३१ उ०-३२ पू०], ब्राह्मिकक्रमे नित्यपूजावसाने यानं पञ्चमेऽहनि यानान्ते तीर्थोत्सवश्च [श्लो० ३२ उ०-३३ पू०] प्रतिपाद्यते। सप्ताहोत्सवे भौवने वृद्धिदक्रमे पूर्वस्मिन् दिने रात्रौ होमाद्यारम्भः दिनं प्रति बलिद्वयनियमेन चतुर्दश बलयः अष्टमेऽहनि कौतुकपूर्वकतीर्थोत्सवश्च [श्लो० ३४-३५ पू०] विजयक्रमे पूर्वरात्रौ होमबलियानादिकं द्वादश बलयः सप्तमदिने तीर्थोत्सवश्च [श्लो० ३५ उ०-३६] ब्राह्मिके निर्दिष्टदिवसे पूर्वाह्ने वापराह्ने वा केवलयान-भ्रमणमन्तिमदिने तीर्थोत्सवश्चेति [श्लो० ३७] प्रतिपाद्यते। नवाहात्मकदैविकोत्सवे वृद्धिदक्रमे पूर्वदिनसायंकाले समारम्भोऽष्टादश बलयश्च [श्लो० ३८ उ०-३९ पू०] उच्यन्ते। दैविके विजयक्रमो न प्रतिपादितः। ब्राह्मिके तु नित्यपूजावसाने यानं नवमेऽहनि तीर्थोत्सवश्चेति [श्लो० ३९ उ०-४० पू०] विधीयते। पैतृके वृद्धिदक्रमेऽस्त्रयागेनोत्सवारम्भः द्वाविंशतिर्बलयः द्वादशदिने तीर्थोत्सवश्च [श्लो० ४१-४२ पू०], विजयक्रमे सायंकाले उत्सवारम्भः द्वाविंशतिर्बलय एकादशदिने तीर्थोत्सवश्च [श्लो० ४२ उ०-४३ पू०], ब्राह्मिकक्रमे प्रतिदिनं याने भ्रमणमन्तिमेऽहनि तीर्थोत्सवश्च [श्लो० ४३ उ०-४४ पू०] प्रतिपाद्यन्ते। कौमारे वृद्धिदक्रमे पूर्वदिनसायंकालेऽस्त्रयागः षड्विंशतिर्बलिदानं चतुर्दशेऽह्नि तीर्थोत्सवश्च [श्लो० ४५-४६ पू०], विजयक्रमेऽस्त्रयागः चतुर्विंशतिर्बलयः त्रयोदशदिने तीर्थोत्सवश्च [श्लो० ४६ उ०-४७ पू०], ब्राह्मिके केवलं याने भ्रमणमन्तिमेऽहनि तीर्थश्चेति [श्लो० ४७ उ०] प्रतिपाद्यते। सावित्रे वृद्धिदक्रमे त्रिंशद्बलयः षोडशदिने तीर्थोत्सवश्च [श्लो० ४८ उ०-४९ पू०], विजयक्रमे पूर्वदिनेऽस्त्रयागः अष्टाविंशतिर्बलयः पञ्चदशदिने कौतुकबन्धनपूर्वकतीर्थोत्सवश्च [श्लो० ४९ उ०-५० पू०], ब्राह्मिके तु याने भ्रमणमन्तिमेऽह्नि तीर्थोत्सवश्च [श्लो० ५० उ०-५१ पू०] उच्यन्ते। चान्द्रे वृद्धिदक्रमेऽस्त्रयागः चतुस्त्रिंशद्बलयः अष्टादशदिने तीर्थोत्सवश्च [श्लो० ५२-५३ पू०], विजयक्रमे पूर्वस्मिन् दिने सायाह्ने उत्सवारम्भः द्वात्रिंशद्बलयः सप्तदशदिने तीर्थोत्सवश्च [श्लो० ५३

In Public domain. Digitization Muthulakshmi Research Academy

उ०-५४ पू०], ब्राह्मिकक्रमे यानभ्रमणमन्तिमदिने तीर्थोत्सवश्च [श्लो० ५४ उ०] प्रतिपाद्यन्ते। अयं ब्राह्मिकक्रम एव ब्रह्मोत्सव इत्यपि ज्ञायते इत्यपि सूचितम्।

एतादृशविशेषभेदादिकमुक्त्वा पुनरुत्सवस्य साधारणतया भेदत्रयमुच्यते। तत्तु ध्वजारोहणपूर्वकम्, भेरीताडनपूर्वकम्, अङ्कुरार्पणपूर्वकम् [श्लो० ५६-५९] इति।

तेषु अस्मिन् पटले ध्वजारोहणपूर्वकोत्सवक्रमः अनन्तरवर्तिश्लोकेषु किञ्चिद्विशदतया प्रतिपाद्यते।

तत्रादौ उत्सवस्य षड्विंशदङ्गानि [श्लो० ६२-७१ पू०] क्रमेणोच्यन्ते।

ध्वजारोहदिनात् पूर्वे द्विदिने त्रिदिने सप्ताहे वाङ्कुरार्पणं क्रियते। तदनन्तरमस्त्रयागदिनात् पूर्वे ध्वजारोहणं विहितम्। तत्रादौ ध्वजपटलक्षणं तद्दैर्घ्यं तद्वर्णम् इत्येतानि [श्लो० ७२ उ०-७६] प्रतिपाद्यन्ते। ध्वजपटे वृषबिम्बलेखनक्रमः वृषभस्य अङ्गलक्षणानि तेषां वर्णानि च स्पष्टतया [श्लो० ७७-८३] उच्यन्ते। वृषभः स्थितरूपेण लिखितव्य इति नियमोऽपि सूचितः। [श्लो० ८३ उ०]। तस्मिन्नेव पटे वृषभस्य परितः लेखनीयानि दर्पणचामरश्रीवत्साद्यष्टमङ्गलरूपाणि तेषां वर्णानि च उच्यन्ते [श्लो० ८४-९१ पू०]।

भूषणाद्यैः स्रग्भिश्चालङ्कृतो देशिकः मूललिङ्गं नैवेद्यान्तं सम्पूज्य देवस्य करिष्यमाणोत्सवं विज्ञाप्य विघ्नेशाय पायसादिकं निवेद्य वृषभस्थाने श्वेतद्रोणशालिभिः स्थण्डिलं कृत्वा तन्मध्येऽष्टदलपद्ममालिखति [श्लो० ९३-९६ पू०]। तन्मध्ये त्रिसूत्रेण वेष्टितं वृषकुम्भं वर्धनीं च स्थापयित्वा परितः वृषविद्येश्वरकुम्भानष्टौ स्थापयति। [श्लो० ९६ उ०-९७ उ०] पाद्याचमनार्घ्याणि शुद्धतोयानि च तत्तत्स्थाने निधाय कूर्चवस्त्रपल्लवस्वर्णश्रृङ्गाद्यैः कुम्भमलङ्कृत्य पुण्याहं वाचयित्वा शुद्धैरुक्थैरिति मन्त्रेण शङ्खतोयेन द्रव्याणि प्रोक्षति। [श्लो० ९८-१०१ पू०] स्थण्डिलस्य चतुर्दिक्षु प्राच्यादिक्रमेण नन्दिमहाकालभृङ्गिविनायकादीन् विदिक्षु आदित्यमग्निदिग्भागे नैर्ऋते वास्तुदैवतं वायव्ये गणनाथमैशान्ये गुरुमूर्तिं च पूजयित्वा आधाराद्यासनोपरि पद्मासनं सङ्कल्प्य तदुपरि घटरूपं भावयित्वा तदनन्तरं वृषबीजमन्त्रेण गन्धाद्यैरर्चयति। [श्लो० १०२ उ०-१०६ पू०] वृषकुम्भपूजारम्भे आलयस्थवृषभं पञ्चगव्यैरभिषिच्य गन्धाद्यैरभ्यर्च्य मुद्गान्नताम्बूलादिकं दत्त्वा पुण्याहं वाचयति। [श्लो० १०६ उ०-१०७ पू०] तत्पार्श्वे स्थण्डिले वृषकुम्भादीन् स्थापयित्वा चलासनं सम्पूज्य मन्त्रन्यासादिकं कृत्वा वर्धनीसहितवृषकुम्भमुत्थाप्य पूर्वकृते स्थण्डिले स्थापयित्वा स्थिरासनं पूजयति। [श्लो० १०७ उ०-११०] वृषाणीसहितवृषभं तत्परितः उक्षाश्रृङ्गिनन्दिवेदपादगोपत्युग्रश्रृङ्गवृपानाथवृषेश्वरान् वृषाष्टविद्येश्वरान् पूर्वादीशानपर्यन्तं स्वस्वनामभिरभ्यर्चति। [श्लो० १११-११३ पू०] स्थण्डिलान्तरे शिवाग्निं विधिनानीय तन्मध्ये वृषमावाह्य समिदाज्यचरुलाजादिभिः सद्यादीशानान्तपञ्चमन्त्रैः प्रत्येकं पञ्चाहुतीः तदन्ते व्याहृतिं च आचार्यः जुहोति। [श्लो० ११३ उ०-११५] हृदयमन्त्रमुच्चरन् स्थण्डिले स्थापितध्वजपटं गौर्धेनुभव्यमन्त्रेणालोकयति वृषगायत्रीमन्त्रमनुस्मरन्नर्घ्यजलेन च प्रोक्षति। [श्लो० ११६-११७]

In Public domain. Digitization Muthulakshmi Research Academy

अनन्तरं विजयक्रमः प्रतिपाद्यते। तत्राचार्यः प्रथमं वृषाक्षिमोचनं कुशाग्रेण विधाय वृषाधिवासनार्थं पवमानमन्त्रमुदीरयन् "वृषेन्द्र शयितो भव" इति प्राथ्र्य पुष्पाञ्जलित्रयं करोति। [श्लो० ११८-१२१ पू०] मन्त्रन्यासपूर्वकं शिवविद्यात्मतत्त्वानि वृषभस्य मूर्धादिगलपर्यन्तं गलाद्युरःस्थलान्तं हृदयादिखुरान्तं च क्रमेण न्यस्य तत्त्वतत्त्वेश्वरान् गन्धपुष्पादिभिर्यजते। [श्लो० १२१ उ०-१२३] स्थण्डिलेऽब्जं विलिख्य गन्धतोयेन पूरितं वस्त्रकूर्चपिधानयुक्तकुम्भं ध्वजपटं च गन्धाद्यैः पूजयित्वा प्रासादेन मन्त्रेण शतं तदर्धं पञ्च वाहुतिसङ्ख्याकहोमं विधायान्ते पटं स्पृशति। [श्लो० १२४-१२७ पू०] कुम्भे चलासनं सम्पूज्य होमसङ्ख्याजपं कृत्वा पूर्ववत् कुम्भं स्थापयित्वा स्थिरासनमर्चति। [श्लो० १२७ उ०-१२८] ध्वजकुम्भाग्रे वास्तुनाथमभ्यर्च्य सरत्नवारिपूरितकुम्भं स्थण्डिले पुनः न्यस्य नैवेद्यान्तं पूजयति। [श्लो० १२९-१३०] अनन्तरं यागमन्दिररक्षणार्थं वास्तुनाथं प्राथ्र्य वास्तुबलिं विधाय रात्रिजागरणमाचार्यः करोति। [श्लो० १३१-१३२]

वृद्धिदक्रमे तु पूर्ववदष्टद्रोणमितशालिना कृते स्थण्डिले पद्मं विलिख्य वृषकुम्भं निधाय वृषमावाहनाद्युपचारैः वृषगायत्रीमन्त्रेण सम्पूज्य तत्परितः [वृष]लोकेशकुम्भान् सम्पूज्य पूर्वोक्तविधिनाग्निकार्यमाचरति। [श्लो० १३३-१३५]

ध्वजारोपणं विजयक्रमे ध्वजदण्डलक्षणतन्मानपुरःसरं निरूप्यते। क्रमुकचन्दनखदिरादयो त्वक्सारान्तःसारा वा अवक्रा निर्व्रणा ध्वजदण्डार्हवृक्षाः। [श्लो० १३६ उ०-१३७] एकद्वित्रितलान्तं वा वृषस्थलसमं तु वा गलान्तं शिखरान्तं वा महानासीसमं तु वा स्थूप्यन्तं गोपुरान्तं वा ध्वजदैर्घ्यं भवितुमर्हति। [श्लो० १३८-१३९ पू०] मात्राङ्गुलेन षट्सप्त पञ्च वा तालेन कृताया ध्वजयष्टेरायामं त्रिधा विभज्य एकांशं चतुरश्राकारेण निर्माय शेषौ दीर्घाकृती सुषिरद्वययुतौ च कृत्वा वलययुतोपदण्डं संयोज्य तन्मध्ये रज्जुं बध्नाति। [श्लो० १३९ उ०-१४३ पू०] यतः पीठगोपुरयोर्मध्ये वा वृषपीठाग्रे वा ध्वजदण्डः स्थापनीयः अतः तत्र वेदिका क्रियते। [श्लो० १४३ उ०-१४४ पू०] आचार्यः प्रातः कृतनित्याह्निकः ध्वजपटं कुम्भं च सम्पूज्य पूर्णाहुतिं चाग्नौ विधाय दण्डशुद्धिं करोति। [श्लो० १४५-१४६ पू०] उष्णीषाद्यलङ्कृतपरिचारकैः कुम्भं ध्वजम् अस्त्रमूर्तिं च वाहयित्वा सर्वातोद्यैः सह ग्रामप्रदक्षिणं कृत्वा ध्वजस्थानं समाविशति। [श्लो० १४६ उ०-१४८ पू०] पुण्याहं वाचयित्वा ध्वजपटं क्षुद्रघण्टादिभिर्दर्भमालाभिश्चालङ्कृत्य तं रज्जुनाऽऽबध्य वृषगायत्रीमन्त्रमनुस्मरन् देशिकः देवेशप्रार्थनापुरःसरं बहुरूपमन्त्रमुच्चरन् मूर्तिपैः सह ध्वजमारोपयति। [श्लो० १४८ उ०-१५१] ध्वजदण्डे कुशैः सव्यक्रमेण बद्ध्वा वृषविघ्नेशकुम्भजलैर्वेद्यूर्ध्वेऽभिषिच्य गन्धपुष्पैरभ्यर्च्य मुद्गान्नं निवेद्य धूपदीपादिकं दत्वाऽऽशीर्वचनैः स्तोत्रगीताद्यैश्च सन्तोषयति। [श्लो० १५२-१५५]

तस्यैव वृद्धिदक्रमः प्रतिपाद्यते। ध्वजं शिबिकायामथ वा रथे वाऽऽरोप्य देवालयमेव प्रदक्षिणीकृत्य दण्डसन्निधौ पुण्याहवाचनानन्तरं ध्वजपटमारोपयति। ततः पञ्चगव्यैः संस्नाप्य कुम्भैः सह धामप्रदक्षिणं कृत्वा गुलदध्याद्युपदंशकान् निवेदयति। [श्लो० १५६-१५९ पू०] अत्रानुक्तविषयाः विजयक्रमे प्रतिपादिवदाचरणीयाः इत्यन्ते सूचितम्।

In Public domain. Digitization Muthulakshmi Research Academy

भेरीताडने विजयक्रमः प्रतिपाद्यते – रात्रौ मूलदेवाग्रे वा ध्वजमूले वा देवताह्वानमारभ्यते। तदङ्गतया स्थण्डिलद्वितयं निर्माय त्रिशूलं भेरीं च तस्मिन्निधाय पुण्याहवाचनपुरःसरमस्त्रेशं पूजयति। [श्लो० १६१-१६२] आचार्यः रुद्रब्रह्मविष्णुसेनानीसप्तमातृकुबेरादीन् त्रिशूले तेषां निर्दिष्टस्थाने आवाह्य गन्धपुष्पाद्यैः रुद्रगणिकाताण्डवान्तं सम्पूजयति। [श्लो० १६३-१६७ पू०] ततो भेरीं नववस्त्रेण संवेष्ट्य तन्मध्ये शम्भुविष्णुचतुर्मुखादिदेवान् कीलेषु सप्त मातृः चर्मसूत्रे भुजङ्गेन्द्रं स्कन्दं कोणे चावाह्य तत्तन्मन्त्रेण गन्धपुष्पादिभिः पूजयति। [श्लो० १६७ उ०-१६९] प्रथमं देशिकः त्र्यम्बकादिमन्त्रमुच्चरन् त्रिवारं भेरीं ताडयित्वास्त्रराजमूले ब्रह्माणमष्टादशगणेश्वरान् सकलान् देवांश्च तत्तत्स्वनाममन्त्रैरर्चयित्वा भेरीवादकं शिवमन्त्रोच्चारपूर्वकं भस्म धारयित्वा तत्कण्ठे भेरीं समारोप्य तं भेरीताडने नियोजयति। वादकः बलितालं वादयति। [श्लो० १७०-१७४]

विजयक्रमे बलिदानविधिः ततो निरूप्यते –

ततः मूलदेवस्य देवताह्वानं सन्निवेद्य सर्ववाद्यैः सहितमस्त्रेशमालयप्रदक्षिणक्रमेणानीय वृषादिपरिवाराणां बलिदानमिन्द्रादीशानपर्यन्तं स्वस्वनामतः क्रियते। [श्लो० १७५-१७७] ब्रह्मस्थाने ऐन्द्रस्थाने वा सन्धिदेवानावाह्य बलिं दत्त्वाऽऽचार्यः आलयं प्रविशति। [श्लो० १७८-१८० पू०]

भेरीताडने वृद्धिदक्रमः- देशिकोऽस्त्रं भेरीं च सम्पूज्य चर्चपुटेन तालेन भेरीं वादयित्वा शिवादिसर्वदेवांश्चाहूयाभ्यर्च्यास्त्रराजसहितमालये प्राकारादिस्थानेषु लब्धप्रदेशे वा बलिदानं विधाय पादप्रक्षालनानन्तरमालयं प्रविश्य देवेशं पूजयति। [श्लो० १८० उ०-१८५ पू०] ततः निर्दिष्टदिवसे सूर्यास्तमयात् पूर्वं वास्तुहोमं पर्यग्निकरणं च कृत्वा उत्सवार्थमङ्कुरार्पणमारभते। [श्लो० १८५ उ०-१८६] ततः कौतुकबन्धनार्थं स्थालिकां तण्डुलैः सम्पूर्य दर्भपुष्पादिभिरलङ्कृत्य शालिभिः कृतस्थण्डिले भस्माधारं सौवर्णकार्पासाद्यन्यतमनिर्मितं कौतुकं च स्थापयित्वा रक्षासूत्रमन्त्रं जपति। [श्लो० १८७-१९०] ततः यागेशं संस्नाप्यालङ्कृत्याभ्यर्च्य युवं वस्त्रेति मन्त्रमनुस्मरन् वस्त्रेणाच्छादयति। [श्लो० १९१-१९२ पू०] त्र्यम्बकेन मन्त्रेण कौतुकं भस्मना संसिच्य ओं नमो ब्रह्मणे इति मन्त्रेण तण्डुलं हस्ते धृत्वा देवस्य दक्षिणे करे देव्या वामकरे च बृहत्सामेति मन्त्रमुच्चरन् कौतुकं बद्ध्वा यो ब्रह्मा इति मन्त्रेण विप्राणामाशीर्वचनसहितं भसितं ददाति। [श्लो० १९२ उ०-१९५ पू०] शूलस्य मध्यपत्रे चान्यासां देवताप्रतिमानां च कौतुकं बध्यते। [श्लो० १९५ उ०-१९६ पू०]

अस्त्रयागार्थमालयस्य पूर्वे उत्तरे ऐशान्ये वा मण्डपं यथोक्तलक्षणं निर्माय गोमयालेपनादिनालङ्कृत्य पुण्याहवाचनानन्तरमाचार्यः सौरादिगुरुपर्यन्तं पूजयित्वा वेद्यूर्ध्वे शालिभिस्तण्डुलैः कृतस्थण्डिले तिललाजदर्भपुष्पैः परिस्तीर्य तन्तुभिःपरिवेष्टितनवकुम्भान् सरत्नान् सवस्त्रान् वेदिकोपरि स्थापयति। [श्लो० १९६ उ०-२०२] मध्ये शिवकुम्भं तद्वामे वर्धनीं तत्परितोऽष्टविद्येश्वरकुम्भान् दशायुधानि तद्बाह्येऽष्टमङ्गलानि तद्बाह्ये च गन्धपुष्पादिभिः स्वस्वनाममन्त्रैः सम्पूजयति। [श्लो० २०३-२०५ पू०] अस्त्रहोमार्थं कुण्डसंस्कारं विधायाग्निं सम्प्रकल्प्य समिदाज्यचरुलाजमाषशालियवतिलैः सद्यादिशिखापर्यन्तं प्रत्येकं शतं तदर्धं नव पञ्चैकं वा हुत्वान्ते व्याहृतिहोमं विधाय

In Public domain. Digitization Muthulakshmi Research Academy

पूर्णाहुतिं दत्वा नैवेद्यादिकं धूपदीपादिकं च ददाति। [श्लो० २०५ उ०-२०८ पू०] होमान्ते सायं प्रातः बलिदानार्थं द्रोणं वा तदर्धं वा तण्डुलं पक्त्वा स्थलिकां कटाहं वा पुरुषमन्त्रेण क्षालयित्वा पक्वान्नेनापूर्य बलिद्रव्यं दधिफलादिकं च तत्र निक्षिप्यान्नलिङ्गं कल्पयति। [श्लो० २०९-२११] अन्नलिङ्गं तु द्वादशाङ्गुलोत्सेधं तद्विगुणनाहं त्र्यङ्गुलाग्रमामूलाग्रं क्रमात् कृशं च भवति। [श्लो० २१२] शेषमन्नमप्सु निक्षिप्यान्नलिङ्गमध्ये पाशुपतास्त्रं सम्पूज्य वस्त्रपुष्पस्त्रगादिसहितं गर्भगृहं गत्वा देवदेवाय विज्ञाप्य समन्त्रकं पञ्चमहाशब्दबलितालसहितं बलिदानं करोति। [श्लो० २१३-२१५] तत्पश्चादालयस्य प्राकारेऽन्नलिङ्गमस्त्रेशबलिबेरादिसहितं छत्रचामरपरिवृतं घण्टारवसकलवाद्यघोषैश्च स्वस्तिसूक्तैश्च सहितं बलिपात्रबलिदीपसमायुक्तं रुद्रगणिकादिभिरावृतमानीय प्राकारे तत्तत्स्थान आवाहितानां देवतानां बलिं ददाति। [श्लो० २१६-२१८ पू०] तत्र नन्दिकालवृषभानुमुण्डिमातृगणवीरभद्रगणेशविघ्नेशाच्युतगुहदुर्गाचण्डेश्वराः प्रथमावरणे, दण्डि-भृङ्गिवृषध्वजमहापीठदेवराजाः द्वितीयावरणे, अग्नियमनिर्ऋत्यपाम्पतिमारुतयक्षेशक्षेत्रपालेशानाः तदनन्तरं च बलिग्रहणदेवताः। [श्लो० २१८ उ०-२२२ पू०] प्रासादनिर्गमद्वारे द्वारबलिं तदुत्तरे कुम्भोदरस्य तद्दक्षिणे महोदरस्य च बलिं दत्त्वा ब्रह्मस्थानेऽथ वेन्द्रस्थाने वा कृतबलिपीठे गोमयालेपनं कृत्वा पञ्चगव्यैः प्रोक्ष्य ज्वालाजिह्वज्वलत्केशादिभूतानामिन्द्रस्थानादितः ग्रामशान्त्यर्थं बलिं ददाति। [श्लो० २२३-२२८] नित्यमेव सर्वदेवतृप्त्यर्थमीशदिग्भागेऽस्त्रदेवाय बलिर्दातव्यः। [श्लो० २२९] बलिदाने पाद्याचमनार्घ्यगन्धपुष्पधूपदीपबलिदानबलिमुद्रार्घ्यदाननमस्कारस्तोत्रभेरीघोषणनृत्तगीतवाद्यब्रह्मतालादयः षोडशोपचाराः कार्याः। [श्लो० २३०-२३२] तदनन्तरं बलिदानसमये गेयाः स्वराः मलहरिप्रत्यालीढमट्टयादयः आलये तेषां दिशश्च प्रतिपाद्यन्ते। [श्लो० २३३-२४२ पू०] बलिदानानन्तरमाचार्यः पादं प्रक्षाल्य महापीठे बलिं दत्त्वा आलयप्रदक्षिणं कृत्वा मण्डपे बलिबेरस्य नीराजनं दत्वान्नलिङ्गं जले क्षिप्त्वा मूलदेवस्य पुष्पाञ्जलित्रयं दत्त्वा सन्ध्याशेषं समापयति। [श्लो० २४२ उ०-२४५ पू०]

सन्ध्यावसाने उत्सवबेरमलङ्कृत्य रथे वा शिबिकायां वा खेटे वारोप्य नगरभ्रमणं करोति। [श्लो० २४५ उ०-२४६ पू०] नगरे वीथीसम्मार्जनं कृत्वा प्रतिगृहद्वारं कदलीक्रमुकादिफलानि पूर्णकुम्भाः चित्रवस्त्रगन्धदर्पणकेशशोधकृष्णगन्धाञ्जनसहिताः सुगन्धपुष्पोशीरताम्बूलसहिताश्च स्थाप्यन्ते। [श्लो० २४६ उ०-२४९] नगरयात्रायां नानावाद्यनानाध्वजछत्रचामरसहिताः स्त्रियः दास्यश्च बेरमनुगच्छन्ति। [श्लो० २५०-२५१] बेरस्य पश्चान्महाशैवाः तदन्ते भूसुराः तदन्ते सर्वालङ्कृतरुद्रगणिकाः तदन्ते वाहनादीनि तदन्ते वाद्यघोषकाः सर्ववाद्यघोषसहितमनुसरन्ति। [श्लो० २५२-२५३]

परिवेषक्रमे आस्थानमण्डपे उत्सवबेरमलङ्कृत्य सिंहासने स्थापयित्वा पाद्यं च करशुद्ध्यर्थं गण्डूषार्थं च जलं च दत्त्वा शुद्धीकृतभूमौ नारिकेलफलादिकं ताम्बूलं च देवाय निवेद्य सर्वप्राणिहितार्थं नीराजनं कृत्वा देवस्य पुरतः शुद्धनृत्तं कारयित्वा स्वलङ्कृतशिवदासीभिः नानादेशकथावाक्यमहाजालविनोदवाक्यधर्मयुद्धादिसहितं वीणावेण्वादिवाद्यघोषपुरःसरं बहुरूपं

In Public domain. Digitization Muthulakshmi Research Academy

दर्शयति। [श्लो० २५४-२६०] आचार्यः दक्षिणभागे नृपतिर्वामभागे अन्ये च शिष्यभृत्याः तत्पश्चात् गायकवंशकास्तु सव्यभागे नर्त्तकमर्दकाश्च वामभागे रुद्रगणिकाः पार्श्वद्वयोश्चोपविष्टाः स्युः। [श्लो० २६१-२६३] बहुरूपप्रदर्शनानन्तरमाचार्यः गन्धमाल्यावरोहान् सर्वान् स्नानवेद्युपरि न्यस्य उत्सवेश्वरस्य स्नपनं कृत्वा मुद्गान्नं निवेद्य स्वस्तिसूक्तादिमङ्गलघोषैः शङ्खघोषैश्च सह देवं धाम्नि प्रवेश्याग्रे वोत्तरे वा पिष्टचूर्णैरलङ्कृतशुद्धदेशे देवं दिनवेरसहितं मध्ये विन्यस्य पूर्वदिवसेषु सञ्चितपाद्यादिसर्वद्रव्याण्यधिवासनार्थं देवस्याग्रे स्थापयति। [श्लो० २६१-२६९ पू०] तत्र पाद्याचमनीयार्घ्यस्नानद्रव्याण्यैन्द्रदेशे वस्त्रविलेपनद्रव्यभूषणानि दक्षिणे धूपाद्यारात्रिकं द्रव्यं पश्चिमे दिश्युत्तरे मुखवासमाग्नेय्यां दिशि पानीयं नैर्ऋते जीरकोपदंशादियुतं नैवेद्यार्थतण्डुलं वायव्ये छत्रचामरादिकमीशाने तैलदीपदण्डसहितछिन्नवस्त्रं चान्यद्रव्याणि देवस्य पुरतःस्थापयित्वा पुण्याहवाचनानन्तरं प्रणवेन समभ्यर्च्यामृतीकरणं करोति। [श्लो० २६९ उ०-२७५ पू०] भवान्यालये शयनोत्सवार्थमुत्सवेशमलङ्कृत्य शिविकादावारोप्य भवान्यालयेऽलङ्कृतशयनालये मृदुपुष्पैराकीर्णे शयने वस्त्रमास्तीर्य प्राङ्मुखं देवं तद्दक्षिणे गौरीं च स्थापयति। [श्लो० २७५ उ०-२७८]

सप्तमातृगणरोहिणीगणगुह्यमातृगणब्रह्ममातृगणविष्णुमातॄश्च पूर्वोत्तरादिदिक्षु रतिसहितमदनमाग्नेय्यां वसन्तं नैर्ऋते चन्द्रं वायव्यां चावाह्य पादुकादीनि प्रदक्षिणक्रमेण वस्त्रोपरि न्यस्य तत्तन्मन्त्रैरभ्यर्च्य धूपदीपनैवेद्यादिकं दत्वा परितो दशास्त्रं सम्पूज्य कवचेन संरक्ष्य वस्त्रेण पिधाय शयनालयस्य कवाटबन्धनं करोति। [श्लो० २७९-२८३] रात्र्यन्ते तु गुरुः स्नात्वा कृतनित्याह्निकः शयनालयोद्घाटनं कृत्वा प्रच्छन्नपटमावर्ज्य देवं "उत्तिष्ठ प्रभो स्नानकर्मार्थं लोकाभिवृद्धये च" इति प्रार्थ्य शक्तिसमन्वितं देवमादाय शिविकादौ स्थापयित्वा ग्रामप्रदक्षिणमाचरति। [श्लो० २८४-२८८] तत आस्थानमण्डपे स्थापयित्वा पूजापर्युषितं विसृज्य गन्धतैलपिष्टामलकचन्दनादिभिः पञ्चगव्यामृतैः फलरसैः स्नपनैः कोष्ठकस्तूरीकुङ्कुमैश्च संस्नाप्य कौपीनादिकं विसृज्य यागमण्डपे वेद्यूर्ध्वे स्थापयति। [श्लो० २८४-२९२] पाद्यादिकं दत्वा तद्दिनोचितनववस्त्रैरलङ्कृत्य हविर्निवेदयति। [श्लो० २९३-२९४ पू०] शिवाग्नियजनं दिनाधिपतिबीजमन्त्रेण कृत्वा यागहोमादिकं निर्वर्त्य धूपादिकं दत्वा ऐशान्ये वेदिकोपरि आयुधानि दिनदेवादिबीजसहितेन स्वनाममन्त्रेणाभ्यर्च्य वेदादिस्तोत्रगीतनृत्तवाद्यादिकं च समर्प्य विप्राशीर्वचनैः सह भस्मना देवस्य तिलकं कृत्वा दास्यमानबलिं देवेशस्य विज्ञापयति। [श्लो० २९४ उ०-२९८] ततोऽस्त्रराजान्नलिङ्गसहितबलिबेरं छत्रचामरनानादीपसहितं सघण्टारवं प्रदक्षिणक्रममानीय बलिं दत्वा तदन्ते देवेशं प्रभारत्नसिंहासनाद्यन्यतरस्मिन्नलङ्कृत्यारोप्योत्सवं कृत्वा धूपदीपपाद्यादिकं फलभक्ष्यादिकं च दत्वा सौख्यनृत्तावलोकनं कारयति। [श्लो० २९९-३०२]

यात्राद्युत्सवे विजयक्रमे यात्रार्थस्नपनान्ते नैवेद्यान्तं मूलबेरमभ्यर्च्य प्रासादस्योत्तरे ऐन्द्रे पश्चिमे आस्थानमण्डपे वा सकलेशमलङ्कृत्य नैमित्तिकार्चनं कृत्वा सायाह्ने विनोदालोकनार्थं ग्रामप्रदक्षिणं निर्वर्त्य परिवेषक्रमं करोति। [श्लो० ३०३-३०६] विनोदालोकनं अजसूकरयुद्धमल्लयुद्धैणशार्दूलयुद्धाजशार्दूलयुद्धसमकुक्कुटयुद्धश्वानसूकरयुद्धश्येनशशपुञ्जयुद्धव्याघ्रश्वाकुलयुद्धगजमान

In Public domain. Digitization Muthulakshmi Research Academy

वसङ्घयुद्धादिष्वन्यतममथवा सर्वान् वान्याननेकान् वा प्रदर्शयति। [श्लो० ३०७-३०९] सभामण्डपे देवमानीय सायरक्षाविधानतः धूपदीपादिकं दत्वा पुनः स्नपनाद्यैः संस्नाप्य हविर्निवेदयति। [श्लो० ३१०-३११] मूलबेरस्य धूपादिकं दत्वा सकलेश्वरमलङ्कृत्य शिबिकादावारोप्य प्रदक्षिणीकृत्यास्थानमण्डपे सिंहासनोपरि स्थापयित्वा धूपाद्युपचारैः सम्पूज्य नृत्तावलोकनं कारयति। [श्लो० ३१२-३१५ पू०] स्नपनैः संस्नाप्य नैवेद्यं दत्वा सन्ध्याशेषं निर्वर्त्यान्ते गन्धमाल्यैरलङ्कृत्य भवान्यालयमानयति। [श्लो० ३१५ उ०-३१६] वृद्धिदक्रमेऽङ्कुरार्पणादिहोमपर्यन्तं सर्वं पूर्वोक्तेनैव विधिना निर्वर्त्यापरस्मिन् दिने होमान्ते बलिदानं कृत्वा तदन्ते उत्सवं करोति। [श्लो० ३१७-३१८ पू०]

इतः परं उत्सवसप्तदशदिनेष्वेकैकदिनस्य देवता पाद्यादितदुपचारद्रव्याणि च क्रमेण दीयन्ते। एकैकदिनं रात्रशब्देन निर्दिश्यते यथा प्रथमं विघ्नरात्रं द्वितीयं भूतरात्रमित्यादि। तत्र दिनदेवताः — विघ्नेशभूतर्षिचन्द्रगन्धर्वेन्द्रगुहविष्ण्वग्निनागरुद्रमातृकूश्माण्डपितृभानुराक्षसशिवाः सप्तदश। [श्लो० ३१९-३२३] तथैव पाद्यार्घ्याचमनीयाद्युपचाराः अपि प्रत्येकं सप्तदश प्रतिपाद्यन्ते। तत्र पाद्यं [श्लो० ३२४-३२६ पू०], आचमनीयं [श्लो० ३२६ उ०-३२९ पू०], अर्घ्यं [श्लो० ३२९ उ० - ३३१], स्नानोदकं [श्लो० ३२-३३३], वर्णानि [श्लो० ३३४-३३५], आभरणानि [श्लो० ३३६-३३८ पू०], गन्धाः [श्लो० ३३८ उ०-३४०], पुष्पाणि [श्लो० ३४१ – ३४३ पू०], धूपाः चत्वार एव [श्लो० ३४३ उ०-३४४ पू०], दीपाः [श्लो० ३४४ उ०-३४६], अन्नानि [श्लो० ३४७-३४९ पू०], पानीयानि [श्लो० ३४९ उ०-३५२] होमद्रव्याणि [श्लो० ३५३-३५६ पू०] बलिद्रव्याणि [श्लो० ३५६ उ०-३५८] रागाः [श्लो० ३५९-३६२ पू०] तालानि [श्लो० ३६२ उ०-३६५ पू०] शिवस्य वेराणि पञ्चविंशतिमूर्तिषु केचन [श्लो० ३६५ उ०-३६८ पू०] वाहनानि [श्लो० ३६८ उ०-३७०] एतेषूपचारेषु शैवादिचान्द्र-पर्यन्तं नवधा विभक्तेषूत्सवेषु पूर्वं त्यक्त्वा परं ग्राह्यम्। [श्लो० ३७१] उत्सवे मुख्यतया क्रियमाणक्रियासु धामप्रदक्षिणादारभ्य धामनिवेशनान्तं द्वादश क्रियाः पठ्यन्ते। [श्लो० ३७२-३७४ पू०] षष्ठेऽहनि शाम्भवोत्सवः अष्टमेऽहनि मृगयात्रा च करणीयौ। [श्लो० ३७५ उ०-३७६] तीर्थोत्सवार्थमङ्कुरार्पणाद्यारभ्य ध्वजावरोहणमौनयागपर्यन्तं विजयक्रमे क्रियाः प्रतिपाद्यन्ते। [श्लो० ३७७-३८०] वृद्धिदक्रमे तु जलक्रीडावसाने पूर्णाहुतिं हुत्वा यागकुम्भाभिषेकानन्तरं ध्वजावरोहणं कृत्वा चण्डयागानन्तरं स्नपनेन स्नापयित्वा प्रभूतहविर्निवेदयति। [श्लो० ३८१-३८२] ब्राह्मिकक्रमे पुनः विघ्नेशपूजातः आरभ्य परिवेषजलक्रीडास्नपनभूर्यन्ननिवेदनान्ताः चतुर्दश क्रियाः प्रतिपाद्यन्ते। [श्लो० ३८३-३८७] शैवगौणभौतिकानां कन्यसत्रयाणामुत्सवभेदानामवश्यकर्तव्यतया अङ्कुरार्पणभेरीयागदेवताह्वानास्त्रयागबलिदानतीर्थोत्सवचण्डेश्व-रार्चनस्नपनभूर्यन्ननिवेदनाः क्रियाः ततोऽन्याः वर्ज्याः इति प्रतिपाद्यते। [श्लो० ३८८-३८९] उत्सवारम्भे वा मध्येऽथवान्ते वा भक्तानामुत्सवः कार्यः। इयता प्रबन्धेन प्रतिपादितक्रमेण य उत्सवं करोति स पुण्यां गतिमवाप्नोतीति च पटलान्ते सूच्यते। [श्लो० ३९०-३९१ पू०]

In Public domain. Digitization Muthulakshmi Research Academy

List of sources utilised for this volume

The following paper transcripts (T) belonging to the collection of the French Institute, Pondicherry (IFP) and one paper manuscript from that of the Thiruvavaduthurai Adeenam have been utilised for the edition of this volume:

- अ T. 191 This is the manuscript selected as the base for this volume. It is a copy of the manuscript with No. R. 14448 belonging to the Government Oriental Manuscripts Library (GOML), Chennai.
- ऊ T. 38 This was copied from a paper manuscript written in Devanagari script belonging to J. Visvanatha Sivacharya of Melamangalam, Madurai district.
- ऋ T. 97 Copied from a manuscript belonging to the GOML, Chennai with No. R. 16786. Apart from the Sūkṣmāgama this transcript also contains the Sahasraṭantra and the Vātulamahātantra.
- औ T. 348 Copied from a manuscript belonging to Ayyamani Sivacharya of Tiruvadanai. The transcript also contains a few chapters of the Vātulāgama, Rauravāgama, Kāmikāgama, Aṃśumattantra, Bhīmasaṃhitā, a part of the Kriyākramadyotikā, etc.
- अं T. 353 Copied from a manuscript belonging to Ayyamani Sivacharya of Tiruvadanai. It also contains the brief procedure for the performance of temple festival, of the divine marriage ceremony in the Śiva temple, of the installation of the image of Nāga and of worship of Śiva.
- छ T. 967 Copied from a manuscript of the French Institute with No. RE. 39663.
- झ T. 1016 Copied form a manuscript of the French Institute with No. RE. 10780.
- ति This is a paper manuscript written in Grantha script belonging to the manuscript collections of the Thiruvavaduthurai Adeenam, Thiruvavaduthurai. Only the Utsavavidhipaṭala of this manuscript was utilised for this volume as it does not have other chapṭers contained in this volume.

In Public domain. Digitization Muthulakshmi Research Academy

॥ सूक्ष्मागमः ॥

[1]प्रथमः पटलः ॥

[[2]पुण्याहविधिः]

[3]अथ वक्ष्ये विशेषेण पुण्याहं तु [4]विधानतः।

[पुण्याहशब्दनिर्वचनम्]

[5]पुकारः [6]पापनाशः स्यात् [7]ण्यकारो [8]देहशुद्धिदः ॥ १ ॥
[9]हकारः [10]स्थानशुद्धिः स्यात्पुण्याहं तु विधीयते।

[पुण्याहकर्मनिमित्तं स्थानं च]

[19] रात्र्यन्ते] छ; रात्रान्ते-अ; रात्र्यन्तेवं-ऊ; ... न्त-ऋ; रात्रियन्ते-औ, अं; रात्रिन्ते-झ.

[20] पञ्चशब्दं हि] अ, ऋ, औ, अं, छ; वं शब्दं-ऊ; पञ्च ... हि-झ.

[21] कुर्यात्प्राणितमोपहम्] अ, ऊ, ऋ; कुर्वाणि तमोपहा-औ, अं; कुर्यात्प्राण०-छ; कुर्यात्प्रोणितमो वहं-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]स्वकालनियमः प्रोक्तः पाद्यादीनां विधिं शृणु॥ २७॥

[पाद्यद्रव्याणि]

[2]सिद्धार्थं चन्दनोशीरं कुङ्कुमं [3]भस्ममिश्रितम्।
[4]पाद्यमुत्तममित्युक्तमुशीरं चन्दनं तथा॥ २८॥
दूर्वा सिद्धार्थकं [5]चापः [6]पाद्यं मध्यममुच्यते।
[7]चन्दनोशीरसंमिश्रमम्भः कन्यसपाद्यकम्॥ २९॥

[द्रव्याणां प्रमाणम्]

[8]द्रव्याणां च प्रमाणेन [9]निष्कञ्चोत्तममुच्यते।
[10]तस्यार्धं मध्यमं [11]प्रोक्तं तदर्धं कन्यसं भवेत्॥ ३०॥

[आचमनद्रव्यविधिः]

[12]पाद्यद्रव्यमिदं प्रोक्तं [13]त्रुटितिम्बुलवङ्गकम्।
[14]उशीरं जातिकर्पूरं [15]मुरमम्भोविमिश्रितम्॥ ३१॥
[16]श्रेष्ठमाचमनं प्रोक्तं [17]एलं जातिलवङ्गकम्।
[18]मुरं कर्पूरतोयेन [19]युक्तं [20]मध्यममाचमम्॥ ३२॥

---

1 स्वकालनियमः प्रोक्तः] ऋ, औ; ०नियमं प्रोक्तं-अ, ऊ, अं, छ, झ.

2 सिद्धार्थं चन्दनोशीरं] अ, ऋ, औ, अं; विधाय०-ऊ; ०देशो क्षीरं-छ; सिद्धार्थ चन्दनोशिरं-झ.

3 भस्ममिश्रितम्] अ, ऊ, ऋ, औ, अं; ०माश्रितम्-छ; ०मिश्रकम्-झ.

4 पाद्यमुत्तममित्युक्तमुशीरं] अ, ऊ, ऋ, औ, अं, छ; ०मुशिरं-झ.

5 चापः] अ; चापं-ऊ, ऋ, औ, अं, छ, झ.

6 पाद्यं मध्यममुच्यते] अ, ऊ, ऋ, औ; पाद्य०-अं, छ, झ.

7 चन्दनोशीरसंमिश्रमम्भः] अ, ऋ; ०श्रमभः-ऊ; ०मशीरं युक्तं मभू-औ; ०मशीरं युक्तमं भं-अं; ०सम्युक्तमम्भः-छ; ०शिर-संयुक्तं मंभः-झ.

8 द्रव्याणां च] अ, ऊ, ऋ, छ, झ; द्रव्याण्यं च-औ, अं.

9 निष्कञ्चोत्तममुच्यते] ऊ, ऋ, औ, अं, छ, झ; निष्कलञ्चो०- अ.

10 तस्यार्धं मध्यमं] अ, औ, अं, झ; तथार्धमधमं-ऊ, तस्यार्धमधमं-ऋ, तस्यार्ध०-छ.

11 प्रोक्तं] अ, ऊ, ऋ, औ, छ, झ; प्रोक्त-अं.

12 पाद्यद्रव्यमिदं] अ, ऊ, ऋ, औ, अं, छ; ०मिति-झ.

13 त्रुटितिम्बु०] ऊ; तुटितिम्बूलवङ्गकम्-अ; त्रुटितिम्बु०- ऊ; तुटितांबू०-ऋ, औ, अं; ... ताम्बू०-छ; तुटिति-बुलबुङ्गकम्-झ.

14 उशीरं] अ, ऊ, अं, छ; उशीर ... रं-ऋ; ऊशिरं-औ, उशिरं-झ.

15 मुरमम्भोविमिश्रितम्] अ, ऊ; उरमम्भो०-ऋ; मुरं मभ्यो०-औ, अं; मुरमांसवि०-छ; मुरमम्बुविमिश्रतम्-झ.

16 श्रेष्ठमाचमनं] ऊ, ऋ, छ, झ; श्रेषु०-अ; श्रेष०-औ; श्रेश०-अं.

17 एलं] ऊ, ऋ, औ, अं, झ; जलं-अ; मेलं-छ.

18 मुरं कर्पूरतोयेन] अ, ऊ, ऋ; मुरकर्पूर०-औ, अं, छ, झ.

19 युक्तं] अ, ऊ, ऋ, औ, अं, युक्-छ; 'झ' मातृकायां 'युक्तं' इति नास्ति।

20 मध्यममाचमम्] अ, ऊ; ०चकम्-ऋ; ०माचरेत्-औ, अं; ०नीयकम्-छ, झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]भस्ममेलं लवङ्गञ्च [2]कन्यसाचमनं [3]स्मृतम्।
[4]एषां द्रव्यप्रमाणं तु पूर्ववत्समुदीरितम्॥ ३३॥

[अर्घ्यद्रव्याणि]

[5]आपः [6]क्षीरकुशाग्राणि तण्डुलैरक्षतैर्यवैः।
[7]सिद्धार्थैश्च तिलैर्युक्तमर्घ्यमुत्तममुच्यते॥ ३४॥
[8]सर्षपैर्यवशाल्यद्भिः तण्डुलैर्मध्यमार्घ्यकम्।
[9]तण्डुलैर्यवशाल्यद्भिः [10]अर्घ्यं कन्यसमुच्यते॥ ३५॥
[11]एतद्द्रव्यप्रमाणं तु [12]पूर्वोक्तविधिवद्ग्रहेत्।

[उत्तमादिस्नानद्रव्याणि]

[13]स्नानं भारत्रयं [14]विद्धि उत्तमं तु प्रशस्यते॥ ३६॥
[15]तस्यार्धं मध्यमं प्रोक्तं [16]तदर्धमधमं स्मृतम्।
[17]एलालवङ्गकर्पूरं [18]फलपत्रघनैर्युतम्॥ ३७॥
[19]चन्दनामोदपुष्पञ्च स्नानद्रव्यमिति स्मृतम्।

---

[1] भस्ममेलं] अ, ऊ, ऋ, औ, अं, इ; भागमेकं-छ.
[2] कन्यसाचमनं] अ, ऊ, ऋ, छ, इ; कन्यासा०-औ, अं.
[3] स्मृतम्] अ, ऋ, औ, अं, छ, इ; मतम्-ऊ.
[4] एषां द्रव्यप्रमाणं तु] अ, ऊ, ऋ, इ; एषा द्रव्य०-छ; एतद्द्रव्यप्रकारं तु-औ, अं.
[5] आपः] अ, ऋ, औ; आप-ऊ, छ, अं; अप-इ.
[6] क्षीरकुशाग्राणि] अ, ऊ, ऋ, छ, इ; क्षीरं०-औ, अं.
[7] सिद्धार्थैश्च] अ, ऊ, ऋ, अं, छ; ०र्थैश्छ-औ; सिद्धार्थै च-इ.
[8] सर्षपैर्यवशाल्यद्भिः] अ, ऋ, औ, अं; सर्षपं यव०-ऊ; सर्षपैः स्थाप शा०-छ; सर्षपैवाप०-इ.
[9] तण्डुलैर्यवशाल्यद्भिः] अ, ऋ, छ, इ; तण्डुलैःशाल्यद्भिः-ऊ; ०शाल्यैश्च-औ; ०लैयवशाल्याश्च-अं.
[10] अर्घ्यं कन्यसमुच्यते] अ, ऊ, ऋ, छ, इ; तिलैः०-औ; तिलै०-अं.
[11] एतद्द्रव्यप्रमाणं तु] अ, ऊ, इ; एतद्द्रव्य ... ... -ऋ; ०प्रकारं तु-औ, अं; हुतद्रव्य०-छ.
[12] पूर्वोक्तविधिवद्ग्रहेत्] अ, ऊ, औ, छ, इ; ०वद्गृहेत्-ऋ, अं.
[13] स्नानं भारत्रयं] अ, ऊ, ऋ छ, इ; स्थानं रत्नं प्रस्थं-अं; 'औ' 'मातृकायां स्नानं भारत्रयं विद्धि' इत्यस्य स्थाने 'स्थानं..त्र..प्र..व्धि' इति दृश्यते।
[14] विद्धि] अ, ऋ, अं, छ; षड्वि-ऊ; विधिः- इ.
[15] तस्यार्धं मध्यमं] अ, ऊ, औ, अं, छ; तस्यार्घ्यं०-ऋ; तस्यार्थमध्यं-इ.
[16] तदर्धमधमं] अ, ऊ, ऋ, औ, अं; तस्यार्धमध्यमं-छ; तदर्थं मध्यमं-इ.
[17] एलालवङ्गकर्पूरं] अ, ऋ, औ, छ; ०कर्पूर-ऊ; ०लवङ्क०-अं; 'इ' मातृकायां '३७' तम श्लोको न दृश्यते।
[18] फलपत्रघनैर्युतम्] ऊ, ऋ; ०घनै०-अ; पिप्पलेन घनै०-औ; पिप्पलैनपनै०-अं; फलकयचैनै०-छ.
[19] चन्दनामोदपुष्पञ्च] अ, ऋ; चन्दनं ०-ऊ, छ; चन्दनमो०-औ, अं; 'छ' मातृकायां 'पुष्पं च' इत्यस्य स्थाने 'पुष्पं' इत्येव दृश्यते।

In Public domain. Digitization Muthulakshmi Research Academy

[स्नानद्रव्याभावे स्नानपरिकल्पनविधिः]

[1]पाद्यस्नानादिकैर्द्रव्यैर्हीने [2]गन्धं कुशैस्सह॥ ३८॥
जलेनैव [3]समायुक्तं [4]द्रव्यभागे प्रकल्पयेत्।

[श्रेष्ठगन्धम्]

खड्गपत्रञ्च कर्पूरं कुंकुमञ्च फलत्रयम्॥ ३९॥
[5]चन्दनोशीरलोहैश्च [6]श्रेष्ठं गन्धमिति स्मृतम्।

[मध्यमगन्धम्]

कर्पूरं चन्दनं चैव फलत्रयमुशीरकम्॥ ४०॥
[7]खड्गं [8]घनसमायुक्तं [9]गन्धं मध्यममुच्यते।

[कन्यसगन्धम्]

[10]घनं हिमञ्च कर्पूरं [11]गन्धं कन्यसमुच्यते॥ ४१॥
[12]चन्दनं च पलं श्रेष्ठं तस्यार्धं मध्यमं भवेत्।
[13]तदर्धमधमं ज्ञेयं [14]द्रव्यं पूर्वोक्तसंख्यया॥ ४२॥
[15]गन्धद्रव्यैर्विशेषेण [16]प्रत्येकं [17]निष्कमात्रतः।

---

१ पाद्यस्नानादिकैर्द्रव्यैर्हीने] सं० पा०; पाद्यं स्नानादिकैर्द्रव्यैर्हीनैः-अ; पाद्यं ०हीनं-ऊ; ०हीनैः-ऋ; ०हिम-औ, अं; ०हीनै-छ; पाद्यास्नानान्तिर्द्र०-झ.

२ गन्धं कुशैस्सह] अ, ऋ, औ, अं; गन्ध०-ऊ; गुह्यं०-छ; गन्धकुशेः०-झ.

३ समायुक्तं] अ, ऊ, ऋ, छ; ०युक्ता-औ; ०युक्त-अं; असमा०-झ.

४ द्रव्यभागे] ऊ; द्रव्याभावे-अ, ऋ, औ, अं, झ; ०भावे-छ.

५ चन्दनोशीरलोहैश्च] अ, ऊ, औ, अं, झ; चन्दलो०-ऋ, ०शीरभोगैश्च-छ.

६ श्रेष्ठं गन्धमिति स्मृतम्] अ, ऊ, झ; श्रेष्ठ०-ऋ, औ, अं; 'छ' मातृकायां श्लो० ३९. उत्तरार्धं ४०. इदमर्धद्वयञ्च पुनर्लिखितमिव दृश्यते। तत्र पाठभेदोऽपि दृश्यते। चन्दन्शीरलोहैश्च श्रेष्ठगन्धमिति स्मृतम्। कर्पूरचन्दनं चैव फलद्वय-मुशीरकम्। 'झ' मातृकायां '३९' उत्तरार्धं च पुनर्लिखितम्।

७ खड्गं] अ, ऊ, ऋ, औ, अं, छ; खड्ग-झ.

८ घनसमायुक्तं] ऊ, ऋ; धन०-अ; पनस०-औ, अं; वेन्य०-छ; व्यय०-झ.

९ गन्धं] अ, ऊ, ऋ, औ, झ; गन्ध-अं, छ.

१० घनं हिमं च कर्पूरं] ऊ, ऋ; धनं०-अ; हिमजलं ०-औ, अं धनं हिमं०-छ; 'झ' मातृकायां इदमर्धं न दृश्यते।

११ गन्धं कन्यसमुच्यते] ऊ, औ, अं; ... कन्यस०-अ; 'ऋ' मातृकायां 'गन्धं कन्यसमुच्यते' इति न दृश्यते।

१२ चन्दनं च पलं] अ, ऋ, औ, अं, छ, झ चन्दनं फलं-ऊ.

१३ तदर्धमधमं] अ, ऊ, ऋ, औ, छ; तदधं मधमं-अं; तदर्थमथमं-झ.

१४ द्रव्यं] अ, ऋ, औ, अं, छ, झ; द्रव्य-ऊ.

१५ गन्धद्रव्यैर्विशेषेण] अ, ऊ, ऋ, औ, छ; गन्धद्रव्यै वि०-अं; गन्धद्रवै०-झ.

१६ प्रत्येकं] अ, ऋ, औ, छ, झ; पूर्वे-ऊ; प्रत्येक-अं.

१७ निष्कमात्रतः] छ, झ; निष्कमं श्र्कं-अ; ०त्रकम्-ऊ, ऋ; पुष्प०-औ; पुष्पमात्रकम्-अं.

In Public domain. Digitization Muthulakshmi Research Academy

गन्धद्रव्यमिति प्रोक्तं [१]पुष्पाणां लक्षणं शृणु ॥ ४३ ॥

[पुष्पलक्षणम्]

[२]सत्त्वराजसवर्णानि [३]तामसानि तथैव च।
[४]सितान्यरुणकृष्णानि [५]मिश्रकाणि चतुर्विधम् ॥ ४४ ॥

[सात्त्विकपुष्पाणि]

[६]श्रियावर्तञ्च [७]मन्दारं [८]नन्द्यावर्तञ्च [९]मालती।
[१०]श्वेतार्कं वकुलं चैव [११]पुन्नागं [१२]शङ्खपुष्पकम् ॥ ४५ ॥
[१३]कुरवं [१४]मल्लिका चैव [१५]द्विकर्णी बहुकर्णिका।
[१६]द्रोणञ्च श्वेतलोध्रञ्च [१७]जाती च [१८]शतपत्रिका ॥ ४६ ॥
लक्ष्मी च [१९]बेरपत्रञ्च [२०]सात्त्विकानि विनिर्दिशेत्।

[राजसपुष्पाणि]

रक्तोत्फलं रक्तपद्मं [२१]पलाशं पाटली तथा ॥ ४७ ॥

---

१ पुष्पाणां लक्षणं शृणु] अ, ऊ, ऋ, औ, अं, झ; पुष्परागं च लक्षणं-छ.
२ सत्त्वराजसवर्णानि] अ, ऋ; ०सर्वाणि-ऊ; सत्वारत्वस०-औ; सत्वारत्वसवस्त्राणि-अं; सर्वराज०-छ; ०सर्वर्णानि-झ.
३ तामसानि] ऊ, झ; सात्विकानि-अ, ऋ, औ, अं, छ.
४ सितान्यरुणकृष्णानि] ऊ; सिता ... -अ, ऋ; सीता चा०-औ, अं; सितचारुण०-छ; सितार्वारुण०-झ.
५ मिश्रकाणि] झ; मिश्रकानि-अ, ऊ, ऋ, औ, अं, छ.
६ श्रियावर्तञ्च] अ, ऊ, ऋ; श्रितावर्तं च-औ; श्रितावर्तिं च-अं; सितावर्तं-छ; श्रियावृत्तं-झ.
७ मन्दारं] अ, ऊ, ऋ, छ, झ; मन्दार०-औ; मन्दारा-अं.
८ नन्द्यावर्तञ्च] ऊ, औ, अं, छ; नन्द्यावतञ्च-अ; ... ञ्च-ऋ; ०वृतञ्च-झ.
९ मालती] अ, ऊ, ऋ, छ; मल्लिका-औ, अं; मालति-झ.
१० श्वेतार्कं वकुलं चैव] ऊ, औ, अं; श्वेतार्कवकुलं-अ, ऋ, छ; श्वेताद्वकुलै शैव-झ.
११ पुन्नागं] अ, ऊ, ऋ, औ, अं, झ; पुनर्प-छ.
१२ शङ्खपुष्पकम्] अ, ऋ, औ, अं, छ, झ; ०पुष्पिका-ऊ.
१३ कुरवं] अ, ऋ, औ, झ; कुरव-अं; करवं-छ; 'ऊ' मातृकायामिदमर्धं न दृश्यते।
१४ मल्लिका चैव] अ, ऊ, ऋ, औ; ०शैवा-अं; मण्डकं०-छ; मल्लिकां-झ.
१५ द्विकर्णी वहुकर्णिका] छ; द्विकर्णी ... ... -अ; द्विकार्णी ... ऋ; व्रह्म द्विवहु०-औ; वृहद्वि ०-अं; द्विकर्ण०-झ.
१६ द्रोणञ्च] अ, ऊ, औ, अं, झ; ... -ऋ; मोणं च-छ.
१७ जाती च] अ, ऊ, ऋ, छ; जातिश्च-औ; जाति च-अं, झ.
१८ शतपत्रिका] अ, ऋ, औ, अं, छ, झ; ०पत्रकम्-ऊ.
१९ वेरपत्रञ्च] अ; ०पत्री च-ऊ; वरपत्रं च-औ, अं; स्थेवपत्रं च-छ; विल्वपत्रं च-झ.
२० सात्त्विकानि विनिर्दिशेत्] ऊ, औ, अं, झ; ०नीति निर्दिशेत्-अ; ० निर्दिशेत्-ऋ; ०कादि ०-छ.
२१ पलाशं पाटली तथा] अ, ऊ, ऋ, औ, अं, छ; ०पटलि-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]सिन्धू (दू?)रं [2]मौसली चैव [3]बृहती करवीरकम्।
[4]व्याघ्री च [5]रुद्रपर्णी च पट्टिका [6]वेजिका तथा॥४८॥
[7]रक्तमन्दारकुसुमं [8]एतानि राजसानि वै।

[तामसपुष्पाणि]

[9]आरग्वधं च [10]धूर्धूरं [11]कर्णिकारञ्च [12]चम्पकम्॥४९॥
[13]केतकी [14]गिरितं चैव [15]कौशिकं [16]कर्णिकारकम्।
अर्जुनं [17]नागपुष्पञ्च [18] सरलं तामसान्वितम्॥५०॥

[फलम्]

[19]सात्विकं मोक्षदं चैव राजसं पौष्टिकं तथा।

[पत्राणां फलम्]

[20]मिश्रकद्वयसिद्धिस्स्यात् [21]पत्रं पुत्रसमृद्धिदम्॥५१॥
मुनिपत्रद्वयञ्चैव [22]सहभद्री च [23]धातकी।

---

[1] सिन्धू (दू?)रं] औ, अं; धुर्धूरं-अ, ऊ; धूर्धूरं-ऋ; दुर्धूर-छ; धूद्धूरं-झ.
[2] मौसली] ऊ, ऋ, औ, अं, छ; मौसलौ-अ; मौसलि-झ.
[3] बृहती] अ, ऊ, औ, छ; ब्रह्मती-अं; बृहति-ऋ, झ.
[4] व्याघ्री च] अ, ऊ, छ; व्याघ्री ... -ऋ, झ; 'औ, अं' मातृकयोः आराग्वधं च व्याघ्री च-इत्येवं दृश्यते।
[5] रुद्रपर्णी च] अ, ऊ, छ; ... पर्णी च-ऋ; रुद्रपाणि च-औ, अं; ... पाणिच-झ.
[6] वेजिका] अ, ऋ, छ; वेदिका-ऊ; वैंजिका-झ; 'औ, अं'; मातृकयोः 'वेजिका तथा' इति नास्ति।
[7] रक्तमन्दारकुसुमं] अ, ऊ, ऋ, झ; रक्तन्दोरकुमन्दार-औ; रक्तं दारकु मन्दार०-अं; ०कुसुमा-छ.
[8] एतानि] अ, ऊ, ऋ, छ, झ; राजसानि वै-औ, अं.
[9] आरग्वधं च] अ, ऊ, ऋ, झ; आराग्वधं च-औ, अं; आराश्वधश्व-छ.
[10] धूर्धूरं] ऋ, छ, झ; धुर्धूरं-अ, औ; दूर्धूरं-ऊ; धूर्धूरः-अं.
[11] कर्णिकारञ्च] अ, ऊ, ऋ, औ, छ, झ; कर्निकारं-अं.
[12] चम्पकम्] अ, ऊ, ऋ, छ, झ; पद्मकं-औ; पम्पकं-अं.
[13] केतकी] अ, ऊ, औ, अं, छ; ... -ऋ; केतकि-झ.
[14] गिरितं] अ, औ, अं; गिरतं-ऊ; ... रितं-ऋ; रीतकं-छ; किरतं-झ.
[15] कौशिकं] अ, ऊ, ऋ, औ, अं, छ; कौशिका-झ.
[16] कर्णिकारकम्] अ, ऊ, ऋ, अं, छ; कणिकार०-औ; ०वरम्-झ.
[17] नागपुष्पञ्च] अ; पूग०-ऊ, ऋ, औ, अं, छ, झ.
[18] सरलं] ऊ, ऋ, औ, झ; स्तरलं-अ; सरलां-अं, सुरभं-छ.
[19] सात्विकं मोक्षदं चैव] औ, अं, छ, झ; स ... -अ; ०दं स्यात्-ऊ; स ... -ऋ.
[20] मिश्रकद्वयसिद्धिस्स्यात्] अ, ऋ, अं; मिश्रकं०-ऊ, औ; मिश्रकं द्वयसिद्धिं०-झ.
[21] पत्रं पुत्र समृद्धिदम्] अ, ऊ, ऋ, झ; पत्रमपूत्रसिद्धिदम्-औ; पत्रमपुत्रसिद्धिदम्-अं; पकं पुत्र०-छ.
[22] सहभद्री] अ, ऋ; ०पत्री-ऊ; ०पत्रा-औ; ०भद्रा-अं; ०भद्रि-झ.
[23] धातकी] अ, ऊ, ऋ, छ; धातुकि-औ; धातुकी-अं; थातकि-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]अपामार्गं शमी दूर्वा पञ्चबिल्वं [2]त्रिधा [3]तथा ॥ ५२ ॥
निर्गुण्डिका च [4]तुलसी [5]जम्बू चन्द्रप्रवर्तिका ।

[उदये देयानि पुष्पाणि पत्राणि च]

[6]कदलीकुसुमञ्चैव एकपत्रारविन्दकम् [7] ॥ ५३ ॥
[8]श्वेतपद्मं श्रियावर्तं [9]श्वेतार्कांषाढमेव च ।
[10]मालती [11]नन्दिकावर्तं पुन्नागमुदये ददेत् ॥ ५४ ॥

[मध्याह्ने देयानि]

[12]पङ्कजं करवीरञ्च [13]व्याघ्री [14]व्यासातकी तथा ।
[15]बृहती पाटली द्रोणं [16]मध्याह्ने तु प्रदापयेत् ॥ ५५ ॥

[प्रदोषे देयानि]

[17]मालती मल्लिका चैव चम्पकं [18]वैंजिका तथा ।
[19]दुर्धूरं [20]बहुकर्णीञ्च [21]दापयेत्तु प्रदोषके ॥ ५६ ॥

---

[1] अपामार्गं शमी दूर्वा] अ, ऊ; अपामार्गशमी-ऋ, औ, अं, ०र्गशमी पूर्वा-छ; अपमार्गशमी०-झ.
[2] त्रिधा] अ, ऋ, त्रिता-औ, अं, छ, झ; त्यथा-ऊ.
[3] तथा] अ, ऊ, ऋ, औ, अं, झ; मता-छ.
[4] तुलसी] अ, ऊ, ऋ, औ; ०सीं-छ; ०सि-अं, झ.
[5] जम्बू चन्द्रप्रवर्तिका] ऊ; जं ... पवर्तिका-अ; जं ... -ऋ; जम्बू च नृपपलिका-औ; जम्बुं नृपवर्तिका-अं; जम्बू च नृपवर्तिका च-छ, झ.
[6] कदलीकुसुमञ्चैव एकपत्रारविन्दकम्] अ, ऊ, औ, अं; ०कुङ्कुमं चैव एक०-ऋ, छ; कदलि०-झ.
[7] "भूपाली च लक्ष्मी च शता ... ञ्च हरिबेरकम्। पात्राण्येतानि सर्वाणि तत्पञ्चाङ्गैस्समर्चयेत् ॥"
अयं श्लोकः श्लो० '५३' 'पूर्वार्धानन्तरं' औ, अं, छ, झ मातृकासु अधिको दृश्यते। ऋतपाली च-छ; लक्ष्मि च-झ; शतादञ्च-अं; चन्दान्तं च-छ; दान्तं च-झ.
[8] श्वेतपद्मं] अ, ऋ, छ; ०पत्रं-ऊ; ०पद्म-औ, अं; ०पद्मा-झ.
[9] श्वेतार्कांषाढमेव च] अ, ऋ, झ; श्वेतार्क षोडशमेव च-ऊ; ०र्कांषाय०-अं; ०र्कांषाड०-औ, ०र्कांषाफ०-छ.
[10] मालती] अ, ऊ, ऋ, छ; मालादि-औ, अं; मालति-झ.
[11] नन्दिकावर्तं] अ, औ, अं; ०वर्त-ऊ; न ... -ऋ; नाभिकावर्त-छ; ०वर्तिं-झ.
[12] पङ्कजं करवीरञ्च] अ, ऊ, ऋ, औ, छ, झ; पङ्कगज अ-अं.
[13] व्याघ्री] अ, ऊ, ऋ, औ, अं, छ; व्याघ्रि-झ.
[14] व्यासातकी तथा] अ, ऋ, औ, अं; व्यासतकी०-ऊ; व्ययाधकीर्त्रिता-छ; व्याथातकि ०-झ.
[15] बृहती पाटली द्रोणं] अ, ऊ, ऋ; ०पालिकांद्रोणं-औ; ०पालिद्रोणं-अं; ब्रह्मदीपं बलीद्रोणं-छ; बृहति पाटलि द्रोणां-झ.
[16] मध्याह्ने] अ, ऊ, औ, अं, छ, झ; मध्यम-ऋ.
[17] मालती] अ, ऊ, ऋ, औ, छ; मालादि-अं; मालति-झ.
[18] वैंजिका] अ, ऊ, ऋ, औ, अं, झ; वेण्मिका-छ.
[19] दुर्धूरं] ऊ; घुर्घूरं-अ, ऋ, औ, छ; घूर्घूरं-अं; घुद्धूरं-झ.
[20] बहुकर्णीञ्च] अ; ०कर्णी च-ऊ, ऋ, औ, अं, छ; ०कर्णि च-झ.
[21] दापयेत्तु] अ, ऋ, औ, छ, झ; दद्यात्तु-ऊ; दापयेत्-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[अर्धयामे देयानि]

[१]जाती नीलोत्पलं चैव दान्तं पूगञ्च पुष्पकम्।
घनञ्च बिल्वपत्रं च [२]दापयेदर्धयामके॥५७॥

[शेषपुष्पाणि अन्यसन्ध्यासु देयानि]

[३]विहाय शेषपुष्पाणि [४]अन्यसन्ध्यासु दापयेत्।
[५]उक्तपत्राणि सर्वाणि सर्वसन्ध्यासु दापयेत्॥५८॥

[वर्ज्यानि पुष्पाणि]

[६]अतिपक्वमपक्वञ्च [७]एकाहोषितमेव च।
केशकीटोपविद्धञ्च [८]लूतासूत्रावृतानि च॥५९॥
स्वयं [९]पतितपुष्पाणि सञ्चितानि च [१०]वस्त्रके।
[११]अशुद्धभूतले [१२]प्राप्तं पुष्पं पत्रं [१३]विवर्जयेत्॥६०॥

[वर्जितपुष्पाणामपि स्वीकरणम्]

[१४]उत्सवादिषु यात्रायां रथाद्यलङ्कृतेन वा।
[१५]सकलानामलंकारे [१६]वर्ज्यपुष्पाणि [१७]विन्यसेत्॥६१॥

---

१ जाती नीलोत्पलं चैव] अ, ऋ, औ, छ; जाति०-ऊ, अं, झ.
२ दापयेदर्धयामके] अ, ऊ, औ, अं, छ, झ; ... यामके-ऋ.
३ विहाय] अ, ऊ, ऋ, औ, छ, झ; विभाय-अं.
४ अन्यसन्ध्यासु] अ, ऊ, औ, झ; ०न्ध्यान्तु-ऋ; ०बद्धातु-अं; ०सन्ध्या तु-छ.
५ उक्तपत्राणि] ऊ, ऋ, छ; उक्तपा (प)-अ, औ, अं; उत्तपात्राणि-झ.
६ अतिपक्वमपक्वञ्च] अ, ऊ, औ, अं, छ, झ; ... त्वं च-ऋ.
७ एकाहोषित] अ, ऊ, ऋ, औ, अं, छ; एकहोषित-झ.
८ लूतासूत्रावृतानि च] अ; ०वृतं तथा-ऊ; लूतसूत्र०-ऋ; लूतसूत्राहुतानि०-औ; मूलसूत्राहुतानि०-अं; क्षितसूतव्रतानि०-छ; लूतसूत्रव्रतानि ०-झ.
९ पतितपुष्पाणि] अ; ०पुष्पञ्च-ऊ, औ, अं, छ, झ; पति ... -ऋ.
१० वस्त्रके] झ; वर्जयेत्-अ, ऊ, ऋ, औ, अं, पत्रके-छ.
११ 'ऊ' मातृकायां इदमर्धं न दृश्यते।
१२ प्राप्तं पुष्पं पत्रं] अ, ऋ; प्राप्तपुष्पं-ऊ; प्राप्ते-औ, अं, छ, झ.
१३ विवर्जयेत्] अ, ऊ, ऋ, औ, अं, छ; विसर्जयेत्-छ.
१४ उत्सवादिषु यात्रायां रथाद्यालङ्कृतेन वा] अ, ऊ, ऋ; ०दिर्वधात्राधारेथा०-औ; ०दिर्वयात्राधारेथा०-अं; ०दिर्विधाताय रथाद्यालङ्कृते न च-छ; ०रथाद्यालङ्कृतेऽपि च-झ.
१५ सकलानामलङ्कारे] ऊ; ०कारं-अ, ऋ, औ, अं, छ, झ.
१६ वर्ज्यपुष्पाणि] अ, ऊ, ऋ, अं, छ, झ; पज्ज०-औ.
१७ विन्यसेत्] अ, ऋ, अं, छ, झ; सङ्ग्रहेत्-ऊ, औ.

In Public domain. Digitization Muthulakshmi Research Academy

पुष्पलक्षणमाख्यातं [1]धूपानां लक्षणं शृणु।

[धूपलक्षणम्]

चन्दनं [2]कुन्दुरुष्कञ्च निर्यासं [3]चापि गुग्गुलम्॥ ६२॥
[4]मेघं कर्पूरलोहञ्च [5]भागभागविहीनकम्।
[6]आहृत्य चूर्णयित्वा तु मधुना च [7]परिप्लुतम्॥ ६३॥
[8]शीतारि नाम धूपं च [9]शिवप्रीतिकरं भवेत्।

[उत्तम-मध्यम-अधमानि]

[10]निर्यासं चन्दनं चैव [11]लोहं कर्पूरसंयुतम्॥ ६४॥
उत्तमं धूपमित्युक्तं [12]मधुना च परिप्लुतम्।
[13]चन्दनोशीरलोहैश्च मधुना च परिप्लुतम्॥ ६५॥
मध्यमं धूपमेवोक्तं [14]गुग्गुलं घृतसंयुतम्।
[15]अधमं [16]धूपमाख्यातं दीपद्रव्यमथ शृणु॥ ६६॥

[दीपद्रव्याणां-वर्तिकादीनां च प्रमाणं फलं च]

[17]कपिलाया घृतं श्रेष्ठं [18]अजासर्पिस्तु मध्यमम्।

---

[1] धूपानां] अ, ऊ, औ, अं, छ, झ: 'ऋ' मातृकायां "धूपानां" इति पदं लूप्तम्।
[2] कुन्दुरुष्कञ्च च निर्यासं] ऋ; कन्दुरुष्कं च०-अ; कुन्दुरुष्कं निर्यासं-ऊ; ०च निर्यासके-औ, अं; कन्दं रुष्कं च०-छ; कुन्दरिष्कं च०-झ.
[3] चापि गुग्गुलम्] अ, झ; चैव गुग्गुलू-ऊ; चैव गुग्गुलूम् ऋ, छ; च गुललूम्-औ; ... ललूम्-अं.
[4] मेघं कर्पूरलोहञ्च] अ, ऊ, ऋ, औ, छ; एकं ०-अं; मेघ०-झ.
[5] भागभागविहीनकम्] अ, ऊ, छ; भागभागविहीन ... -ऋ; भागवाभाव०-औ; भागभाव०-अं; ०विहिनकम्-झ.
[6] आहृत्य चूर्णयित्वा तु] अ, छ, झ; आहत्य०-ऊ; ... र्णयित्वा तु-ऋ; मुहुत्या शृणु ... धित्वा तु-औ; मुहुत्या शृणुयित्वा तु-अं.
[7] परिप्लुतम्] अ, ऊ, ऋ, अं, छ, झ; पर ... औ.
[8] शीतारिनाम धूपं च] झ; श्रिया व्याघ्रादिना धूपं-अ; श्रिया व्याघ्राणो रूपं-ऊ; ०रिणा रूपं-ऋ; श्रीधव्या व्यारिणा धूप-औ, अं; शिय व्यारिना पं च-छ.
[9] शिवप्रीतिकरं] अ, ऊ, ऋ, छ, झ; ०करे-औ, अं.
[10] निर्यासं चन्दनं चैव] ऊ, औ, अं, छ, झ; निर्य ... व-अ; निर्य ... -ऋ.
[11] लोहं] अ, औ, अं, छ, झ; लोह-ऊ; ... ... -ऋ.
[12] मधुना] अ, ऊ, ऋ, अं, छ, झ; 'औ' मातृकायां 'मधुना' इति लूप्तम्।
[13] चन्दनोशीरलोहैश्च] ऋ, औ, अं, छ, झ; चन्दनोधीरलो०-अ; ०लोहं च-ऊ.
[14] गुग्गुलं] अ, ऊ; गुल्गुलूं-ऋ; गुल्गुलू-औ, अं; गुग्गुलूं-छ; गुल्गुलं-झ.
[15] अधमं] अ, ऊ, ऋ, छ, झ; 'औ, अं' मातृकयोः श्लो० ६५ उ०, ६६ पू० न दृश्यते।
[16] धूपमाख्यातं] अ, औ, अं, छ, झ; दीप०-ऊ; धूपम ... -ऋ.
[17] कपिलाया] अ, ऊ; कपिलायां-ऋ, झ; कपिलायं-छ.
[18] अजासर्पिस्तु] अ, ऋ, झ; अन्यस०-ऊ; अजासर्पि श्च-छ.

In Public domain. Digitization Muthulakshmi Research Academy

अधमं शुद्धतैलं स्यात् [1]पद्मकार्पासतूलिकाम्॥ ६७॥
अथवा [2]छिन्नवस्त्रेण [3]वर्तिकां कारयेद्बुधः।
[4]कर्पूरवर्तिकां [5]कुर्यात्संसिद्धमृगनाभिकम्॥ ६८॥

[दीपफलम्]

स्वर्णपात्रे [6]विनिक्षिप्य [7]दीपानारोप्य [8]देशिकः।
[9]दापयेत्परमेशानं सर्वसिद्धिकरं परम्॥ ६९॥

[दीपज्वालायाः प्रमाणम्]

[10]चतुस्त्रिद्व्यङ्गुलायामं [11]श्रेष्ठमध्याधमं स्मृतम्।
दीपज्वालाप्रमाणं तु कल्पयेत्तु [12]पृथक् पृथक्॥ ७०॥
[13]दीपप्रियो हि भगवान् देवदेवः [14]सदाशिवः।
[15]अर्चनाङ्गविधिः [16]प्रोक्तः शिवस्याराधनं शृणु॥

॥इति [17]सूक्ष्मशास्त्रे अर्चनाङ्गविधिः चतुर्थः पटलः॥

---

[1] पद्मकार्पासतूलिकाम्] ऊ; वर्ति०-अ; द्वर्तिका ... काम्-ऋ; ०तूलकम्-औ, अं, झ; वर्तकोर्पासतूलकम्-छ.

[2] छिन्नवस्त्रेण] छ, झ; छिद्रवस्त्रेण-अ, ऋ; चित्रव०-ऊ; श्चनवक्रेण-औ; श्चवक्रेण-अं.

[3] वर्तिकां] अ; वर्तिनीं-ऊ; वर्तिभिः-ऋ, औ, अं, छ, झ.

[4] कर्पूरवर्तिकां] अ; कर्पूरं वर्तिकं-ऊ; कर्पूरवर्तिकं-ऋ; ०वर्तिना-औ; ०वर्तिका-अं; ०वर्तिभिः-छ, झ.

[5] कुर्यात्संसिद्धमृगनाभिकम्] अं; ०भिका-ऊ; कुर्यात्संसिद्ध ... -अ; ०संसिद्ध ... ऋ; ०त्संसिद्धिं ०- औ; ०त्संसिद्धं ०-छ; कुर्यात्संसिद्ध०-झ.

[6] स्वर्ण पात्रे विनिक्षिप्य] अ, ऊ, छ; ... त्रे विनिक्षिप्य-ऋ; ०विनिव्यादि-औ, अं; ०विनिक्षिपेद्दीपा-ण्यारोप्य-'झ' मातृकयां इत्येव दृश्यते।

[7] दीपानारोप्य] अ; दीपाण्यारोप्य-ऊ, ऋ, छ; दीपान्या०-औ, अं.

[8] देशिकः] अ, ऊ, ऋ, औ, छ, झ; देशिका-अं.

[9] दापयेत्परमेशानं] अ, ऊ, ऋ, औ; ०त्परमीशानं-अं; ०त्परमेशं स्यात्-छ; ०त्परमेसस्य-झ.

[10] चतुस्त्रिद्व्यङ्गुलायामं] ऊ, ऋ; चतुस्त्र्यङ्गु०-औ; चतुस्त्रित्वय०-अं; चतुस्त्रियङ्गुलं०-छ; चतुस्त्रियङ्गु०-झ.

[11] श्रेष्ठमध्याधमं] अ, ऊ, ऋ, छ; ०ध्यावसास्मृतम्-औ; श्रेष्टिमध्यापसास्मृतम्-अं; श्रेष्ठं०-झ.

[12] पृथक् पृथक्] अ, ऊ, औ, अं, छ; पृधक् पृधक्-झ 'ऋ' मातृकायं 'पृथक् पृथक्' इति लूप्तम्।

[13] दीपप्रियो] अ, ऊ, औ, अं, छ, झ; ... प्रयो-ऋ.

[14] सदाशिवः] अ, ऊ, ऋ, औ, छ, झ; ०शिवम्-अं.

[15] अर्चनाङ्गविधिः] अ, औ, छ; ०विधि-ऊ, ऋ; ०विधिं-अं, झ.

[16] प्रोक्तः] अ, ऋ, औ, छ; प्रोक्तं-ऊ, अं, झ.

[17] इति सूक्ष्मशास्त्रे अर्चनाङ्गविधिः चतुर्थः पटलः] अ; इति सूक्ष्मागमे अर्चनाङ्गविधिपटल चतुर्थः-ऊ; इति ... ... अर्चनाङ्गविधिश्च चतुर्थः पटलः-ऋ; इति सूक्ष्मशास्त्रे क्रियापादे अर्चनाङ्गविधिपटलः-औ, अं; इति सूक्ष्मशास्त्रे क्रियापादे अर्चनाङ्गविधिर्नाम चतुर्थपटलः-छ; इति सूक्ष्मशास्त्रे क्रियापादे अर्चनाङ्गविधिं नाम षण्णवतिपटलः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ पञ्चमः पटलः ॥

[[1]शिवपूजाविधिपटलः]

[शिवपूजाफलम्]

अतः परं प्रवक्ष्यामि शिवपूजाविधिक्रमम्।
आयुरारोग्यजयदं सर्वयज्ञफलप्रदम्॥ १ ॥
ब्रह्महत्यादिदोषघ्नं [2]प्रजावृद्धिकरं परम्।
[3]शिवपूजासमं पुण्यं न [4]भूतं न [5]भविष्यति॥ २ ॥

[पूजायाः द्वैविध्यम्]

[6]द्विविधं तत्समाख्यातम् [7]आत्मार्थं च [8]परार्थकम्।

[आत्मार्थपूजनं त्रिविधम्]

[9]शुद्धकेवलसंमिश्रम् [10]आत्मार्थं त्रिविधं स्मृतम्॥ ३ ॥

---

[1] अयं पटलः अ, (टि. १९१. पृ० १५-२५); ऊ, (टि. ३८. पृ० ३०-५१.); ऋ, (टि. ९७. पृ० ६-९, २४-३१); औ, (टि.-३४८. पृ० ३५-४६); अं, (टि. ३५३ पृ० २९-४०); छ, (टि. ९६७. पृ० १७-२८); झ, (टि. १०१६. पृ० २२९-२३९) कोशेषु दृश्यते।; शिवपूजाविधिविषये-अंशुमदागमे; आत्मार्थपूजाविधौ, अचिन्त्यविश्वसादाख्ये (१२, १३), अजितागमे (२०), कामिकागमे पूर्वे (४५), कारणागमे पूर्वे (१५, ३०, ३१), किरणागमे (२), चिन्त्यागमे (६, ७, ८), दीप्तागमे द्वितीयभागे (२३), मतङ्गपारमेश्वरागमे (क्रिया०२९), मृगेन्द्रागमे (क्रिया० ३), योगजागमे (६), रौरवागमे (क्रिया० १०), वीरागमे (३८), सहस्रागमे (४), सुप्रभेदागमे (क्रिया० ७, ८) पटलाः, शिवागमशेखराख्यशिवलिङ्गप्रतिष्ठाविधौ-द्वितीयभागे पञ्चावरण-न्यासश्च द्रष्टव्याः।; शिवपूजाविधि-पटलः] ऊ; शिवार्चनविधिः पटलः-अ; अथ शिवपूजाविधिः-औ; हरिः ओम् शिवपूजै-अं; शिवपूजाविधिः- झ; 'ऋ, छ' कोशयोरिदं शीर्षकं न दृश्यते।

[2] प्रजावृद्धिकरं परम्] ऋ, झ; पूजा०-अ, ऊ, छ; पूजा ऋद्धिकरं०-औ; पूजाद्धिकरं परम्-अं.

[3] शिवपूजासमं] अ, ऊ, ऋ, औ, अं, छ; ०पूजसमं-झ.

[4] भूतं] अ, ऊ; भूतो-ऋ, औ, अं, छ, झ.

[5] भविष्यति] अ, ऊ, ऋ, औ, अं, छ; भवष्यति-झ.

[6] द्विविधं] अ, ऊ, ऋ, औ, अं, छ; द्विविथं-झ.

[7] आत्मार्थं] अ, ऊ, ऋ, औ, अं, छ; आत्माद्धं-झ.

[8] परार्थकम्] अ, ऊ, ऋ, औ, अं, छ; पराद्धकम्-झ.

[9] शुद्धकेवलसंमिश्रम्] अ, ऊ, ऋ, औ, अं, झ; शुद्धं०-छ.

[10] आत्मार्थं त्रिविधं स्मृतम्] अ, औ, अं, छ; ०र्थं परिकीर्तितम्-ऊ; आत्मा ... तम्-ऋ; ०त्रिविथं भवेत्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[अष्टाविंशतिभेदकं परार्थपूजनम्]

[1]अष्टाविंशतिभेदेन [2]परार्थं संप्रकीर्तितम्।
शैवादिपैतृकान्तानाम् अष्टाविंशतिकं स्मृतम्॥४॥
[3]तेषु भौतिकमाख्यातं समासाच्छृणु [4]साम्प्रतम्।

[शौचाचमनं स्नानं मार्जनं च]

[5]प्रातरुत्थाय [6]मनसा शिवं संचिन्तयेद्बुधः॥५॥
तद्ग्रामाद् [7]बहिरभ्येत्य [8]विण्मूत्रं च [9]विसर्जयेत्।
[10]शौचमाचमनं [11]दन्ततालूसंशोधनं कुरु॥६॥
[12]ऋग्वेदादिकमन्त्रेण स्नानं कृत्वा विचक्षणः।
[13]सुशुद्धवस्त्रखण्डेन [14]मार्ज्यं देहगतं जलम्॥७॥
धौतवस्त्रेण संवेष्ट्य [15]चार्द्रवस्त्रं परित्यजेत्।

[वैदिकशैवनित्यानुष्ठानम्]

[16]ततः [17]सन्ध्यामुपासीत [18]क्रमाद्वैदिकशैविकम्॥८॥

---

[1] अष्टाविंशतिभेदेन] अ, ऊ, ऋ, औ, अं, छ; अष्ट०-झ.
[2] परार्थं] अ, ऊ, ऋ, औ, अं, छ; परार्द्धं-झ.
[3] तेषु] अ, ऊ, छ, झ; नेष्टं-औ, अं। 'ऋ' मातृकायां "तेषु भौति" इति न दृश्यते।
[4] साम्मतम्] अ; संवृतम्-ऊ; सुव्रत-ऋ, औ, अं, छ, झ.
[5] प्रातरुत्थाय] अ, ऊ, ऋ, औ, अं, छ; ०रुद्धाय-झ; एतद्विषये कामिकागमे पूर्वभागे पृ० १९. द्रष्टव्यः।
[6] मनसा शिवं संचिन्तयेद्बुधः] अ, ऊ, ऋ, औ, छ, झ; मनसात् संचितयेद्बुधाः-अं.
[7] बहिरभ्येत्य] अ; वहिर्निर्गत्य-ऊ, अं, छ; तु वहिर्गत्वा-औ; वहि निर्गत्य-झ; 'ऋ' मातृकायां "द्वहिरभ्येत्य विण्मूत्रं च वि" इति न दृश्यते।
[8] विण्मूत्रं च] अ, ऊ, औ, अं, छ; विण्मूत्रादिं-झ.
[9] विसर्जयेत्] ऊ, औ, अं, छ, झ; विवर्जयेत् अ; ... वर्जयेत्-ऋ.
[10] शौचमाचमनं] अ, ऊ, ऋ, छ, झ; शौचाचमनं-औ; शौशाचमनं-अं.
[11] दन्ततालूसंशोधनं] ऊ; दान्त०-अ; दत्ततालूशोधनकं-ऋ; दन्तकाष्ठतालूशोधनं-औ, अं; दन्ततालूशोधनकं-छ; दन्ततालं-शोधनं-झ.
[12] ऋग्वेदादिक०] ऊ; ऋग्वेदादींश्च-अ, ऋ; अद्वेदादेति-औ, अं; यशोदादेति-छ; यद्देवादेति-झ.
[13] सुशुद्धवस्त्रखण्डेन] अ, ऋ, औ, अं, झ; संशुद्ध ०-ऊ; संशुद्धवस्त्रिखण्डेन-छ.
[14] मार्ज्यं देहगतं] ऋ; मार्ज ०अ, औ, अं, छ; मार्जेद् ०-ऊ; माजर्द्दहतं-झ.
[15] चार्द्रवस्त्रं परित्यजेत्] औ; आर्द्र०-अ, ऊ, अं, छ; आर्द्र ... जंयेत्-ऋ; आद्र०-झ.
[16] ततः] अ, ऊ, ऋ, औ, छ, झ; ... तः-अं.
[17] सन्ध्यामुपासीत] अ, ऊ, ऋ, औ, अं, छ; संध्यमुपासित-झ.
[18] क्रमाद्वैदिकशैविकम्] ऋ, छ, झ; क्रमाद्विदिकशैविकम्-अ; क्रमाद्वैदिकशैवकम् ऊ; कामाद्वैदिक०-औ; कामाद्वैदिदि-शैविकम् अं; एतद्विषये कामिकागमे पूर्वभागे. पृ० २० द्रष्टव्यः।

In Public domain. Digitization Muthulakshmi Research Academy

ततो देवालयं [१]गत्वा [२]प्रदक्षिणमथाचरेत्।

[द्वारपूजा भस्मधारणप्रकारः भस्मरेखादेवताश्च]

[३]पादप्रक्षालनं कृत्वा [४]द्वारदेवान् समर्चयेत्॥ ९॥
[५]मण्डपं तु प्रविश्याथ [६]रुचिरासनसंस्थितः।
[७]भस्म तद् [८]वामहस्तस्थं [९]दक्षेणैवाभिमन्त्रयेत्॥ १०॥
[१०]असुरांशं परित्यज्य दिग्बन्धं [११]चास्त्रमन्त्रतः।
[१२]दक्षहस्ते जलं [१३]धृत्वा ह्यङ्गुलीभिश्च मर्दयेत्॥ ११॥
[१४]शिरोललाटकर्णेषु [१५]कण्ठे च हृदयेऽपि च।
[१६]बाह्वोः [१७]नाभेश्च जान्वोश्च [१८]भस्मन्यासं समाचरेत्॥ १२॥
रुद्रो [१९]विष्णुर्विरिञ्चिश्च [२०]ऊर्ध्वाधस्थास्त्रिरेखिकाः।
[२१]दिग्बन्धनं ततः कृत्वा [२२]प्राणायामत्रयं कुरु॥ १३॥

---

[१] गत्वा] अ, ऊ, ऋ, औ, छ, झ; कृत्वा-अं.
[२] प्रदक्षिणमथाचरेत्] अ, ऊ, ऋ, औ, अं, छ; ०मधाचरेत्-झ.
[३] 'ऋ' मातृकायां "दप्रक्षाल" इति न दृश्यते।
[४] द्वारदेवान्] अ, ऊ, ऋ, औ, अं, झ; आचारदेवान्-छ.
[५] मण्डपं तु] ऊ; मण्डपान्ते-अ, ऋ, औ, अं, छ, -झ.
[६] रुचिरासनसंस्थितः] अ, ऊ, ऋ, औ, छ; ०संस्थितम्-अं; ०संस्धितम्-झ.
[७] भस्म तद्] अ, ऋ, औ; भस्मं तु-ऊ; भस्मतः-अं; भसितं-छ, झ; एतद्विषये पूर्वकारणागमे पटलः ३०. श्लो० ५३-६० द्रष्टव्यः।
[८] वामहस्तस्थं] सं० पा०; वामहस्तेन-अ, ऊ, ऋ, औ, अं, छ, झ.
[९] दक्षेणैवाभिमन्त्रयेत्] अ, ऊ, अं; ... णव ... येत्-ऋ; उक्षेणै०-औ, झ; नक्षत्रेणै०-छ.
[१०] असुरांशं] अ, ऋ, औ, अं, झ; असुरांस-ऊ; असुर ईशं-छ.
[११] चास्त्रमन्त्रतः] अ, ऊ, ऋ, औ, छ, झ; चास्त्रमन्त्रतम्-अं.
[१२] दक्षहस्ते जलं] छ; दक्षहस्त०-अ, ऊ, ऋ, झ; दक्षहस्तं-औ, अं.
[१३] धृत्वा ह्यङ्गुलीभिश्च] सं० पा०; पीत्वाङ्गुल्येनैव-अ, ऊ, झ; पीत्वादङ्गुल्येनैव-ऋ, औ, छ; पीत्वादङ्गुल्यैनैव-अं.
[१४] शिरोललाटकर्णेषु] सं० पा०; ०कर्णे च-अ, ऋ, औ, छ, झ; ०कर्णे तु-ऊ; ०कण्ठे च-अं.
[१५] कण्ठे च] ऊ, ऋ, औ, छ, झ; कण्ठेषु-अ; कुण्डे च-अं.
[१६] बाह्वोः] अ, औ, छ; बाह्वे-ऊ; बाह्वे-ऋ; बाह्वो-अं, झ.
[१७] नाभेश्च जान्वोश्च] सं० पा०; ०शिरस्तेव-अ; ०शिरस्तेन-ऊ; ऋ; ० ... रस्तेन-औ; ०शिरस्तेन-अं; ०शिरसि-छ; नाभ्याथ जानुभ्यां-झ.
[१८] भस्मन्यासं] अ, ऊ, ऋ, औ, अं, छ; भस्मन्न्यासं-झ.
[१९] विष्णुर्विरिञ्चिश्च] ऊ, ऋ, औ; ०विरिञ्चश्च-अ; ०विरिञ्चाश्च-झ; "छ" मातृकायां "विष्णुर्विरिञ्चिश्च" इति न दृश्यते।
[२०] ऊर्ध्वाधस्तास्त्रिरेखिकाः] सं० पा०; ०धस्था त्रिरेखिका-अ; ०धस्तात्त्रिरेखिका-ऊ; ०धस्तात्त्रि-रेखया-ऋ; ०धस्तास्त्रिरेखया-औ; ०धस्तात्रिरेखया-अं; ०धस्तात्त्रिरेख ... -छ; उर्द्धाथस्ता त्रिरेखकौ-झ.
[२१] दिग्बन्धनं] अ, ऊ, ऋ, छ, झ; दिग्बन्धनः-अं.
[२२] प्राणायामत्रयं] अ, ऊ, औ, छ, झ; ... मत्रयं-ऋ; ०यामं त्रयं-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[भूतशुद्धिः]

[1]भूतशुद्धिं ततः कृत्वा [2]पञ्चग्रन्थींस्तु [3]छेदयेत्।
[4]मूर्धादिपादपर्यन्तम् [5]अमृताप्लावनं नयेत्॥ १४॥

[आत्मशुद्धिः]

करन्यासं ततः [6]कृत्वा ह्यङ्गुलिन्यासमाचरेत्।
अङ्गन्यासं ततः [7]कुर्यादष्टत्रिंशत्कला न्यसेत्॥ १५॥
हृत्पद्मे [8]चार्चयेद्देवं [9]नाभौ [10]होमं समाचरेत्।
[11]भ्रूमध्ये [12]ध्याययेद्देवम् [13]आत्मशुद्धिरिति स्मृतम्॥ १६॥

[सूर्यपूजनम्]

[14]शक्रपावकयोर्मध्ये दिवानाथं प्रपूजयेत्।
[15]उदुत्यं [16]जातवेदेति [17]गन्धाद्यैः [18]स्नापयेद्रविम्॥ १७॥
[19]अलङ्कृत्य विशेषेण [20]गन्धपुष्पस्रगादिभिः।
[21]दण्डिपिङ्गगणेशश्च गुरोः [22]प्रभूतमासनम्॥ १८॥

---

[1] भूतशुद्धिं] अं, ऊ, ऋ, औ, छ, झ; ०शुद्धि-अ.
[2] पञ्चग्रन्थींस्तु] औ; ०ग्रन्थीस्तु-अ; ०ग्रन्थिं तु-ऊ; ०ग्रन्थिस्तु-ऋ, अं; ०ग्रन्थिंस्तु-छ; ०ग्रन्धिस्तु-झ.
[3] छेदयेत्] अ, ऋ, औ, अं, छ, झ; धारयेत्-ऊ.
[4] मूर्धादिपादपर्यन्तं] अ, ऊ, ऋ, औ, अं, छ; मूर्न्धादि०-झ.
[5] अमृताप्लावनं] अ, ऋ, छ, झ; अमृत०-ऊ, औ, अं.
[6] कृत्वा ह्यङ्गुलिन्यासमाचरेत्] सं० पा०; कृत्वा ङ्गुलि०-अ, ऋ, झ; कृत्वा अङ्गुली-ऊ, छ; ०अङ्गन्यासमथाचरेत्-औ, अं.
[7] कुर्यादष्टत्रिंशत्कला] ऊ, छ; कुर्यादष्टत्रिंशत्कलां-अ, ऋ, औ, अं; कृत्वा अष्टत्रिंशत्कला-झ.
[8] चार्चयेद्देवं] झ; वार्चयेद्देवं-अ, ऊ, ऋ, औ, अं, छ.
[9] 'ऊ' मातृकायां "नाभौ होमं समाचरेत्। भ्रूमध्ये ध्याययेद्देवं" इति द्वौ पादौ न दृश्येते।
[10] होमं] अ, ऋ, औ, अं, छ; होम-झ.
[11] भ्रूमध्ये] अ, ऋ, छ, झ; भूमध्ये-औ; भूतमध्ये-अं.
[12] ध्याययेद्देवम्] अ, ऊ, ऋ, औ, छ, झ; ०द्देवाम्-अं; 'अत्र 'ध्यायेत्' इति साधुपदम्।
[13] आत्मशुद्धिरिति] अ, ऋ, छ, झ; ०शुद्धिरिदं-औ; ०शुद्धिरितं-अं.
[14] शक्रपावकयोर्मध्ये] अ, ऊ, ऋ, झ; चक्रुः०-औ; चक्र०-अं; चक्रपाचकयो०-छ.
[15] उदुत्यं] ऋ, औ; उद्दीप्य-अ; आदित्यं-ऊ; उतित्य-अं; उदित्यं छ, झ; "उदुत्यं" सुप्रभेदे टि. ४६. पृ० १००; (तै० सं० १. २. ८. ७; १. २. ४. ४३).
[16] जातवेदेति] अ, ऋ, औ, छ, झ; जातवेदोऽदि-ऊ; जातवेदेदि-अं.
[17] गन्धाद्यैः] अ; गन्धादि-ऊ; गन्धोदैः-ऋ, औ, छ; गण्डोदै-अं; गन्धोदै- झ.
[18] स्नापयेद्रविम्] अ, ऊ, ऋ, छ झ; ०येद्दिवि-औ; ०येद्रवि-अं.
[19] अलङ्कृत्य] अ, ऊ, औ, छ, झ; अ ... -ऋ; अलङ्कृसा-अं.
[20] गन्धपुष्पस्रगादिभिः] अ, ऊ, ऋ, छ, झ; गन्धपुष्प ... कादिभिः-औ; ०सृकादिभिः-अं.
[21] दण्डिपिङ्गगणेशश्च गुरोः] अ, औ, अं, छ, झ; ०गणेशं ... गुरो-ऊ; दण्डिपिङ्ग०-ऋ.
[22] प्रभूतमासनम्] अ, ऊ, ऋ, औ, अं, झ; ०मानसम्-छ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]विमलं सारमाराध्यं [२]परमं सुखपद्म च।

[दीप्तादि नवशक्तयः]

दीप्ता [३]सूक्ष्मा जया भद्रा [४]विभूतिर्विमला तथा॥ १९॥
[५]विद्युता [६]सर्वतोमुख्यैर् अर्कासन [७]खषोल्ककाः।

[सूर्यमूलमन्त्रः]

[८]नादं [९]वह्निस्वरोपेतं [१०]द्वितीयस्वरसंयुक्तम्॥ २०॥
[११]तृतीयस्वरसंयुक्तं [१२]नादाद्यं शिवसंयुतम्।
[१३]नमोऽन्तं सौरमुच्चार्य सौरं [१४]संपूजयेद्गुरुः॥ २१॥

[सूर्यध्यानम्]

[१५]सौरं [१६]कुङ्कुमसंकाशं सर्वाभरणभूषितम्
[१७]द्विनेत्रं [१८]चारुवदनं [१९]रक्तमाल्यानुलेपनम्॥ २२॥
चतुर्भुजसमोपेतं [२०]परहस्ताम्बुजद्वयम्।
[२१]अभयं वरदोपेतं प्रभामण्डलमण्डितम्॥ २३॥

---

१ विमलं सारमाराध्यं] सं० पा०; विमलासनमाराध्य-अ, ऊ, ऋ, औ, अं, छ, झ.

२ परमं सुखपद्म च] अ, झ; परमान्युपपद्मज-ऊ, परमा० ऋ, औ, अं; परमा सुखपद्मजा-छ.

३ सूक्ष्मा] अ, ऊ, ऋ, औ, छ, झ; सूक्ष्म्या-अं.

४ विभूतिर्विमला तथा] सं० पा०; भूत्यैर्विमलमेव-औ; भृत्यैर्विमलमेव-अ, ऊ; भृत्यैविमलमेव-ऋ, अं, छ, झ.

५ इतः पूर्वं "अमोघा" इति भवितव्यम्। इति भाति। विद्युता] अ, ऋ, झ; विद्युतो-ऊ; विद्युतः-औ, अं; विद्युताः-छ.

६ सर्वतोमुख्यैर्] अ, ऋ, औ, अं, झ; सर्वमुख्ये च-ऊ; संचतो मुख्यैर्-छ.

७ खषोल्ककाः] अ, ऋ, झ; खषोल्ककम्-ऊ; कषोत्ककाः-औ; कषोत्ककर्काः-अं; खषोत्कका-छ; ओं ह्रां ह्रीं-सः शिवसूर्याय नमः.

८ नादं] अ, ऊ, ऋ, औ, अं, छ; नाद-झ.

९ वह्निस्वरोपेतं] अ, ऊ, ऋ, औ, झ; ०स्वरोपेत-अं; ०समोपेतं-छ.

१० द्वितीयस्वरसंयुक्तं] अ, ऊ, ऋ, औ, अं, द्वितीयं०-ऋ; द्वितीयः सरसायुतम्-छ; द्वितीया-झ.

११ तृतीयस्वरसंयुक्तं] अ, ऊ, ऋ, औ, अं, छ; त्रितिय०-झ.

१२ नादाद्यं] अ, ऊ, ऋ; नादाभ्यां-औ, अं; नादाद्या-छ; ... दाद्यं-झ.

१३ नमोऽन्तं सौरमुचार्य सौरं] अ, ऊ, ऋ, औ; नानामोन्त सौरमचार्य०-अं; ०सौरमर्धार्धमौर-छ; नमोत्त सौरमुचार्या०-झ.

१४ संपूजयेद्गुरुः] अ, ऊ, ऋ, औ, झ; ०कुरु-अं.

१५ सौरं] अ, ऊ, ऋ, औ, अं, झ; सौर-छ.

१६ कुङ्कुमसंकाशं] अ, ऊ, ऋ, औ, छ, झ; ०संकाशा-अं.

१७ 'झ' मातृकायां "द्विनेत्रं" इति न दृश्यते।

१८ 'ऋ' "मातृकायां चारुवदनं रक्त" इति न दृश्यते।

१९ ०रक्तमाल्यानुलेपनम्] अ, उ, औ, झ; ... मालानु०-ऋ; रक्तमालानुलेपनम्-अं; अर्चमालासमन्वितम्-छ.

२० परहस्ताम्बुजद्वयम्] अ, ऋ, छ; वर०-ऊ; पद्महस्ता०-औ, अं, झ.

२१ अभयं वरदोपेतं] अ, ऊ, ऋ, औ, छ, झ; अभय ०-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[1]उपवीतसमायुक्तम् [2]उषादेवीसमन्वितम्।
[3]पद्मस्थं वा [4]रथारोहम् अरुणेन [5]समन्वितम्॥ २४॥
ध्यात्वाभ्यर्च्य [6]षडङ्गानि परिवारसमन्वितम्।

[सूर्यपरिवारदेवताः]

[7]सोमाङ्गारबुधांश्चैव[8]गुरुशुक्रशनैश्चरान्॥ २५॥
[9]राहुं केतुं क्रमेणैव पूर्वादीशान्तमर्चयेत्।

[धूपदीपनिवेदनादि]

मुद्गान्नं पायसान्नं च धूपदीपादिकं ददेत्॥ २६॥

[तेजश्चण्डपूजनम्]

[10]तेजश्चण्डेश्वरं पूज्य [11]प्रणिपत्य क्षमापयेत्।
[12]भान्वालयं विना [13]चेत्तु देवाग्रे [14]मण्डले यजेत्॥ २७॥

[स्थानशुद्धिः]

[15]प्रणवेनार्घ्यं संकल्प्य तेनैव प्रोक्ष्य भूतले(लम्)।
चतुर्विंशाङ्गुलायामं चतुरश्रसमन्वितम्॥ २८॥
[16]संमार्ज्य वामदेवेन [17]दक्षपाणितलेन वै।

---

[1] उपवीतसमायुक्तम्] अ, ऊ, ॠ, औ, अं, छ; उपवीत०- झ.
[2] उषादेवीसमन्वितम्] अ, ऊ, ॠ, औ, अं, झ; माषादेह०-छ.
[3] पद्मस्थं] अ, ऊ, ॠ, छ; पद्मार्थं-औ, अं; पद्मस्धं-झ.
[4] रथारोहम्] अ, ऊ, ॠ, औ, अं, झ; धारोहम्-छ.
[5] समन्वितम्] अ, ऊ, ॠ; समप्रभम्-औ, अं, छ; समाप्रभम्-झ.
[6] षडङ्गानि] अ, ऊ, ॠ, छ, झ; हसङ्गानि-औ अं.
[7] सोमाङ्गारबुधांश्चैव] ऊ, ०बुधश्चैव-अ, ॠ, औ, छ, झ; ०बुधं चैव-अं.
[8] गुरुशुक्रशनैश्चरान्] सं० पा०; ०शनैश्चराः-अ, औ, छ; गुरुं शुकं शनैश्चरं-ऊ; ०शनैश्चरा-अं; गुरुशुक्रशनैश्चरः-झ.
[9] राहुं केतुं क्रमेणैव पूर्वादीशान्तऽर्चयेत्] ऊ; राहुकेत्वन्तकं पूर्वादीशान्तं क्रमशोऽर्चयेत्-अ, छ; राहुकेत्वन्तकं पूर्वादिशान्त क्रमशोऽर्चयेत्-ॠ, झ; ०दीशान्तं क्रमभागो चरेत्-औ; ०दीशान्तं क्षमगोचरेत्-अं.
[10] तेजश्चण्डेश्वरं] अ, ऊ, झ; तेजचण्डेश्वरं-औ, अं; तोमश्चनेश्वान्तरं-छ। 'ॠ' मातृकायां "श्वरं पूज्य" इति न दृश्यते।
[11] प्रणिपत्य क्षमापयेत्] अ, औ, अं, छ, झ; पणिवत्यार्थपावयेत्-ऊ; प्रणपत्य०-ॠ.
[12] भान्वालयं] अ, ऊ, ॠ, छ, झ; गावालयं-औ, अं.
[13] चेत्तु देवाग्रे] अ, ऊ, ॠ, झ; चेत्तदेवाग्रे-औ; चेत् देवाग्रे-अं, छ.
[14] मण्डले] छ; मण्डलं-अ, ऊ, ॠ, अं, झ; स्थण्डिलं-औ.
[15] प्रणवेनार्घ्यं] अ, ऊ, ॠ, छ, झ; ०नार्घ्य-औ, अं.
[16] संमार्ज्य] अ, औ, अं, झ; संमार्ज्यं-ॠ, छ; समाज्य-ऊ.
[17] दक्षपाणितलेन वै] अ, ऊ, ॠ, छ, झ; दक्षिणेन तु पाणिना-औ; दक्षिणापाणि तले नवे-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[1]भूमिर्भून्नेतिना पूज्य (ज्यम) [2]स्थानशुद्धिरिति स्मृतम्॥ २९॥

[द्रव्यशुद्धिः]

[3]पाद्याचमनार्घ्यपात्रान् संपूज्य देशिकः।
[4]अथवा त्वेकपात्रे वा [5]पाद्यमाचमनार्घ्यकम्॥ ३०॥
क्षालनं चास्त्रमन्त्रेण हृदयेन [6]निरीक्षयेत्।
[7]अस्त्रेणैवावकुण्ठ्याथ [8]तेनैवोन्मीलनं कुरु॥ ३१॥
शिवाम्भसा [9]तु संस्थाप्य [10]ब्रह्माङ्गैनैव चार्चयेत्।
[11]पिधाय दक्षहस्तेन [12]शिवगायत्रिमन्त्रतः॥ ३२॥
[13]धेनुमुद्रां [14]प्रदर्श्याथ [15]हृदा संप्रोक्ष्य [16]पात्रकान्।
[17]पूजोपकरणद्रव्यानस्त्रेण प्रोक्ष्य [18]देशिकः॥ ३३॥
द्रव्यशुद्धिरिति [19]प्रोक्ता पुण्याहं वाचयेत्ततः।

[पञ्चगव्यादि स्थापनम्]

पञ्चगव्यं तु संकल्प्य [20]पञ्चामृतं तथैव च॥ ३४॥

---

[1] भूमिर्भून्नेतिना] अ, ऊ, ऋ, औ; भूमिभून्नेतिना-अं, झ; भूमिर्भूमेतिना-छ.
[2] स्थान०] अ, ऊ, ऋ, औ, अं; स्थार०-छ; स्धान०-झ.
[3] पाद्याचमनार्घ्यपात्रान् संपूज्य देशिकः] सं० पा०; पाद्यमाचमनं चार्घ्यं पात्रं सं०-अ, ऋ, औ, छ; पाद्यमाचमनं चार्घ्यं पात्र०-ऊ; पाद्याचमनं चार्घ्यं पात्रं संपूज्य देशिकं-अं; पाद्यमाचमनं चार्घ्यं पाद्यं ०-झ.
[4] अथवा त्वेकपात्रे] अ, औ, छ; अथवाद्येकपात्रे-ऊ; अथवार्के पात्रे-ऋ; ०द्वेकपात्रे-अं; अथ्वा एकपात्रे-झ.
[5] पाद्यमाचमनार्घ्यकम्] अ, ऊ, ऋ, औ, छ, झ; ०र्घ्यकम्-अं.
[6] निरीक्षयेत्] अ, ऊ, औ, अं, छ; निरि०-झ; । 'ऋ' मातृकायां निरीक्षयेत्। "अस्त्रेणैवावकुण्ठ्याथ" इति न दृश्यते।
[7] अस्त्रेणैवावकुण्ठ्याथ] अ; वर्ममन्त्राव०-ऊ, छ, झ; धर्ममन्त्रापयारुण्या-औ; यममन्त्रापयारुण्या-अं.
[8] तेनैवोन्मीलनं] अ, ऊ, ऋ, छ; तथैवो०-औ; तथैवोज्वलनं-अं; ०न्मिलनं-झ.
[9] तु संस्थाप्य] अ, ऊ, ऋ, छ, झ; सुसंस्थाप्य-औ, अं.
[10] ब्रह्माङ्गैनैव चार्चयेत्] अ, ऊ, ऋ, औ, अं, छ; ब्रह्माणैः नैवमर्चयेत्-झ.
[11] पिधाय] सं० पा०; विधाय-अ, ऋ, औ, छ; षडङ्गाय-ऊ; विधाया-अं; विथाय-झ.
[12] शिवगायत्रिमन्त्रतः] अ, ऊ, ऋ, औ, छ, झ; ०मन्त्रतम्-अं.
[13] धेनुमुद्रां] अ, ऊ, ऋ, औ, छ, झ; धेनुमुद्रा-अं.
[14] प्रदर्श्याथ] अ, ऊ, ऋ, छ; प्रकल्प्याथ-औ; प्रविश्याथ-अं; प्रदश्याथ-झ.
[15] हृदा संप्रोक्ष्य] अ; हृदिना प्रोक्ष्य-ऊ, ऋ, छ, झ; ब्रह्मादीं प्रोक्ष्य-औ, अं.
[16] पात्रकान्] ऊ; पात्रकै-अ; पात्रकैः-ऋ, छ, झ; पात्रके-औ, अं.
[17] पूजोपकरणद्रव्यानस्त्रेण] सं० पा०; ०द्रव्यैरस्त्रेण-आ, ऊ, ऋ, औ, छ; ०द्रव्यावस्त्रेण-अं; ०द्रवैरस्त्रेण-झ.
[18] देशिकः] ऊ, औ, छ, झ; देशिकैः-अ, ऋ; देशिका-अं.
[19] प्रोक्ता] अ, औ, अं; प्रोक्तं-ऊ, छ, झ; प्रोक्तः-ऋ.
[20] पञ्चामृतं तथैव] अ, ऊ, ऋ, औ, झ; ०मृत तथैव-अं; ०मृतमथैव-छ.

In Public domain. Digitization Muthulakshmi Research Academy

अन्यैश्च [1]स्नपनद्रव्यैर्विधिना [2]स्थाप्य [3]देशिकः

[विघ्नेश्वरपूजनं वृषपूजनं च]

विघ्नेश्वरं समभ्यर्च्य [4]फलभक्ष्यादिकं ददेत्॥ ३५॥
वृषभं पूजयेत्पश्चाद्द्वारदेवान्समर्चयेत्।

[द्वारपूजा]

[5]द्वारस्य [6]दक्षिणे चोर्ध्वे गणेशं पूजयेद्गुरुः॥ ३६॥
तस्यैव [7]वामपार्श्वे तु [8]वाग्देवीं [9]संप्रपूजयेत्।
[10]तयोर्मध्ये [11]महालक्ष्मीं [12]द्वारदक्षिणपार्श्वके॥ ३७॥
[13]नन्दिगङ्गे समभ्यर्च्य [14]वामपार्श्वे [15]विशेषतः।
[16]महाकालं च [17]यमुनां समभ्यर्च्य कवाटयोः॥ ३८॥

[द्वाराङ्गदेवताः]

विमलं च सुबाहुं च [18]भुवङ्गं च [19]पतङ्गकम्।

---

[1] स्नपनद्रव्यैर्विधिना] औ, छ; ०विधानात्-अ; ०विधानं-ऊ; ०विधाना- ऋ, अं; ०विथिना-झ.
[2] स्थाप्य] अ, ऊ, ऋ, औ, अं, छ; स्नाप्य-झ.
[3] देशिकः] अ, ऊ, ऋ, औ, छ, झ; देशिका-अं.
[4] 'ऋ' मातृकायां "फलभक्ष्यादिकं ददेत्॥ वृषभं" इति न दृश्यते। 'अं' मातृकायामत्र "गणेशं संप्रपूजयेत्" इत्येकः पादः अधिको दृश्यते।
[5] "ऊ" मातृकायां "द्वार" इत्यर्धश्लोको न दृश्यते।
[6] दक्षिणे चोर्ध्वे गणेशं पूजयेद्गुरुः] अ, ऋ; दक्षिणेनैव चोर्ध्वे विघ्नेशमर्चयेत्-औ; दक्षिणेनैव ऊर्ध्वे गणेशमर्चयेत्-अं; ०पूजयेत्क्रमात्-छ; ०चार्ध्वे०-झ.
[7] वामपार्श्वे] अ, ऊ, ऋ, औ, अं, छ; वामपाश्वे-झ.
[8] वाग्देवीं] अ, ऊ, ऋ, औ, अं, छ; वाग्देवी-झ.
[9] संप्रपूजयेत्] अ, ऋ, औ, अं, छ; च प्रपूजयेत्-ऊ.
[10] तयोर्मध्ये] अ, ऋ, औ, अं, छ, झ; तयोर्वामे-ऊ.
[11] महालक्ष्मीं] अ, ऋ, ऊ, छ, झ; ०लक्ष्मीर्-औ; ०लक्ष्मी-अं.
[12] द्वारदक्षिणपार्श्वके] सं० पा०; ०पार्श्वयोः अ, ऊ, ऋ; ०पार्श्वतः-औ, छ, झ; ०दक्षिणाश्वतम्-अं.
[13] नन्दिगङ्गे] सं० पा०; देवीं गङ्गां-अ; नन्दीं गङ्गां-ऊ; नदीं गङ्गां-ऋ; नन्दिगङ्गा-औ, अं, छ; न ... गङ्गा-झ.
[14] वामपार्श्वे] अ, ऊ, ऋ, औ, अं, छ; वामपाश्वे-झ.
[15] विशेषतः] अ, ऊ, ऋ, औ, छ, झ; विशेषता-अं.
[16] महाकालं] अ, ऊ, ऋ, औ, छ, झ; महाकायं-अं.
[17] यमुनां समभ्यर्च्य कवाटयोः] अ, ऊ, ऋ, छ, झ; यमुनंसमभ्यर्च्य कपाटयोः-औ, अं.
[18] भुवङ्गं] ऊ, ऋ, औ, अं, छ, झ; भुजङ्गं-अ.
[19] पतङ्गकम्] अ, ऊ, ऋ, औ, अं, झ; पदर्धकम्-छ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]ऊर्ध्वाधः संप्रपूज्याथ शिवास्त्रं [2]संप्रपूजयेत्॥ ३९॥
[3]धूपान्तं वाथ दीपान्तं [4]हविष्यन्तं यजेत्ततः।
[5]घण्टां तु [6]ताडयेत्तत्र [7]पार्ष्णिघातत्रयेण तु॥ ४०॥
सद्योजातं [8]समुच्चार्य [9]चार्धमण्टपमाविशेत्।
[10]यवनिकां परित्यज्य [11]गर्भद्वारं समाश्रयेत्॥ ४१॥

[गर्भगृहं प्रविश्य पूजनम्]

[12]स्थाणुमन्त्रं [13]जपित्वा तु गर्भगेहं [14]विशेद्बुधः।
[15]षडङ्गैः रुद्रमभ्यर्च्य [16]धूपदीपं समाचरेत्॥ ४२॥

[निर्माल्यविसर्जनम्]

निर्माल्यं तु [17]विसृज्याथ [18]ईशानेन तु [19]देशिकः।
[20]तद्विसर्जनकाले तु [21]पुष्पं [22]मूर्ध्नि निधापयेत्॥ ४३॥

---

१ ऊर्ध्वाधः] ऋ, औ; ऊर्ध्वाथः-अ, अं; ऊर्ध्वेऽधः-ऊ; ऊर्ध्वाय-छ; ऊध्वाथः-झ.
२ 'ऋ' मातृकायां "पूजयेत्॥ धूपान्तं वाथ" इति न दृश्यते।
३ धूपान्तं] अ, ऊ, औ, अं, झ; धूपस्थं-छ.
४ हविष्यन्तं] सं० पा०; हविष्यान्तं-अ, ऊ, ऋ, औ, अं, छ; हविष्यन्त-झ.
५ घण्टां तु] अ, ऊ, ऋ, औ, झ; पण्डाड्न-अं; पादान्-छ.
६ ताडयेत्तत्र] अ, ऊ, ऋ, औ, अं, छ; त्तडयेत्तत्र-झ.
७ पार्ष्णिघातत्रयेण तु] अ, ऋ, औ; परि-ऊ; पाष्णी०-अं, झ; पार्ष्णी०-छ.
८ समुच्चार्य] ऋ, औ, अं, छ, झ; समुच्चाय-अ, ऊ.
९ चार्धमण्टपमाविशेत्] औ; अर्ध०-अ, ऊ, ऋ, अं, झ; अर्धमण्टपमाहरेत्-छ.
१० यवनिकां] अ, ऊ, ऋ, औ, अं; गवनीलां-छ; यवनीकां-झ.
११ गर्भद्वारं समाश्रयेत्] अ, ऋ, अं, छ; गर्भद्वारसमन्वितम्-ऊ; ०समाहरेत्-औ; गर्भद्वार समाश्रयेत्-झ.
१२ स्थाणुमन्त्रं] अ, ऊ, ऋ, औ, अं, छ; स्धाणु ०-झ.
१३ जपित्वा तु] अ, ऊ, ऋ, औ, छ, झ; च विद्वा तु-अं.
१४ विशेद्बुधः] अ, ऊ, ऋ, औ, छ, झ; विशेद्बुधाः-अं.
१५ षडङ्गैः रुद्रमभ्यर्च्य] अ, ऊ, ऋ, छ, झ; षडङ्गे०-औ; ०रुद्रममभ्यर्च्य-अं.
१६ धूपदीपं समाचरेत्] अ, ऊ, ऋ, छ, झ; ०दीपादिमाचरेत्-औ; ०दीपादि समाचरेत्-अं.
१७ विसृज्याथ] अ, ऊ, ऋ, औ, छ, झ; विसृज्याथा-अं.
१८ ईशानेन] अ, ऊ, ऋ, झ; रिशानेन-औ; रीशानेन-अं; ईशनेन-छ.
१९ देशिकः] अ, ऊ, ऋ, औ, छ, झ; देशिकम्-अं.
२० तद्विसर्जनकाले] अ, ऊ, ऋ, औ, अं, झ; तन्निमर्जनकाले-छ.
२१ पुष्पं] अ, ऊ, ऋ, औ, छ, झ; पुष्प-अं.
२२ मूर्ध्नि निधापयेत्] औ; मूर्ध्नि च दापयेत्-अ, ऊ, ऋ; ०निधाचयेत्-अं; मूर्धनि धापयेत्-छ; मूध्नि निथापयेत्-झ.

Public domain. Digitization Muthulakshmi Research Academy

[लिङ्गपीठयोः प्रक्षालनम्]

[1]लिङ्गं [2]प्रक्षाल्य चास्त्रेण पीठं पाशुपतेन तु।
[3]स्थलशुद्धिं ततः कृत्वा [4]चास्त्रमन्त्रेण [5]बुद्धिमान्॥ ४४॥

[मन्त्रशुद्धिः]

[6]मूलाधारात्समादाय [7]ब्रह्मरन्ध्रे सुयोजयेत्।
[8]गुरूपदेशवज्ज्ञेयं [9]मन्त्रशुद्धिरुदाहृता॥ ४५॥
[10]प्रणवादिनमोऽन्ताश्च [11]मन्त्रजीव इहोच्यते।

[आसनपूजादि]

[12]विमलासनं तथा [13]पूर्वमनन्तं च [14]द्वितीयकम्॥ ४६॥
[15]पद्मासनं तृतीयं [16]च चतुर्थं योगमासनम्।
[17]हर्यासनं पञ्चमं स्याद् आह्वाने [18]विमलासनम्॥ ४७॥
[19]अनन्तासने [20]स्नानं स्यादर्चने [21]पद्ममासनम्।

---

[1] लिङ्गं] अ, ऊ, ऋ, छ, झ; लिङ्ग-औ, अं.
[2] प्रक्षाल्य चास्त्रेण] अ, ऋ, औ, छ, झ; प्रक्षाल्यास्त्रेण-ऊ; प्रक्षालशास्त्रेण-अं.
[3] स्थलशुद्धिं] अ, ऊ, औ, अं, छ; स्घल ०-झ; 'ऋ' मातृकायां "स्थलशुद्धिं ततः कृ" इति न दृश्यते।
[4] चास्त्रमन्त्रेण] अ, ऊ, ऋ, औ, छ; शास्त्रे मन्त्रेण-अं; अस्त्र०-झ.
[5] बुद्धिमान्] अ, ऊ, ऋ, औ, अं, छ; देशिक-झ.
[6] मूलाधारात्समादाय] अ, ऊ, ऋ, औ, अं, छ; मूलथारात् स०- झ.
[7] ब्रह्मरन्ध्रे सुयोजयेत्] सं० पा०; ब्रह्मरन्ध्रेषु यो०-अ, ऊ, ऋ, औ, अं, छ, झ.
[8] गुरूपदेशवज्ज्ञेयं] अ, ऋ, झ; ०वत्तेयं-ऊ; ०शकं ज्ञेयं-औ, अं; ०वद् ध्येया-छ.
[9] मन्त्रशुद्धिरुदाहृता] अ, औ; ०रिति स्मृतम्-ऊ; ०रुदाहृतः-ऋ; मध्यशुद्धिरुदाहृदम्-अं; ०रुदाहृतम्-छ, झ.
[10] प्रणवादिनमोन्तश्च] अं ०न्ताश्च-अ, ऋ, छ; ०न्तं च-ऊ, औ; ०नमोत्तं च-झ.
[11] मन्त्रजीव इहोच्यते] अ; मन्त्रं जीवमिहोच्यते-ऊ; ०मिहोच्यते-ऋ, औ, अं; मन्त्रषीवमि०-छ; मन्त्रजिपमि०-झ.
[12] विमलासनं तथा] अ, ऊ, ऋ, औ, अं, छ; विमलासत्तथा-झ.
[13] पूर्वम्] अ, ऊ, ऋ, औ, अं, झ; पृष्ठं-छ.
[14] द्वितीयकम्] अ, ऊ, ऋ, औ, अं, छ; द्वितियकम्-झ.
[15] पद्मासनं तृतीयं] अ, ऊ, ऋ, औ, अं, छ; पद्मासनत्रितियं-झ.
[16] च] अ; तु-ऊ, ऋ, औ, अं, छ, झ.
[17] हर्यासनं पञ्चमं स्याद्] सं० पाठः; हरिरासीन०-औ, अं, छ; ०सीनमाह्वानो-झ.
[18] (कामिकागमे पूर्वे पटले. ४. श्लो० २८४-२८५ उ०); (कारणागमे पूर्वे पटले. ३०. श्लो० २५३ उ०-२५४); (रौरवागमे क्रिया पटले. ४३. श्लो० ७० उ-७१).
[19] अनन्तासने] सं ० पा०; अनन्तासनेपु-औ, अं, छ, झ.
[20] स्नानं स्यादर्चने] औ, अं; स्नानस्य अर्चने-छः; संस्नाप्य अर्चयेत्-झ.
[21] पद्ममासनम्] अं, छ, झ, पद्मासनम्-औ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]योगासने निवेद्यं स्याद्विनोदं [2]हरिरासने॥४८॥
देवस्य [3]पिण्डिकोर्ध्वे तु कल्पयेदासनं क्रमात्।
[4]मण्डलत्रितयं कल्प्य [5]सूर्यसोमाग्निमेव च॥४९॥
ब्रह्मा विष्णुश्च रुद्रश्च [6]मण्डलस्याधिदेवताः।
[7]शक्तिः कुण्डलिनी चैव [8]सशिवाय [9]नमोऽन्तकम्॥५०॥

[शिवमूर्तेरावाहनम्]

[10]शिवासनं तदूर्ध्वे तु [11]मूर्तिमावाहयेद्बुधः।
विद्यादेहं तु संकल्प्य [12]स्वनाम्ना चैव पूजयेत्॥५०॥
तस्य मध्ये [13]समावाह्य प्रासादेन तु [14]मन्त्रतः।

[सदाशिवध्यानम्]

[15]शरच्चन्द्रनिभाकारं पञ्चवक्त्रसमन्वितम्॥५१॥
[16]दशबाहुसमायुक्तं [17]हृद्गलं चैकमेव [18]च।
द्विपादं चित्रवस्त्राढ्यं सर्वाभरणभूषितम्॥५२॥
जटामकुटसंयुक्तं [19]टङ्कशूलसमन्वितम्।

---

1 योगासे] अ, ऊ, ऋ, औ, छ, झ, योगासनं-अं.
2 हरिरासने] ऊ, ऋ, औ, अं, छ, झ; ०मासने-अ.
3 पिण्डिकोर्ध्वे] ऊ, ऋ, औ, छ; पिण्ड०-अ; ०कोध्ये-अं; ०कोध्वे-झ.
4 मण्डलत्रितयं] ऊ, ऋ, औ, छ; मण्डलं०-अ; ०त्रिततियत्-अं; ०त्रतयं-झ.
5 सूर्यसोमाग्निमेव] सं० पा०; अ, ऊ, ऋ, औ, झ; सूम०-अं; सोमं सूर्याग्निमेव-छ.
6 मण्डलस्याधिदेवताः] अ, ऊ, औ, अं, छ; मण्ड ... -ऋ; ०देवता-झ.
7 शक्तिः कुण्डलिनी] अ, औ, छ; शक्ति०-ऊ; ... रक्ति०-ऋ; शक्तिकुटिलिनी-अं; शक्तिकुण्डलनि-झ.
8 सशिवाय] अ, ऋ, छ; सदाशिवाय-ऊ, औ; मसत् शिवाय-अं; सशिवा-झ.
9 नमोऽन्तकम्] अ, ऊ, ऋ, औ, अं, छ; नमोत्तकम्-झ.
10 शिवासनं तदूर्ध्वे] अ, ऊ, ऋ, औ, अं, छ; ०सन तदूध्वे-झ.
11 मूर्तिमावाहयेद्बुधः] अ, ऊ, ऋ, औ; ०वहयेद्बुध-अं; मूर्त०-छ; मूत्ति०-झ.
12 स्वनाम्ना चैव] अ, ऊ, ऋ; स्वनम्ने०-औ, अं; स्वनाम्ने०-छ; स्वनाम्नेनैव-झ.
13 समावाह्य] अ, ऊ, ऋ, औ, अं, छ; ०वाह्या-झ.
14 मन्त्रतः] अ, ऊ, ऋ, औ, छ, झ; मन्त्रिताः-अं.
15 शरच्चन्द्रनिभाकारं] ऊ, ऋ, औ, अं, छ; चरचन्द्र०-अ; ०नीभाकारं-झ.
16 दश बाहुसमायुक्तं] अ, ऊ, ऋ, औ, अं, छ; दशा०-झ.
17 हृद्गलं] अ, ऊ, ऋ, औ, अं, छ; हृगलं-झ.
18 च] अ, ऊ, ऋ, औ, छ, झ; चा-अं.
19 टङ्कशूलसमन्वितम्] अ, ऊ, ऋ, झ; गङ्गाशूल०-औ, अं; कर्णमूल०-छ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]असिवज्रसमायुक्तमभयं [२]दक्षिणे धृतम्॥५३॥
[३]पाशं च वरदं [४]घण्टां [५]दहनं चाङ्कुशं तथा।
[६]वामहस्ते धृतं देवं [७]तन्मध्ये [८]ज्योतिरूपकम्॥५४॥
एवं सदाशिवं ध्यात्वा पाद्यमाचमनं ददेत्।
[९]अर्घ्यं गन्धं च पुष्पं च धूपदीपं [१०]ददेत्प्रभोः॥५५॥
अनन्तमासनं कल्प्य [११]स्वाधारैश्चैव [१२]शक्तिभिः।
[१३]कन्दायेत्यङ्कुराश्चेति [१४]नालोऽनन्तस्तथैव च॥५६॥
[१५]चतुर्दिक्षु च मध्ये च [१६]अर्चयेत्तत्स्वनामतः।
तस्य मध्ये समभ्यर्च्य [१७]स्नानकर्म समाचरेत्॥५७॥

[अभिषेकक्रमः]

गव्येन स्नापयेद्विद्वान् [१८]ईशानादिक्रमेण तु।
शुद्धोदकेन संस्नाप्य [१९]तैलपिष्टामलादिना॥५८॥
[२०]तत्तन्मन्त्रेण संस्नाप्य [२१]जलं स्नानान्तरान्तरे।

---

१ असिवज्रसमायुक्तमभयम्] अ, ऋ, औ, अं, झ; असिखड्ग०-ऊ; असिवस्त्र०-छ.
२ दक्षिणे धृतम्] अ, ऋ, छ; दक्षिणैर्युक्तम्-ऊ; ०युतम्-औ, अं; ०धृत-झ.
३ पाशं च] औ; सपाशं-अ, ऊ, ऋ, छ; पाशं-अं; सपादं-झ.
४ घण्टां] अ, ऊ, ऋ; घण्डं-औ, अं; खण्डं-छ, झ.
५ दहनं चाङ्कुशं तथा] अ, ऊ, औ, झ; ०चाङ्कु ... -ऋ; ०चाकुरन्तथा-अं; दहसिच्चं कुशं-छ.
६ वामहस्ते धृतं] औ; ०हस्तोद्धृतं-अ; हस्तधृतं-ऊ; ... धृतं- ऋ; वालहस्तौ ०-अं; वामे हस्ताद्धृतं-छ; वामहस्तौ ०-झ.
७ तन्मध्ये] अ, ऊ, ऋ, छ, झ; मध्ये तु-औ; ... मध्ये-अं.
८ ज्योतिरूपकम्] अ, ऋ, अं, छ, झ; द्वेतिणाणावकम्-ऊ; ज्याति०-औ.
९ अर्घ्यं] अ, ऊ, ऋ, औ, अं, छ; अघ्यं-झ.
१० ददेत्प्रभोः] अ, ऊ, औ, छ; ... प्रभोः-ऋ; ०प्रभो-अं; ०त्प्रभो-झ.
११ स्वाधारैश्चैव] अ; स्वस्थानैश्च-ऊ; स्वधारैश्चैव-ऋ; स्वयानैश्चैव-औ; स्वधानैश्चैव-अं; स्वधास्वानश्च-छ; स्वाथानैश्चैव-झ.
१२ शक्तिभिः] सं० पा०; शक्तयः-अ, ऊ, ऋ, औ, छ, झ; शक्तयम्-अं.
१३ कन्दायेत्यङ्कुराश्चेति] सं० पा०; स्कदाधो अङ्कु०-अ; कन्दाय अङ्कु०-ऊ; स्कन्दायाङ्कु०-ऋ; स्कन्धाय त्वङ्कुरां चेति-औ; स्कन्धाय अङ्कु०-अं; स्कन्दाय अङ्कु-छ; कन्दायति अङ्कु०-झ.
१४ नालोऽनन्तस्तथैव] अ; नालान०-ऊ, ऋ, झ; नालन०-औ, अं; न भानुस्तथैव च-छ.
१५ चतुर्दिक्षु च मध्ये च] ऊ; ०चतुदिङ्मध्यमं चैव-अ; चतुर्दिङ्मध्यमं चैव-ऋ, औ, अं, छ, झ.
१६ अर्चयेत्तत्स्वनामतः] ऊ, ऋ, छ; ०नामः-अ; त्वर्चयेत्त०-औ; ०नामता अं; अर्चयेत्तु स्वनामतः-झ.
१७ स्नानकर्म] अ, ऊ, ऋ, औ, छ, झ; स्नानकं मं-अं.
१८ ईशानादि] अ, ऊ, ऋ, छ, झ; निशादि-औ; अं.
१९ तैलपिष्टामलादिना] अ, ऋ, औ, अं, झ; तैलाभि०- ऊ; तैलपिष्ट०- छ.
२० तत्तन्मन्त्रेण] अ, ऊ, ऋ, छ, झ; तन्तुम०-औ, अं.
२१ जलं] अ; जल-ऊ, औ, अं, छ, झ; ... ल-ऋ.

In Public domain. Digitization Muthulakshmi Research Academy

नालिकेरजलं [१]क्षौद्रं [२]दधि क्षीरं घृतं गुलम्॥ ५९॥
इक्षुसारं च गन्धोदं [३]रत्नशुद्धोदकान्तकम्।
[४]अभिषिच्य महादेवं [५]शिवमन्त्रेण सुव्रत॥ ६०॥

[मन्त्रपुष्पदानादि]

मन्त्रपुष्पं ततो [६]दत्वा मन्त्रान्नं च निवेदयेत्।
[७]वस्त्रखण्डेन [८]संमार्ज्य [९]लिङ्गं पीठं विशेषतः॥ ६१॥
[१०]दुकूलचित्रवस्त्राद्यैर् [११]अलङ्कृत्य विशेषतः।

[पद्मासनार्चनादि]

पद्मासनं तथाभ्यर्च्य [१२]दलेभ्यः [१३]केसरेभ्यश्च॥ ६२॥
[१४]कर्णिकायै नमश्चेति [१५]बीजेभ्यो नम इत्यपि।
वामादिशक्तयश्चाष्टौ [१६]अर्चयेत्तु दलाग्रके॥ ६३॥
[१७]शुद्धस्फटिकसंकाशां [१८]पीठे [१९]मनोन्मनीं न्यसेत्।

[शिवस्य पञ्चावरणार्चनम्]

[२०]तस्योर्ध्वे शिवमावाह्य पञ्चावरणमर्चयेत्॥ ६४॥

---

१ क्षौद्रं] अ, ऊ, ऋ, औ, छ, झ; क्षौद्र-अं.
२ दधि क्षीरं घृतं] अ, ऊ, छ; दधिक्षीरघृतं-ऋ, औ, अं, झ.
३ रत्नशुद्धोदकान्तकम्] अ, ऊ, औ, छ, झ; रत्नशुद्धोदक ... -ऋ; रक्त-अं.
४ अभिषिच्य महादेवं] अ, ऊ, छ, झ; ... हादेवं-ऋ; अभिषेकं महादेवं-औ, अं.
५ शिवमन्त्रेण सुव्रत] अ, ऊ, ऋ, छ; शिवमन्त्रसमुच्यते-औ, अं; ०संवृत-झ.
६ दत्त्वा] ऋ; दत्वा-अ, ऊ, औ, अं, छ, झ.
७ वस्त्रखण्डेन] अ, ऊ, ऋ, औ, अं, झ; वस्त्रं ०-छ.
८ संमार्ज्य] अ, ऊ, ऋ, औ, अं, छ; संमज्य-झ.
९ लिङ्गं पीठं] अ, ऊ, ऋ, छ; लिङ्गपीठं-औ, अं, झ.
१० दुकूलचित्रवस्त्राद्यैर्] अ, ऊ, ऋ, छ, झ; ०वस्त्रेणार्-औ; ०वस्त्रेण-अं.
११ अलङ्कृत्य विशेषतः] अ, ऊ, ऋ, औ, अं, छ; अलङ्कृत्या०-झ.
१२ दलेभ्यः] ऊ, औ; दलेभ्यो-अ, अं, छ, झ; ... भ्यो-ऋ.
१३ केसरेभ्यश्च] अ; केसरेभ्य च-ऊ, ऋ, औ, छ; केररेभ्य च-अं; केसरेभ्यु च-झ.
१४ कर्णिकायै नमश्चेति] सं० पा०; कर्णिकाभ्यो०-अ; कर्णिकांश्च०-ऊ; कर्णिकाश्च मंनश्चैव-ऋ; कर्णिकाश्च०-औ, अं, झ; कर्णिकस्थमन श्चेति-छ.
१५ बीजेभ्यो नम] अ, ऊ, ऋ, छ, झ; ०नाम-औ, अं.
१६ अर्चयेत्तु दलाग्रके] अ, ऋ, औ, छ; अर्चयेद्दलाष्टके-ऊ; अर्चयेद्०-अं; अर्चये तु ०-झ.
१७ शुद्धस्फटिकसंकाशां]-ऊ; ०संकाशं-अ, औ, अं; ... काशं-ऋ; ०स्पटिक०-छ, झ.
१८ पीठे] अ, औ, अं, छ, झ; पीठमध्ये-ऊ; पीठं-ऋ.
१९ मनोन्मनीं] अ, ऊ, ऋ, झ; ०न्मनिं-औ; ०न्मनि-अं; ०न्मनी-छ.
२० तस्योर्ध्वे] अ, ऊ, ऋ, औ, अं, छ; तस्योध्वे-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[सद्यादिब्रह्मपञ्चकानां शक्तीनाञ्चावाहनम्]

[1]तस्य पश्चिमतोऽजातं वामदेवं तथोत्तरे।
[2]अघोरं दक्षिणेऽभ्यर्च्य [3]पूर्वे तु [4]पुरुषं [5]स्मरेत्॥ ६५॥
ईशानमीशदेशे तु [6]कर्णिकोर्ध्वे शिवं यजेत्।
[7]अम्बिकां [8]वारुणे देशे [9]उत्तरे तु [10]गणाम्बिकाम्॥ ६६॥
याम्ये [11]भागीरथीं [12]पूज्य [13]पूर्वदेशे तु गौरिकाम्।
[14]उमां वै [15]त्वीशदेशे तु [16]सद्यादीशानमन्तकम्॥ ६७॥
[17]स्वनाममन्त्रैरभ्यर्च्य ब्रह्मपञ्चकशक्तयः।

---

[1] तस्य पश्चिमतोऽजातं वामदेवं तथोत्तरे] ऊ; ०पश्चम ... त्तरे-अ; ०पश्चम ... रे-ऋ; सद्यं पश्चिमतोऽभ्यर्च्य ०-औ; सद्यःपश्चिमतो न्यस्य ०-अं; सद्यःपश्चिमतो न्यस्त्वा ०-छ; तस्य पश्चिमतो न्यष्ट्वा वामदेव ०-झ;
"परिवारशिवस्यार्चा ब्रह्माङ्गैश्च यथा भवेत्॥
ईशे पूर्वे यमे सौम्ये पश्चिमे च क्रमेण तु। ईशानस्याम्बिकाशक्तिः शुक्लशुक्लं तयोर्निभम्॥
पुरुषस्य गणाम्बा च रक्तं कृष्णं च सन्निभम्। अघोरस्य च गङ्गा च रक्तं श्यामनिभं क्रमात्॥
वामदेवस्य गौरी च तयोस्स्वर्णनिभं क्रमात्। सद्योजातमुमादेवी श्वेतकायौ तथैव च॥
श्वेतवर्णधरास्सर्वे त्रिणेत्राश्च चतुर्भुजाः। अभयवरदोपेताष्टङ्क-शूल करान्विताः॥
शक्तीनामुत्पलं सव्ये वामे लम्बकरान्विताः। ईशे पूर्वे यमे सौम्ये पश्चिमे-शानकादयः॥
पञ्चब्रह्ममिदं प्रोक्तम्" (चिन्त्यागमे टि. १४. पृ० . १६३-१६४).

[2] अघोरं] अ, ऊ, ऋ, औ, छ, झ; अघोर-अं.

[3] पूर्वे तु] अ, ऊ, ऋ, झ; पूर्वे तत्-औ, अं; पूर्ववत्-छ.

[4] पुरुषं] अ, ऊ, ऋ, औ, अं, छ; पुरुष-झ.

[5] स्मरेत्] अ, ऊ, ऋ, औ, अं, झ; स्मरन्-छ.

[6] कर्णिकोर्ध्वे] अ, ऊ, ऋ, औ, अं, छ; कर्णिकोध्वे-झ.

[7] अम्बिकां] ऊ, औ, छ; अम्बिका-अ, ऋ, अं; अम्बीका-झ.

[8] वारुणे] अ; वरुणे-ऊ; वरुण-ऋ, औ, अं, छ, झ.

[9] उत्तरे तु] अ, ऊ; तूत्तरे तु-ऋ, औ, अं, छ, झ.

[10] गणाम्बिकाम्] ऊ, छ; गणाम्बिका-अ, ऋ, औ, अं, झ.

[11] भागीरथीं] ऋ; भगी० अ; भगीरथी-ऊ; गङ्गाधरं-औ; गङ्गाधरीं-अं; भगीरथं-छ; भागिरधिं-झ.

[12] पूज्य] अ, ऋ, औ, अं, छ, झ; चैव-ऊ.

[13] पूर्वदेशे तु गौरिकाम्] अ, औ, छ, झ; ०गौरिका-ऊ, अं; ... शे तु गोरिकां-ऋ.

[14] उमां वै] अ, ऊ, ऋ, औ, अं, झ; उमायै-छ.

[15] त्वीशदेशे] अ, ऊ, औ, अं, छ, झ; क्लेशदेशे-ऋ.

[16] सद्यादीशानमन्तकम्] सं० पा०; ०मन्त्रकम्-अ, ऋ; ०मन्त्रकः-ऊ; सद्यमीशानमन्दरम्-औ; ०मन्दनम्-अं; स्यादीशान-मन्तरम्-छ; ०मन्तरम्-झ.

[17] स्वनाममन्त्रैर्] अ, ऊ, ऋ, औ, अं, छ; ०मत्र्यैर्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[विदिक्षु हृदयादिषडङ्गैरर्चनम्]

[1]हृदयं चाग्निदेशे तु [2]शिखां निर्ऋतिगोचरे॥ ६८॥
[3]कवचं चानिले देशे ऐशान्ये [4]शिरसार्चयेत्।
[5]नैर्ऋते चास्त्रमभ्यर्च्य [6]नयनं त्वीशगोचरे॥ ६९॥

[हृदयादिशक्तीनामर्चनम्]

[7]वामिनीं चाग्निदेशे तु [8]नीलीं निर्ऋतिगोचरे।
[9]चक्रीं चानिलदेशे तु [10]पाशाङ्गीमीशगोचरे॥ ७०॥
[11]खङ्गिनीं नैर्ऋते देशे [12]गम्भिनीमीशगोचरे।
[13]गर्भावरणदेवांश्च [14]स्वस्वनाम्ना तु पूजयेत्॥ ७१॥

---

१ हृदयं चाग्निदेशे तु] अ, ऊ, औ, अं, छ, झ; ... शं तु-ऋ;
"षडङ्गान्क्रमशोऽर्चयेत्। हृदयं वामिनीशक्तिः श्वेताभौ पावके दिशि॥
शिखा च चक्रिणीशक्तिः काशश्यामौ च राक्षसे। कवचं शक्ति पाशङ्गी धूम्राभौ वायुगोचरे॥
शिरश्च नलिनीशक्तिः पीताभावीश-गोचरे। अस्त्रं च गाम्भीनीशक्तिः कृष्णाभौ दक्षिणे यजेत्। नेत्रं तु खङ्गिनीशक्तिः श्यामळौ वाम-गोचरे॥
हृदयादय एते हि त्रिणेत्राश्च चतुर्भुजाः। अभयं वरदोपेताः पाशशूलकरान्विताः॥
अस्त्र नेत्रे च रौद्रे च शेषास्सौम्या इति स्मृताः। एवं सदाशिवात्मानः शिवस्य परिवारकाः॥
प्रथमावरणं प्रोक्तम्" एतद्विषये चिन्त्यागमे टि. १४. पृ० १६४-१६५ द्रष्टव्यः।

२ शिखां निर्ऋति गोचरे] ऋ; ०निर्ऋति० अ; शिखा ०-ऊ; शिवाग्निरिति ०-औ; शिखाग्निरिति ०-अं; 'छ, झ' मातृकयोः ६८ तम श्लोकस्य चतुर्थपादः ६९ तम श्लोकस्य चत्वारः पादाः ७० तम श्लोकस्य प्रथमपादश्च न दृश्यन्ते।

३ कवचं चानिले देशे] ऋ; ०चानिलदेशे-अ, ऊ; कवचानिल०- औ; कवचानिलीनन्देशे-अं; 'अं' मातृकायां ६९ तम श्लोकस्य द्वितीयतृतीयचतुर्थपादाः ७० तम श्लोकस्य प्रथमपादश्च न दृश्यन्ते।

४ शिरसार्चयेत्] ऊ, ऋ, औ; ०शार्चयेत्-अ.

५ नैर्ऋते चास्त्रमभ्यर्च्य] ऊ; नैऋते ... -अ, ऋ; ०शास्त्र संपूज्य-औ.

६ नयनं] अ, ऊ, औ; ... नन्-ऋ.

७ वामिनीं] अ; वामनी-ऊ, ऋ; वामिनी-औ; अत्र हृदयादिशक्तीनां स्थानक्रमःअर्चनक्रमः स्थानं च विमर्शनीयम् विद्यते।

८ नीलीं निर्ऋतिगोचरे] सं० पा०; ०निऋतिगोचरे अ; नीलिनी०-ऊ; नाल०-ऋ; निल०-औ; निलनृतिगोचरेत्-अं; ०निष्कृति-गोचरे-छ; निलिनिरितिगोचरे-झ.

९ चक्रीं चानिलदेशे] अ; चक्री०-ऊ, ऋ; चक्राशानिलदेशे-औ; चक्री चानीलदेशे-छ; शक्रि च निलदेशे-झ; 'अं' मातृकायां श्लो० ७० तम श्लोकस्य द्वितीयार्धम् श्लो० ७१ तम श्लोकस्य प्रथमार्धं च न दृश्येते।

१० पाशाङ्गीमीशगोचरे] ऊ, ऋ; पाशान्ती०-अ; पाशाङ्गि ईशगोचरे-औ, झ; पाशाङ्गी ईशगोचरे-छ.

११ खङ्गिनीं नैर्ऋते देशे] औ, छ; ० नैऋतदेशे अ; खङ्गिनी०-ऊ, ऋ; खङ्गिनि नैऋतिदेशे-झ.

१२ गम्भिनीमीशगोचरे] अ; गम्भनीमीश०-ऊ; गम्भिनी चैश०-ऋ; जम्भिनीमीश० औ; गङ्गिनीमीश० छ; गभिनीमीश०-झ

१३ गर्भावरणदेवांश्च] अ; ०देवानां-ऊ, ऋ, औ, अं, झ; गर्भावरकरा देवाणां-छ.

१४ स्वस्वनाम्ना तु पूजयेत्] अ, ऊ; ... पूजयेत्- ऋ; स्वनाम्ना सत्सुयोजयेत्-औ; स नाम्नास्तु सुयोजयेत्-अं; स्वस्वनाम्ने०-छ; स्वस्वनाम्नेस्तु ०- झ.

In Public domain. Digitization Muthulakshmi Research Academy

[सशक्तिकानां विद्येशावरणदेवानां पूजनम्]

[1]अनन्तेशं तथा [2]भूमिम् [3]इन्द्रदेशे समर्चयेत्।
[4]स्वाहादेवीं च [5]सूक्ष्मं च [6]ह्यग्निदेशे समर्चयेत्॥ ७२॥
[7]शिवोत्तमं [8]स्वधादेवीं [9]याम्यदेशे यजेद्बुधः।
[10]एकनेत्रं च [11]क्षान्तिं च [12]नैर्ऋते च समर्चयेत्॥ ७३
[13]एकरुद्रं च [14]पुष्टिं च वरुणे तु [15]यजेद्बुधः।
[16]त्रिमूर्तिं च श्रुतिं चैव वायुदेशे समर्चयेत्॥ ७४॥
[17]श्रीकण्ठं [18]कीर्तिशक्तिं च उत्तरे तु यजेद्बुधः।
[19]मेधाशक्तिं [20]शिखण्डं च ऐशान्यां [21]तु प्रपूजयेत्॥ ७५॥
[7]तद्भस्मधारणात्पुंसाम् [8]आयुश्श्रीकीर्तिवर्धनम्।
विजयं रोगशान्त्यर्थं [9]सर्वाभीष्टफलप्रदम्॥ ७३॥

[लीलावत्यग्निकार्यप्रतिज्ञा]

महाग्निकार्यमित्युक्तं [10]लीलावतीमथ शृणु।

॥ [11]इति सूक्ष्मशास्त्रे [12]अग्निकार्यविधिः षष्ठः पटलः॥

---

[1] ग्रन्थिं मुक्त्वा विसर्जयेत्] अ, ऊ, औ; ग्र ... जयेत्-ऋ; ग्रन्थि मुक्त्वा-छ; ग्रन्धिमुक्त्वा-झ.
[2] सेचयेत्] अ, ऊ, ऋ, छ, झ; शोधयेत्-औ, अं.
[3] एवं दर्भं] अ; एक दर्भं-ऊ, ऋ, औ, छ, झ; एक दर्भ-अं.
[4] शेषमग्रादिकं दहे] ऊ, ऋ, औ, अं, झ; शेषमग्र्यादिकं दहे-अ.
[5] दहेत्] अ, ऋ, औ, अं, छ, झ; ददेत्-ऊ.
[6] तद्भस्म तिलकं कुरु] अ, ऊ, ऋ, औ, छ, झ; भक् भस्म तिलकं कुरु-अं.
[7] तद्भस्मधारणात्पुंसां] अ, ऊ, ऋ, औ, अं, छ; ०थारणात्पुस-झ.
[8] आयुश्श्रीकीर्तिवर्धनम्]ऊ, औ, छ; आयुः श्रीः की०-अ; आयु श्री की०-ऋ; आयुःकीर्ति श्रीः कीर्ति०-अं; आपु-श्रीः की०-झ.
[9] सर्वाभीष्टफलप्रदम्] अ, ऊ, ऋ, औ, अं, छ; सर्वाभिष्ठफलप्रदम्-झ.
[10] लीलावतीमथ शृणु] अ, ऋ; लीलावतिमथ शृणु-ऊ, औ, छ, झ; लीलापतिमथ शृणु-अं.
[11] इति सूक्ष्मशास्त्रे] अ, ऋ, औ, अं, छ, झ; इति सूक्ष्मागमे-झ.
[12] अग्निकार्यविधिः षष्ठः पटलः] अ, ऋ; ०विधि पटलः षष्ठः-ऊ; ०विधि पटलः। हरिः ओम्॥- औ, अं; ०विधिर्नाम सप्तमः पटलः-छ; भृहदग्निकार्यविधिंनाम रष्टनवति पटलः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

॥ सप्तमः पटलः ॥

[[१]लीलावत्यग्निकार्यविधिः]

[नित्यहोमे संक्षेपाग्निकार्यप्रतिज्ञा]

[२]लीलावतीमहं वक्ष्ये [३]श्रृणु त्वं तत्प्रभञ्जन।
[४]स्थापनादि क्रियास्सर्वाः संक्षेपाद्वक्ष्यते क्रमात्॥ १॥
कुण्डे वा स्थण्डिले [५]वापि [६]वह्निकार्यं द्विधा स्मृतम्।
[७]निरीक्षणं च मूलेन [८]प्रोक्षणं सद्यमन्त्रतः॥ २॥
दर्भेणास्त्रेण [९]सन्ताड्य [१०]क्रव्यादांशं परित्यजेत्।

---

[१] अयं पटलः] अ (टि. १९१. पृ० ३२, ३३); ऊ (टि. ३८. पृ० ६७-६९); ऋ (टि. ९७. पृ० २३, २४); औ (टि. ३४८. पृ० ५५, ५६); अं (टि. ३५३. पृ० ४८, ४९); छ (टि. ९६७. पृ० ३६, ३७); झ (टि. १०१६. पृ० २४७, २४८); मातृकासु दृश्यते।; लीलावत्यग्निकार्यविषये सोमशम्भुकृतकर्मकाण्डक्रमावल्याख्यपद्धत्यां लीलावत्यग्निकार्यविधिः द्रष्टव्यः।

[२] लीलावतीमहं] अ, ऊ, छ; लीलवतीमथो-ऋ; ०वतिमहा-औ, झ ०पतिमहा-अं
"अथ संक्षेपतो दृष्टं लीलावत्यां शिवागमे। कुण्डे वा स्थण्डिले वापि वह्निकार्यं तदुच्यते॥
चक्षुषा न्यस्तमूलेन वीक्ष्य प्रोक्ष्य शराणुना। हुंफडन्तेन संताड्य क्रव्यादांशं परित्यजेत्॥
अभ्युक्ष्य वर्मणा मूर्त्या कुण्डे वह्निं नियोजयेत्। ओं हां हं हां वह्निमूर्तये नमः संहारमुद्रयानेन बिन्दौ वह्निं निवेशयेत्॥
पूरकेण ततो नाभौ विश्राम्योद्भवमुद्रया। रेचकेन प्रयोगेण, ओं हां हूं हां वह्निमूर्तये नमः आग्नेयममुना बीजं दीपकलि-कोपमम्॥
कुण्डस्थे पावके न्यस्य पञ्च ब्रह्माणि पूजयेत्। आहुतीः पञ्च मूलेन जुहुयात्तदनन्तरम्॥
ध्रुवाद्येन हृदा नाम शिवाग्निस्त्वमिति न्यसेत्। ब्रह्माणं शंकरं विष्णुमनन्तं च हृदार्चयेत्॥
पूर्वाद्युत्तरपर्यन्तं दिक्षु कुण्डाद्बहिः क्रमात्। तदन्वाधारशक्त्यादि शिवमभ्यर्च्य पूर्ववत्॥
जुहुयान्मूलमन्त्रेण शक्त्याङ्गैश्च दशांशतः। शिवं विसृज्य भूरादित्रयं च प्रणवान्वितम्॥
क्रमेण यौगपद्येन दत्त्वाहुतिचतुष्टयम्। ओं हां हूं हृदयायेति पठित्वा मनसा युतम्॥
वह्निं च विसृजेदेवमिति लीलावतीमतम्।" (मु) सोमशंभुपद्धतिः पृ०. २७१, २७२ (श्लो० ६१-६९).

[३] श्रृणु त्वं] ऊ, ऋ, छ; श्रृणुध्वं-अ, औ, अं, झ.

[४] स्थापनादि क्रियास्सर्वाः] ऋ, ०क्रियास्सर्वे-औ, अं, छ; ०क्रियासर्वा-ऊ; ०क्रियाः ... अ; स्धापनादि क्रियास्सर्वे-झ.

[५] वापि] अ, ऊ, ऋ, औ, अं, झ; वपि-छ.

[६] वह्निकार्यं] अ, ऊ, ऋ, अं, छ; ... कार्यं-औ; ०कार्यं-झ.

[७] निरीक्षणं च मूलेन] अ, ऊ, ऋ, छ, झ; निरीक्षणमूलमन्त्रेण-औ, अं.

[८] प्रोक्षणं] ऊ; प्रोक्षयेत्-अ, ऋ, औ, अं, छ, झ.

[९] सन्ताड्य] अ, ऊ, ऋ, छ; सन्दास्य-औ; सन्दास्यात्-अं; सन्ताढ्य-झ.

[१०] क्रव्यादांशं] अ, ऋ, छ, झ; द्रव्यादंशं-ऊ; क्रव्यादंसं-औ, अं.

In Public domain. Digitization Muthulakshmi Research Academy

[1]वर्मणाभ्युक्षणं चैव [2]बीजेनैव तु विन्यसेत्॥ ३॥

[पूरकादिक्रमेण वह्निमादायार्चनम्]

वह्निमूर्तिं समभ्यर्च्य [3]बिन्दोर्नाराचमुद्रया।
[4]पूरकेण तथा नाभौ [5]विश्राम्योद्भवमुद्रया॥ ४॥
[6]रेचकेन समादाय [7]बीजेनाभ्यर्च्य देशिकः।
अग्निं प्रज्वाल्य [8]वक्रेण [9]दर्भैश्चैव परिस्तरेत्॥ ५॥

[प्रणीताघारब्रह्मकूर्चानां निषेधः]

[10]प्रणीताघारसमिधौ ब्रह्मकूर्चं विना चरेत्।
[11]परिषेकं ततः कृत्वा गन्धपुष्पादिनार्चयेत्॥ ६॥

[आज्यहोमः]

[12]आज्यं मूलेन हुत्वा [13]तु पञ्चविंशतिसंख्यया।
आसनं कल्पयेन्मध्ये [14]तथा [15]तन्त्रोक्तदेवताः॥ ७॥
अभ्यर्च्य गन्धपुष्पाद्यैः परिवारसमन्वितम्।

---

[1] वर्मणाभ्युक्षणं] अ, ऊ, ऋ, छ; ०णात्यूक्षणं-औ, अं; ०णासुक्षणं झ.
[2] वीजेनैव तु] अ, ऊ, ऋ; स्ववीजेनैव वि०-औ, अं, झ; स्ववीजैव-छ.
[3] विन्दोर्नाराच०] सं० पा०; इतो नाराच०-अ, ऋ, झ; विन्दो नाराच०-ऊ; इदो नाराच०-छ; 'औ, अं' मातृकयोः चतुर्थश्लोकस्य द्वितीयपादप्रभृति पञ्चमश्लोकस्य प्रथमपादपर्यन्तम् न दृश्यते।
[4] पूरकेण] अ, ऊ, ऋ, छ, झ.
[5] विश्राम्योद्भवमुद्रया] अ, ऋ, झ; विश्य दोदौ व मुद्रया-ऊ; विश्रान्योद्भव०-छ.
[6] रेचकेन] सं० पा०; रेचकेण-अ, ऊ, छ, झ; ... ण-ऋ.
[7] वीजेनाभ्यर्च्य देशिकः] अ, ऊ, छ, झ; त्वासनं मूर्तिदे०-औ; आसनं मूर्तिदेशिकम्-अं.
[8] वक्रेण] अ, ऋ, औ, अं, झ; पत्रेण-ऊ; वज्रेण-छ.
[9] दर्भैश्चैव] अ, ऊ, ऋ, औ, अं, झ; दर्भेणैव-छ.
[10] प्रणीताधारसमिधौ] अ; ०तासार समिधा-ऊ; ०धार समिधा-ऋ, औ, अं, छ; प्रणिताघारसमिथा-झ.
[11] परिषेकं ततः] सं० पा०; परिषेचनं ततः-अ, ऊ, ऋ, औ, अं; परिच्छेदनमतः-छ; परिषेचं ततः-झ.
[12] आज्यं] अ, ऊ, ऋ, औ, छ, झ; आज्य-अं.
[13] तु] अ, ऋ, औ, अं, छ, झ; च-ऊ.
[14] तथा] अ, ऋ; यथा-ऊ, औ, अं, छ, झ.
[15] तन्त्रोक्तदेवताः] अ, ऊ, ऋ, छ; ०देवता-औ, अं, झ.

In Public domain. Digitization Muthulakshmi Research Academy

[आहुतिप्रमाणम्]

[1]भूताहुतिः [2]प्रधानस्य [3]परिवारैकमाहुतिः ॥ ८ ॥
यथा [4]तन्त्रोक्तमार्गेण [5]तत्तद्द्रव्येण [6]हूयते।

[जयादिमन्त्रहोमानां वर्जनम्]

[7]जयादिरभ्याधानञ्च मन्त्रहोमं [8]विवर्जयेत् ॥ ९ ॥
[9]मिन्दाहुतिञ्च जुहुयाद्बीजमुख्येन [10]होमयेत्।

[प्रायश्चित्तहोमः]

[11]महापाशुपतास्त्रेण प्रायश्चित्तं [12]शतं हुनेत् ॥ १० ॥
[13]अदितेन्वादिमन्त्रेण [14]परिषेचनमाचरेत्।
[15]दर्भास्तरणमादाय त्वग्नौ [16]निक्षिप्य देशिकः ॥ ११ ॥

[भस्मरक्षाधारणम्]

[17]तद्भस्म [18]संगृहीत्वा तु [19]त्रिपुण्ड्रं [20]धारयेन्नरः।

---

१ भूताहुतिः] अ, ऊ, छ; भूताहुति-ऋ, झ; हुता हुति-औ, अं.
२ प्रधानस्य] अ, ऊ, ऋ, छ; प्रदानस्य-औ, अं; प्रथानस्य-झ.
३ परिवारैकमाहुतिः] सं० पा०; परिवारेकं समाहुतिः-अ; परिवारमेकाहुतिः-ऊ; ...वारेकं समाहुतिः-ऋ; ...रेक माहुति-औ; परिवारेकमाहुति-अं, झ; परिवारेक माहुतिः-छ.
४ तन्त्रोक्तमार्गेण] अ, झ; ०मन्त्रेण-ऊ, ऋ, छ; ०क्तदेवमन्त्रेण-औ, अं.
५ तत्तद्द्रव्येण] अ, ऋ, औ, अं, छ; तत्तद्रोख्येण-ऊ; तत्तद्द्रव्येण-झ.
६ हूयते] अ, ऊ, ऋ, औ, झ; भूयते-अं, छ.
७ जयादिरभ्याधानं] अ, ऋ, औ, अं, छ; ०रभ्यधानं-ऊ; ०रभ्यथानं-झ.
८ विवर्जयेत्] अ, ऊ, ऋ, औ, अं, छ; विसर्जयेत्-झ.
९ मिन्दाहुतिं च] ऊ, ऋ; मिन्दाहुतिश्च-अ; मिन्दाहुतीश्च-औ, अं, छ; इन्द्राहुतिश्च-झ.
१० होमयेत्] अ, ऋ, औ, अं, छ, झ; हूयते-ऊ.
११ ०स्त्रेण प्रायश्चित्तं] अ, ऊ, ऋ, औ, अं, छ; ०स्त्रेप्रायश्चित्तं-झ.
१२ शतं] अ, ऋ, औ, अं, छ, झ; तथा-ऊ.
१३ अदिते०] ऊ, ऋ, औ, अं, छ, झ; आदेते०-अ.
१४ परिषेचनमाचरेत] ऊ, औ; परिषेचमाथाचरेत्-अ, ऋ, छ; परिषेचनमाथाचरेत्-अं; परिषेचमाधाचरेत्-झ.
१५ ०मादाय त्वग्नौ] औ; ०मादायाग्नौ-अ; ०मादाय अग्नि-ऊ; ०मादाय ... -ऋ; ०मादाय अग्नौ-अं, छ, झ.
१६ निक्षिप्य] अ, ऊ, औ, अं, छ, झ; ...प्य-ऋ.
१७ तद्भस्म] अ, ऊ, ऋ, अं, झ; तद्भस्मं-औ, छ.
१८ संगृहीत्वा] अ, ऊ, ऋ, अं; सगृहीत्वा-ओ, छ; संहित्वा-झ.
१९ त्रिपुण्ड्रं] अ, ऋ, छ, झ; त्रिपुण्ट्रं-ऊ; त्रिपुण्ढ्रं-औ; त्रिपुण्ड्ररं-अं.
२० धारयेन्नरः] अ, ऊ, ऋ, छ, झ; ०येन्नरम्-औ; ध्याययेन्नरम्-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[1]लीलावतीरिति ख्यातं [2]सर्वकर्मसु [3]योग्यकम्॥ १२॥

[फलश्रुतिः]

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
नित्याग्नियजनं प्रोक्तं [4]नित्योत्सवविधिं शृणु॥ १३॥

॥इति सूक्ष्मशास्त्रे लीलावत्यग्निकार्यविधिः सप्तमः पटलः॥

---

[1] लीलावतीरिति] ऋ; ०वतिरिति-अ, छ, झ; ०वती इति-ऊ; ०पतिरिति-औ, अं.
[2] सर्वकर्मसु] अ, ऊ, औ; ०कर्मेषु-ऋ, अं, छ, झ.
[3] योग्यकम्] अ, ऋ, औ, अं, छ, झ; योग्ययः-ऊ.
[4] विधिं] अ, ऊ, ऋ, औ, अं, छ; विधि-झ.

In Public domain. Digitization Muthulakshmi Research Academy

॥ [१]अष्टमः पटलः ॥

[[२]नित्योत्सव (बलि) विधिः]

नित्योत्सवविधिं वक्ष्ये [३]श्रृणु त्वं तत्प्रभञ्जन।

[नित्योत्सवे त्रिकालं वलिदानादि]

[४]नित्यहोमावसाने तु [५]बलिं [६]दद्यात्तु [७]देशिकः ॥ १ ॥
[८]प्रातर्मध्याह्नसायाह्ने त्रिकालं बलिमाचरेत्।
[९]द्विकालमथवा [१०]कुर्यादेककालमथापि वा ॥ २ ॥
इन्दुशेखरमभ्यर्च्य [११]गन्धपुष्पस्रगादिभिः।
[१२]छत्रचामरसंयुक्तं [१३]सर्वालङ्कारशोभितम् ॥ ३ ॥
परिचारकमाहूय सोष्णीषं [१४]सोत्तरीयकम्।
शिरसा [१५]वाहयित्वा तु रथे [१६]वारोपयेद्बुधः ॥ ४ ॥

---

[१] अयं पटलः अ (टि. १९१. पृ० ३३-३५); ऊ (टि. ३८. पृ० ७०-७४); ऋ (टि. ९७. पृ० २४, ३९-४०); औ (टि. ३४८. पृ० ५७-५९); अं (टि. ३५३. पृ० ४९, ५१); छ (टि. ९६७. पृ० ३७, ३९); झ (टि. १०१६. पृ० २४९, २५१); इत्येतेषु कोशेषु दृश्यते। 'ऋ' मातृकायां केचन श्लोकाः '२४' तमे पृष्ठे अवशिष्टश्लोकाः '३९' '४०' पृष्ठयोश्च दृश्यन्ते।

[२] नित्योत्सवविधिः] अ; ०विधिपटलः-ऊ; अथ नित्यो०-औ; नित्योत्सवम्-झ; 'ऋ, अं, छ' मातृकास्विदं शीर्षकं न दृश्यते।

[३] श्रृणु त्वं तत्प्रभञ्जन] अ, ऊ, ऋ, छ; श्रृणुध्वं तत्प्रभञ्जनाः-औ; श्रृणुध्वं तत्प्रभञ्जनम्-अं; श्रृणुध्वं०-झ.

[४] नित्यहोमावसाने] अ, ऊ, ऋ, औ, छ, झ; ०होमासनाने-अं.

[५] बलिं] अ, ऊ, ऋ, औ, अं, छ; बिलिं-झ.

[६] दद्यात्तु] अ, ऊ, ऋ, औ, छ, झ; दद्या तु-अं.

[७] देशिकः] अ, ऊ, ऋ, औ, छ, झ; देशिकाः-अं.

[८] प्रातर्मध्याह्नसायाह्ने] अ, ऊ, औ, अं, छ, झ; 'ऋ' मातृकायामस्यार्धश्लोकस्य स्थाने "प्रात" इति द्वेऽक्षरे दृश्येते, नान्यान्यक्षराणि।

[९] द्विकालमथवा] अ, ऊ, औ, अं, छ; ... कालमथवा-ऋ; ... मथवा-झ.

[१०] कुर्याद्] अ, ऊ, औ, अं, छ; कु ... -ऋ; कुर्य ... -झ.

[११] गन्धपुष्पस्रगादिभिः] अ, ऋ, औ, छ; ०पुष्पादिनार्चयेत्-ऊ; ०सृगादिभिः-अं, झ.

[१२] छत्र०] अ, ऊ, ऋ, औ, अं, झ; स्थल०-छ.

[१३] ०शोभितम्] अ, ऊ, ऋ, औ, अं, झ; ०भूषितम्-छ.

[१४] सोत्तरीयकम्] अ, ऊ, ऋ, छ; चोत्तरीयकम्-औ, अं; सोत्तरियकम्-झ.

[१५] वाहयित्वा] अ, ऊ, ऋ, औ, छ, झ; ऽवाहयित्वा-अं.

[१६] वारोपयेद्बुधः] अ, ऋ, औ, अं, छ, झ; वारोपयेत्ततः-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

[वाद्यघोषपुरस्सरं द्वारस्योभयपार्श्वे अष्टदिक्षु च वलिदानादि]

[१]देवताह्वानवाद्यैश्च [२]घोषयेत्तत्पुरस्सरम्।
[३]विज्ञाप्य देवदेवेशं बलिं [४]दद्याद्विचक्षणः ॥५॥
दीपज्वालासमायुक्तं [५]प्रदक्षिणक्रमं नयेत्।
[६]पीठं प्रक्षालनं कृत्वा [७]मद्दास्यं (स्या ?) वा विशेषतः ॥६॥
पाद्यमाचमनं चार्घ्यं [८]गन्धं पुष्पं च धूपकम्।
दीपं ततो बलिं [९]दद्याद् [१०]अर्घ्योदकं [११]हृदाञ्जलिम्॥७॥
[१२]द्वारस्योभयपार्श्वे तु [१३]नन्दिकालबलिं [१४]ददेत्।
[१५]उक्षं पूर्वे समभ्यर्च्य भानुमेवाग्निकोणके॥८॥
[१६]मनीशं याम्यदेशे [१७]हि [१८]मातृश्च [१९]वीरभद्रकम्।
विघ्नेशं चैव [२०]तत्स्थाने समभ्यर्च्य बलिं ददेत्॥९॥

---

[१] देवताह्वानवाद्यैश्च] अ, ऊ, ऋ, औ, अं, छ; ०पाद्यैश्च-झ.
[२] घोषयेत्तत्] अ, ऋ, औ, अं, छ, झ; घोषयेत्तु-ऊ.
[३] विज्ञाप्य देवदेवेशं बलिं] अ, ऊ, ऋ, औ, छ, झ; विज्ञाप्यादेव०-अं.
[४] दद्याद्विचक्षणः] अ, ऊ, ऋ, औ, छ; दद्याद्विचक्ष ... -अं; दद्याद्विचारणः-झ.
[५] प्रदक्षिणक्रमं] अ, ऊ, ऋ, छ, झ; प्रदक्षिणक्रमान्-औ; प्रदक्षि ... -अं.
[६] पीठं] अ, ऋ, अं; पीठ-ऊ, औ, छ; पिठ-झ.
[७] मद्दास्यं (स्या ?) वा] अ, छ; मद्वास्यं वा-ऊ; मालय ... -औ; मा ... -अं; मद्दास्यां व-झ।; 'ऋ' मातृकायां "मद्वास्यं वा विशेषतः। पाद्यमा" इति न दृश्यते।
[८] गन्धं पुष्पं] अ, औ, अं, छ; गन्धपुष्पं-ऊ, ऋ, झ.
[९] दद्याद्] अ, ऊ, ऋ, औ, अं, छ; दद्या ... -झ.
[१०] अर्घ्योदकं] अ, ऊ, ऋ; अर्घ्योदक-औ, अं, छ, झ.
[११] हृदाञ्जलिम्] अ, ऊ, ऋ, औ, झ; हृदाञ्जलीः-अं; हृदा जलम्-छ.
[१२] द्वारस्योभयपार्श्वे] अ, ऊ, ऋ, छ; द्वारस्ते ... द्विपार्श्वे-औ; द्वारस्तेय द्विपार्श्वे-अं; ०पाश्वे-झ.
[१३] नन्दिकालबलिं] अ, ऋ, औ, अं, झ; नन्दीकाल ०-ऊ; नन्दिकां तु ०-छ.
[१४] ददेत्]- ऊ, ऋ, औ, अं, छ, झ; दिशेत्-अ.
[१५] उक्षं] अ, ऋ, औ, अं, छ, झ; उषं-ऊ.
[१६] मनीशं याम्यदेशे] अ, ऊ, ऋ; ब्राह्मी यमी निशां याम्यभे ... शे-औ; ब्राह्मी यमनिशं याम्यभेषशे-अं; मुनीशं०-छ; मुनिशं०-झ.
[१७] हि] अ, ऊ, छ; तु-ऋ, औ, अं। "झ" मातृकायां "हि" इति न दृश्यते।
[१८] मातृश्च] ऊ; मात्रश्च-अ, ऋ; हिमा-अं; मातृस्था-छ; मातृश्चा-झ; 'औ' मातृकायां "मात्रश्च" इति न दृश्यते।
[१९] वीरभद्रकम्] अ, ऊ, ऋ, औ, अं, छ; विर०-झ.
[२०] तत्स्थाने] अ, ऋ, औ, अं, छ; तत्स्थाप्य-ऊ; तस्तान-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]गणेशं [२]नैर्ऋते देशे [३]वारुणे च जनार्दनम्।
स्कन्दं [४]वायव्यदिग्भागे [५]दुर्गामुत्तरतो दिशि॥ १०॥
[६]क्षेत्रेशमीशे संपूज्य बलिं [७]दद्यात्स्वनामतः।
गोपुरे [८]वाद्यनिःशब्दं [९]शङ्खघोषसमन्वितम्॥ ११॥
द्वारस्य दक्षिणे वामे [१०]दण्डीशं भृङ्गिणं [११]ततः।
[१२]बलिं [१३]दद्याद्विशेषेण [१४]भूतपीठे प्रदक्षिणम्॥ १२॥

[इन्द्रादिलोकपालानां बलिदानादि]

[१५]इन्द्रं च पूर्वदिग्भागे [१६]चाग्नेय्यां [१७]वह्निमूर्तिनम्।
दक्षिणे धर्मराजं च [१८]नैर्ऋते [१९]निर्ऋतिं यजेत्॥ १३॥
वारुणे वरुणं चैव [२०]अनिलं [२१]वायुदेशके।

---

[१] गणेशं] अ, ऊ, ऋ, औ, छ, झ; गणेशा-अं.

[२] नैर्ऋते] अ, ऊ, ऋ, औ, अं, छ; नैरुति-झ.

[३] वारुणे च] ऊ, ऋ, छ; वारुणेऽर्च्य अ, औ, अं, झ.

[४] वायव्यदिग्भागे] अ, ऋ, औ, अं, छ, झ; च वायुदिग्भागे-ऊ.

[५] दुर्गामुत्तरतो दिशि] अ, औ, अं, छ; दुर्गां चोत्तरतो ०-ऊ; दुर्गामुत्तरके ... -ऋ; दुर्गमु०-झ.

[६] क्षेत्रेशमीशे] अ, ऊ, औ, छ, झ; ०मीश-अं; 'ऋ' मातृकायामयमर्धश्लोको न दृश्यते।

[७] दद्यात्स्वनामतः] अ, ऊ, औ, छ, झ; ०नामतम्-अं.

[८] वाद्यनिःशब्दं] अ, ऋ, औ, अं, छ; वादियतिः शब्दं-ऊ; वाद्यनिशब्दं-झ.

[९] शङ्खघोषसमन्वितम्] अ, ऊ, ऋ, औ, छ, झ; शब्द ०-अं.

[१०] दण्डीशं भृङ्गिणम्] सं० पा०; दण्डेशं०-अ, ऊ, ऋ, छ; दण्डेशमभ्रं गणं-औ; दण्डेशं भृङ्गणं-अं; दण्डेशं भृगिणें-झ.

[११] ततः] अ, ऋ, छ, झ; तथा-ऊ, औ, अं.

[१२] बलिं] अ, ऊ, ऋ, औ, छ, झ; 'औ, अं' मातृकयोः १२ श्लोकस्य तृतीयपादपूर्वे 'बलिं' [ललीं-अं] दद्या [दाद्यात्-अं] अव्वनामातं [स्वनामतं-अं] 'बलिं' इत्यधिकः पादो दृश्यते। अथापि १२ श्लोकस्य तृतीयपादान्ते 'आलयस्य तु पीठे वा' इत्यधिकः पादो दृश्यते।

[१३] दद्याद्विशेषेण] अ, ऊ, ऋ, छ, झ; ०विशेषण-औ; ०विशेषणा-अं.

[१४] भूतपीठे] अ, ऋ, झ; भूतपीठ-ऊ, औ, अं, छ.

[१५] इन्द्रं च] अ, ऋ, छ, झ; इन्द्रश्च-ऊ, औ, अं.

[१६] चाग्नेय्यां] अ, ऋ, औ; आग्नेय्यां-ऊ; चानेयां-अं; आग्नेयां-छ; आग्नेयाँ-झ.

[१७] वह्निमूर्तिनम्] अ, ऋ, औ; वह्निमूर्तिनः-ऊ; वन्हिमूर्तिनाम्-अं; वह्निमूर्धनं-छ; वह्नमूर्तिनम्-झ.

[१८] नैर्ऋते] अ, ऊ, ऋ, औ, अं, छ; नैरुतौ-झ.

[१९] निर्ऋतिं] अ, ऊ, ऋ, औ, अं, छ; नैरुतिं-झ.

[२०] अनिलं] अ, ऊ, ऋ, छ; अग्निं ... -औ; अग्निलं-अं; वायव्यं-झ.

[२१] वायुदेशके] अ, ऊ, ऋ, औ, अं, झ; वायुभागके-छ.

Public domain. Digitization Muthulakshmi Research Academy

[1]कुबेरं [2]सोमदिग्भागे [3]चेशानमीशदेशतः (के?) ॥ १४ ॥
निर्ऋतेर्दक्षिणे [4]विष्णुं [5]विरिञ्चिं [6]शम्भुवामतः।
[7]समभ्यर्च्य बलिं दद्यात् [8]स्वस्वनाम्ना [9]विशेषतः ॥ १५ ॥
[10]भूतपीठस्य [11]पुरतश्चास्त्रेश्वरबलिं ददेत्।
[12]अष्टादशगणानां च [13]तृप्तिरस्त्रेशपूजनात् ॥ १६ ॥
[14]आमोदादिबलिं [15]कुर्याद् [16]अग्रपीठे विशेषतः।
[17]आमोदमिन्द्रदेशे तु प्रमोदं [18]याम्यदेशके ॥ १७ ॥
पश्चिमे [19]सुमुखं चैव [20]दुर्मुखं चोत्तरे यजेत्।
[21]विघ्नकर्तारमीशे च अविघ्नं [22]कर्णिकोर्ध्वतः ॥ १८ ॥

---

[1] कुबेरं] अ, ऊ, ऋ, औ, अं, झ; कुबेर-छ.
[2] सोम] अ, ऊ, ऋ, औ, छ, झ; त्वोम-अं.
[3] चेशानमीशदेशतः] अ; ईशस्तत्रैव देशतः-ऊ; त्वीशाने ईशदेशतः-ऋ; त्वीशानं त्वीशदेशतः-औ; त्वीशाने ईशदेशकम्-अं; कृशाने ईशदेशतः-छ; ईशाने ईशदेशतः-झ.
[4] विष्णुं] अ, ऊ, ऋ, औ, छ, झ; विष्णु-अं.
[5] विरिञ्चिं] अ, ऊ, औ; विर ... -ऋ; विरिञ्च-अं; विरिञ्चं-छ; विरिञ्चि-झ.
[6] शम्भुवामतः] अ, औ, छ, झ; शम्भुवामके-ऊ; ... तः-ऋ; शम्भुवामतम्-अं.
[7] 'ऋ' मातृकायामयमर्धश्लोको न दृश्यते।
[8] स्वस्वनाम्ना] अ, छ; स्वस्वनाम-ऊ; स्वस्वनाम्नो-औ, अं; स्वस्वनाम्न-झ.
[9] विशेषतः] अ, ऊ, ऋ, औ, छ, झ; विशेषता-अं.
[10] भूतपीठस्य] अ, ऊ, ऋ, औ, अं, झ; ऋत०-छ.
[11] पुरतश्चास्त्रेश्वरबलिं] अ, ऋ; पुरतः अस्त्रेश्वर वलिं-ऊ; छ, पुरतश्छास्त्रे०-औ; पुरतच्छास्त्रे०-अं; छ; पुरतःअस्त्रे०-झ.
[12] अष्टादशगणां च] सं० पा०; ०गणांश्चैव-अ, ऊ; ०गणाश्चैव-ऋ, झ; ०गणं चैव-औ; ०गणचैवा-अं; काष्ठा दशगणाश्चैव-छ.
[13] तृप्तिरस्त्रेशपूजनात्] अ, ऋ; दीप्ताश्चित्रः सपूजयेत्-ऊ; तृप्तिरस्त्रेशपूजयेत्-औ; तृप्तिं रस्त्रेश पूजयेत्-अं; तृप्तिशस्त्रेण पूजयेत्-छ; रप्तिरस्त्रेशपूजयेत्-झ.
[14] आमोदादि] अ, ऋ, छ, झ; आमोदस्य-ऊ; अमो०- औ, अं.
[15] कुर्याद्] अ, ऊ, ऋ, औ, अं, छ; दद्याद्-झ.
[16] अग्रपीठे] अ, ऊ, ऋ, छ, झ; अग्रे पीठे-औ, अं.
[17] आमोदमिन्द्रदेशे] ऊ; आमोदश्चेन्द्र०-अ, छ; आमोदं चैन्द्र०-ऋ, झ; अमोदं चैन्द्र०-औ, अं.
[18] याम्यदेशके] अ, ऋ, छ, झ; दक्षिणे ततः-ऊ; सौम्यदेशके-औ, अं.
[19] सुमुखं] अ, ऊ, ऋ, औ, छ, झ; सुखं-अं.
[20] दुर्मुखं] अ, ऊ, ऋ, छ; दिब्मुखं-औ; दीर्मखं-अं; दुमुखश्-झ.
[21] विघ्नकर्तारमीशे च] अ, ऊ, ऋ, औ; विघ्नकर्तारमीशश्च-अं; विघ्नकर्तारमीशेन-झ; 'छ' मातृकायामयं पादो न दृश्यते।
[22] कर्णिकोर्ध्वतः] अ, ऋ; कर्णिकोर्ध्वके-ऊ; कर्णिकोर्ध्वतम्-अं; कर्णिकोध्वे तु-छ; कर्णिकोध्वतः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

समभ्यर्च्य बलिं [१]दद्यात् [२]स्तोत्रनृत्तादिगानकम्।
[३]अग्रपीठाग्रके कुर्याद् [४]बलिदेवप्रतृप्तये॥ १९॥

[आवरणदेवानां सर्वेषां बलिं दत्वा उत्सवबेरस्य स्वस्थाने स्थापनम्]

शनैः प्रदक्षिणं कुर्याद् [५]एवमावरणं प्रति।
पादप्रक्षालनं कृत्वा [६]द्वारदेशं प्रविश्य च॥ २०॥
देवाग्रे [७]स्थापयेद्देवं स्वस्थाने [८]स्थापयेत्तु वा।
[९]पाद्यमाचमनं चार्घ्यं [१०]पुष्पमारात्रिकं ददेत्॥ २१॥

[अन्ते मूलविम्बे समर्चनम्]

इन्दुशेखरमभ्यर्च्य [११]मूलबिम्बे समर्चयेत्।
[१२]नित्योत्सवविधिः [१३]प्रोक्तः [१४]सायरक्षाविधिं श्रृणु॥ २२॥

॥इति [१५]सूक्ष्मशास्त्रे [१६]नित्योत्सव(बलि) विधिः [१७]अष्टमः पटलः॥

---

[१] दद्यात्] अ, ऊ, ऋ, औ, अं, झ; ददेत्-छ.

[२] स्तोत्रनृत्तादिगानकम्] अ, ऊ, ऋ, औ, झ; स्तोत्रनृत्तं दिगानकम्-अं। 'छ' मातृकायामयं पादो न दृयते।

[३] अग्रपीठाग्रके] अ, ऊ, ऋ, छ, झ; अग्रपीठं ग्रहे-औ; अग्रपीठगृहे-अं.

[४] बलिदेवप्रतृप्तये] अ, छ, झ; बलिदेवस्य तृप्तये-ऊ; बलिदेवं च तृप्तये-औ; बलिदेवश्च तृप्तये-अं। 'ऋ' मातृकायां '१९' श्लोकस्य चतुर्थपादः '२०' श्लोकस्य प्रथमपादश्च न दृश्येते।

[५] एवमावरणम्] ऊ; एवमावरं-अ; ... ह्यावरणं प्रति-ऋ; देवमावरणं प्रति-औ; अं, छ, झ.

[६] द्वारदेशं] ऊ, औ, अं, छ, झ; द्वारदेवं-अ, ऋ.

[७] स्थापयेद्देवं स्वस्थाने] अ, ऊ, ऋ, औ, अं, छ; स्धापयेद्देवं स्वस्धाने-झ.

[८] स्थापयेत्तु वा] अ, ऊ, ऋ, छ; स्थापयेन्तु-औ; अं; स्धापयेत्तु वा-झ.

[९] पाद्यमाचमनं] अ, ऊ, औ, अं, छ, झ; पादमामनं-ऋ.

[१०] पुष्पमारात्रिकं] अ, ऊ, ऋ, औ, अं, छ; पुष्पमारत्रिकं-झ.

[११] मूलविम्बे] अ, ऋ, छ, झ; बलिविम्बे-ऊ; मूलबेरं-औ; कुबेरं-अं.

[१२] नित्योत्सवविधिः] अ, ऊ, ऋ, औ, छ; नित्योत्सवविधिं-अं, झ.

[१३] प्रोक्तः] अ, ऊ, औ; प्रोक्तं-ऋ, अं, छ, झ.

[१४] सायरक्षाविधिं] अ, ऊ, ऋ, औ, अं, छ; सायरक्षाविधि-झ.

[१५] सूक्ष्मशास्त्रे] अ, ऋ, औ, अं, छ, झ; सूक्ष्मागमे-ऊ.

[१६] नित्योत्सव (बलि) विधिः] सं० पा०; नित्योत्सवविधिः-अ, ऋ; नित्योत्सवविधि-ऊ, औ, अं; नित्योत्सवविधिनाम-छ; नित्योत्सवविधिं नाम-झ.

[१७] अष्टमः पटलः] अ, ऋ; पटलोऽष्टमः-ऊ; नवमपटलः हरिः ओम्-औ, अं; नवमः पटलः-छ; शततमपटलः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ [1]नवमः पटलः ॥

[[2]सायरक्षाविधिः]

सायरक्षाविधिं वक्ष्ये [3]श्रृणु त्वं [4]तत्प्रभञ्जन।

[शम्भोः नटनकालः]

[5]आदित्यास्तमये [6]काले [7]शम्भुरग्रे नटत्यतः ॥ १ ॥
[8]वादयेद्वाद्यकांश्चैव [9]तालेन [10]तालवित्क्रमात्।

[नयनोच्छिष्टनिवृत्त्यै सायरक्षापूजा]

[11]देवस्य नयनोच्छिष्टं [12]तन्निवृत्त्यर्थकारणम् ॥ २ ॥
[13]सायरक्षा [14]प्रकर्तव्या सर्वदेवेषु योग्यकम्।
विघ्नेश्वरं समभ्यर्च्य धूपदीपादिकं ददेत् ॥ ३ ॥

---

१ अयं पटलः अ (टि. १९१. पृ० ३५, ३६), ऊ (टि. ३८. पृ० ७५, ७६), ॠ (टि. ९७. पृ० ४१), औ (टि. ३४८. पृ० ६०, ६१), अं (टि. ३५३. पृ० ५१, ५२), छ (टि. ९६७. पृ० ३९, ४०), झ (टि. १०१६. पृ० २५१, २५२) इत्येतेषु कोशेषु दृश्यतं।

२ सायरक्षाविधिः] अ, झ; सायरक्षाविधिपटलः-ऊ; श्रीः-ॠ; अथ सायरक्षाविधिः-औ; "अं, छ" मातृकयोरिदं शीर्पकं न दृश्यते।

३ श्रृणु त्वं] अ, ऊ, ॠ, औ, छ; श्रृणुध्वं-अं, झ.

४ तत्प्रभञ्जन] अ, ऊ, ॠ, छ, झ; तं प्रभञ्जन-औ; तत्प्रभञ्जनम्-अं.

५ आदित्यास्तमये] अ, ऊ, औ, अं; आदित्यार्चास्तसमये-छ; आदित्यार्धास्तमये-झ; 'ॠ' मातृकायामयमर्धश्लोको न दृश्यते।; (पूर्वकारणे पटलः ३२. श्लो० ४-६).

६ "औ, अं, छ, झ" मातृकासु "काले" इति न दृश्यते।

७ शम्भुरग्रे नटत्यतः] अ; शम्भोरग्रे नटाद्यकम्-ऊ, छ; शम्भुमस्तार्धात्मनं श्रृणु-औ; शम्भु अस्ताध्यात्मनं श्रृणु-अं; शम्भुरग्रं नटाद्यकम्-झ.

८ वादयेद्वाद्यकांश्चैव] अ, ऊ, छ; ... कांश्चैव-ॠ; पादयेदद्यकां शैव-औ; पादयेयकांशेपा-अं; वादये वाद्यकं चैव-झ.

९ तालेन] अ, ऊ, ॠ, छ; तालनं-औ; तालं-अं; तालेना-झ.

१० तालवित्क्रमात्] अ, ऊ, ॠ; ०विक्रमात्-औ, अं, झ; तु भुवि क्रमात्-छ.

११ देवस्य नयनोच्छिष्टं] अ, ॠ, औ, अं, छ; देवस्यायनोच्छिष्टं-ऊ; देवस्य नयनोश्चिष्टं-झ; (पूर्वकारणे पटलः ३२. श्लो० २).

१२ तन्निवृत्त्यर्थकारणम्] ऊ, ॠ; ०त्यर्थकारणम्-अ, औ; तन्निप्रत्यर्थकारणम्-अं; विवृत्यर्थं प्रदोषके-छ; तनिप्रत्यर्थकारणम्- झ.

१३ सायरक्षा] अ, ऊ, ॠ, औ, अं, छ; सायं रक्षा-झ.

१४ प्रकर्तव्या] अ, ॠ; प्रकर्तव्यं-ऊ, औ, अं, छ, झ.

In Public domain. Digitization Muthulakshmi Research Academy

[पुण्याह कर्मणः स्थानम्]

[1]मण्टपेष्विष्टदेशे वा [2]स्थण्डिलं [3]शालिना कुरु।
पुण्याहं वाचयेत्तत्र प्रोक्षयेत्पुरुषेण तु॥४॥

[आरात्रिकस्याभ्यर्चनम्]

[4]त्रिपाद्यूर्ध्वे न्यसेद्धीमान् [5]अभ्यर्च्यारात्रिकं हृदा।
बहुरूपेण मन्त्रेण [6]दीपानारोप्य [7]देशिकः॥५॥

[गर्भगेहे आरात्रिकदानम्]

[8]गन्धपुष्पादिनाभ्यर्च्य [9]धूपदीपास्त्र (वस्त्र ?)मन्त्रतः।
गर्भगेहं [10]प्रविश्याथ पूर्वोक्तविधिना यजेत्॥६॥
धूपदीपं [11]ददेच्छम्भोः [12]पश्चादारात्रिकं ददेत्।

[नयनोच्छिष्ट आरात्रिके निवारणाय सर्षपादिद्रव्याणां निक्षेपणम्]

[13]सर्षपं च तिलं [14]निम्बपत्रं [15]कार्पासबीजकम्॥७॥
लवणेन समायुक्तं [16]भ्रामयेल्लिङ्गमूर्धनि।
[17]निक्षिप्यारात्रिके मध्ये [18]तदन्ते भसितं ददेत्॥८॥

---

[1] मण्टपेष्विष्टदेशे] अ; ०स्वेष्टदेशे-ऊ, छ; ०स्विष्टदेशे-ॠ; ०त्विष्टदेशे-औ; ०विष्टदेशे-अं; ०स्त्विष्टदेशे-झ.
[2] स्थण्डिलं] अ, ऊ, ॠ, औ, अं, छ; स्थण्डिलं-झ.
[3] शालिना] अ, ऊ, ॠ, औ, छ, झ; कालिना-अं.
[4] त्रिपादूर्ध्वे-ऊ, ॠ; त्रिपाद्यूर्ध्वे-अ, औ, अं; -कृपाद्यूर्ध्वे-छ; त्रिपादूर्ध्वे-झ.
[5] अभ्यर्च्यारात्रिकं] अ, ऊ, ॠ, औ, अं, झ; अभ्यर्च्य राकिकं-छ.
[6] दीपानारोप्य] अ, ॠ, औ, अं, छ, झ; दीपमारोप्य-ऊ.
[7] देशिकः] अ, ऊ, ॠ, औ, छ, झ; देशिका-अं.
[8] गन्धपुष्पादिनाभ्यर्च्य] अ, ऊ, औ, अं, झ; गन्धपुष्प ... -ॠ; ग्रह०-छ.
[9] 'ॠ' मातृकायां "६" श्लोकस्य द्वितीयतृतीयपादौ न दृश्येते।
[10] प्रविश्याथ] अ, ऊ, ॠ, औ, अं, छ; प्रविश्याथा-झ.
[11] ददेच्छम्भोः] अ, ऊ, ॠ, औ, छ; ददेच्छम्भो-अं, झ.
[12] पश्चादारात्रिकं] अ, ऊ, ॠ; पञ्चदारात्रिकं-औ, अं; पश्चादाराधिकं-छ; पञ्चादारात्रिकं-झ.
[13] सर्षपं च तिलं] अ, ऊ, ॠ, औ, छ, झ; सर्वपञ्चतिल-अं; (पूर्वकारणे, पटलः ३ श्लो० १३ उ०-१४ पू०).
[14] निम्वपत्रं] अ, ऊ, औ, छ, झ; ०पात्रं-ॠ; ०पत्र-अं.
[15] कार्पासबीजकम्] अ, ऊ, ॠ, औ, अं, झ; कर्पास०-छ.
[16] भ्रामयेल्लिङ्गमूर्धनि] अ, ऊ, ॠ, औ, छ, झ; ०मूर्धनी-अं.
[17] निक्षिप्यारात्रिके] ऊ अ, ॠ, औ; ०त्रिकं-निरीक्षिप्यारात्रिके-अं; निक्षिप्य रात्रिके-छ; निक्षिप्य रात्रिका-झ.
[18] तदन्ते०] ॠ, छ; तदन्तः भसितं-अ; तदन्तं०-ऊ; दन्तेतिसितदं-औ; दन्तेतिसितं-अं; तदन्ते भसिकं-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]मत्कन्यां वाथ [2]दासं(दासीं ?) वा [3]पुष्पं दत्त्वा [4]कृताञ्जलिः।

[वृषाग्रे आरात्रिकस्य निक्षेपणम्]

[5]आरात्रिकं तु [6]संगृह्य वाद्यघोषसमन्वितम्॥ ९॥
वृषाग्रे तु विनिक्षिप्य [7]पादप्रक्षालनं कुरु।

[आरात्रिककरणफलम्]

एवं कृत्वा तु [8]विधिवल्लोकरक्षाकरं भवेत्।
[9]सायरक्षाविधिः प्रोक्त [10]उपचारविधिं शृणु॥ १०॥

॥ इति [11]सूक्ष्मशास्त्रे [12]सायरक्षाविधिः [13]नवमः पटलः॥

---

[1] मत्कन्यां] अ, ऋ, अं, इ; ... त्कन्यां-औ; मत्कन्या-छ; 'ऊ' मातृकायामयमर्धश्लोको न दृश्यते।
[2] दासं] अ, ऋ, औ, अं, इ; दासा-छ.
[3] पुष्पं दत्त्वा] अ, ऋ; वपुर्दत्त्वा-औ; वपुं दत्वा-अं; ०दत्वा-छ, झ.
[4] कृताञ्जलिः] अ, ऋ, औ; क्षताञ्जलिम्-अं; ०लिम्-छ, झ.
[5] आरात्रिकं] अ, ऊ, ऋ, औ, अं, झ; आराधिकं-छ.
[6] संगृह्य] अ, ऋ; संग्राह्य-अं, ऊ, छ; सङ्ग्राह्य-झ 'औ' मातृकायां ९, १०. श्लोको न दृश्यते।
[7] पादप्रक्षालनं] अ, ऊ, ऋ, औ, छ, झ; पादपादप्रक्षालनं-अं.
[8] 'ऋ' मातृकायां "क्षाकरं भवेत्। सायरक्षाविधिः प्रोक्त उपचार" इति न दृश्यते।
[9] सायरक्षाविधिः प्रोक्त] अ, ऊ, ऋ, औ, छ; सायरक्षाविधि प्रोक्तं-अं; सायं रक्षाविधि प्रोक्तं-झ.
[10] उपचारविधिं] अ, ऊ, ऋ, औ, अं, छ; उपचारविधि-झ.
[11] सूक्ष्मशास्त्रे] अ, ऋ, औ, अं, छ, झ; सूक्ष्मागमे-ऊ.
[12] सायरक्षाविधिः] अ, ऋ; सायरक्षाविधि-ऊ, औ, अं; सायरक्षाविधिर्नाम-छ; सायरक्षाविधिं नाम-झ.
[13] नवमः पटलः] अ, ऋ; पटलो नवमः-ऊ; दशमपटलः हरिः ओम्-औ; दशमः पटलः-अं, छ; एकशतपटलः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ [1]दशमः पटलः ॥

[[2]उपचारविधिः]

उपचारविधिं वक्ष्ये [3]शृणु त्वं [4]तत्प्रभञ्जन।

[उपचारविधेः फलम्]

[5]भुक्तिमुक्तिप्रदं तच्च [6]पुत्रपौत्रसमृद्धिदम्॥ १ ॥

[चतुर्विधोपचाराः]

[7]सावश्यं चैव [8]सौभाग्यं सौख्यं [9]सौचक्रमेव च।
[10]चतुर्विधोपचारैस्तु [11]अर्चयेद्देशिकोत्तमः ॥ २ ॥

[सावश्यके दशोपचाराः]

[12]आसनावाहनं चैव पाद्यमाचमनार्घ्यकम्।
स्नानं वस्त्रं च गन्धं च [13]पुष्पं नैवेद्यमेव च॥ ३ ॥

---

[1] अयं पटलः अ (टि. १९१. पृ० ३६-३९); ऊ (टि. ३८. पृ० ७७-८३), ऋ (टि. ९७. पृ० ४२-४४); औ (टि. ३४८. पृ० ६२-६५); अं (टि. ३५३. पृ० ५३-५६); छ (टि. ९६७. पृ० ४०-४४); झ (टि. १०१६. पृ० २५२, २५५) इत्येतेषु कोशेषु दृश्यते।

[2] उपचारविधिः] अ, झ; ०विधिपटलः-ऊ; अथ ०-औ; हरिः ओम्-अं। "ऋ, छ" कोशयोरिदं शीर्षकं न दृश्यते।

[3] शृणु त्वं] अ, ऊ, ऋ, छ; शृणुध्वं-औ, अं, झ.

[4] तत्प्रभञ्जन] अ, ऊ, ऋ, छ; ०ञ्जनाः-औ; ०ञ्जना-अं, झ.

[5] भुक्तिमुक्तिप्रदं तच्च] अ; ०प्रदातव्यं-ऊ, ऋ, अं, छ, झ; ०प्रदातव्यं (दं दिव्यं)-औ.

[6] पुत्रपौत्रसमृद्धिदम्] अ, ऋ, औ, अं, छ; ०विवृद्धिदम्-ऊ; ०समिद्धिदम्-झ.

[7] सावश्यं] अ, ऊ, ऋ, औ, अं, छ; सावश्लश-झ; 'औ, अं' मातृकयोर्द्वितीयतृतीयश्लोकयोः पादानुक्रमोऽन्यमातृकासु न समः द्वितीयश्लोकस्य द्वितीयपादो न दृश्यते।
सावश्यं चैव साकाल्यं (साकल्यं-अं) पाद्यमाचमनार्घ्यकम्। स्नानं वस्त्रं च गन्धं च पुष्पनैवेद्यमेव च॥
साभवं चैव संयुक्तं चतुर्विधोपचारकैः। चतुर्विधोपचारैस्तु ह्यर्चयेद् (अर्चयेद्-अं) देशिकोत्तमः॥
आसनावाहनं चैव षोडशोपचारमेव च।

[8] सौभाग्यं] अ, ऊ, ऋ, छ, झ; साकाल्यं-औ; साकल्यं-अं.

[9] सौचक्रम्] अ, ऊ, छ, झ; सौधक्षम्-ऋ.

[10] चतुर्विधोपचारैस्तु] अ, ऋ, औ, अं, छ; चतुर्विधोपचारास्तु-ऊ; चतुर्विथोपचारेस्तु-झ.

[11] अर्चयेद्] अ, ऊ, ऋ, अं, छ, झ; ह्यर्चयेद्-औ.

[12] आसनावाहनं] अ, ऋ, औ, अं, झ; आसनं वाहनं-छ; 'ऊ' मातृकायामिदं अर्धं न दृश्यते।

[13] पुष्पं] अ, ऊ, ऋ, छ; पुष्प-औ, अं, झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]दशोपचारमेवं च [2]सावश्यकमिति स्मृतम्।

[सौभाग्ये षोडशोपचाराः]

[3]आसनावाहनं चैव पाद्यमाचमनार्घ्यकम्॥४॥
स्नानं वस्त्रं च गन्धं च [4]पुष्पं नैवेद्यमेव च।
[5]ताम्बूलं चैव धूपं [6]च दीपं [7]चापि तथैव च॥५॥
आरात्रिकं च भसितं [8]चुलुकोदकं [9]ततः परम्।
[10]षोडशैरुपचारेण(चारैस्तु ?) [11]सौभाग्यकमिति स्मृतम्॥६॥

[सौख्ये पञ्चविंशत्युपचाराः]

आसनावाहनं चैव पाद्यमाचमनार्घ्यकम्।
[12]स्नानं [13]वस्त्रं च गन्धं च [14]पुष्पमाभरणं तथा॥७॥
नैवेद्यं चैव [15]पानीयं ताम्बूलं [16]हुतमेव च।
[17]नित्योत्सवं च धूपं च [18]दीपमारात्रिकं तथा॥८॥
[19]वेदस्तोत्रध्वनिर्युक्तनृत्तसंगीतवाद्यकम्।

---

[1] दशोपचारमेवं च] अ, ऊ, औ, छ, झ; दशो ... -ऋ; ०मवेञ्च-अं.
[2] सावश्यकम्] अ, ऊ, छ, झ; सा ... च्यकम्-औ; सावच्यकम्-अं। 'ऋ' मातृकायामयं पादो न दृश्यते।
[3] आसनावाहनं चैव] अ, ऊ, छ, झ; ... व-ऋ; आसन ... वा-औ; आसनावरणं चैव-अं.
[4] पुष्पं] अ, ऊ, ऋ, औ, छ; पुष्प-अं, झ.
[5] ताम्बूलं चैव धूपं] अ, ऊ, औ, अं, छ, झ; ताम्बू ... -ऋ.
[6] च दीपं] अ, औ, अं; स्याद्दीपं-ऊ, झ; ... पं-ऋ; स्याद्दीपश्च-छ.
[7] चापि तथैव] अ, ऋ, औ, अं, छ, झ; नैवेद्यमेव-ऊ.
[8] चुलुकोदकं] अ, ऊ, ऋ, औ, अं, छ; चुलुकोदं-झ.
[9] ततः] अ, ऋ, छ, झ; अतः-ऊ, औ, अं.
[10] षोडशैरुपचारेण] अ; षोडशोपचारेण-ऊ; षोडशैवोपचारेण-ऋ, औ, अं, झ; षोडशैवोपचारो-छ.
[11] सौभाग्यकम्] अ, ऊ, ऋ, औ, अं, झ; असौ०-छ.
[12] स्नानं] अ, ऊ, औ, छ, झ; स्नान-ऋ, अं.
[13] 'ऋ' मातृकायां "वस्त्रं च गन्धं च" इति न दृश्यते।
[14] पुष्पमाभरणं] अ, ऋ, औ, अं, छ, झ; पञ्चमावरणं-ऊ.
[15] पानीयं] अ, ऊ, ऋ, औ, छ; पानीय-अं; पानियं-झ.
[16] हुतमेव च] अ, औ, अं, छ, झ; सुतमेव च-ऊ; 'ऋ' मातृकायां "हुतमेव च" इति न दृश्यते।
[17] 'ऋ' मातृकायामिदं अर्धं न दृश्यते।
[18] दीपमारात्रिकं] अ, ऊ, औ, झ; दीपारात्रिकं-अं; दीपामाराधिकं-छ.
[19] वेदस्तोत्रध्वनिर्युक्तनृत्तसंगीतवाद्यकम्] अ; ०ध्वनियुक्तं नर्तनं गीतवाद्यकम्-ऊ; ०धनीयुक्तं नृतनं गीतवाद्यकम्-ऋ; वेदं स्तोत्रं पुराणं च गीतवाद्यादिकं क्रमात्-औ; वेदस्तोत्रं पुराणं च गीतवाद्यञ्चकं क्रमात्-अं; ०ध्वनिर्युक्तं नर्तनं गीतवाद्यकम्-छ; ०ध्वनिर्युक्तं नृत्तगीतं च वाद्यकम्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]भस्ममन्त्रार्पणं पञ्चविंशत्सौख्यमिति स्मृतम्॥ ९॥

[सौचक्रे षड्त्रिंशत्युपचाराः]

[2]आसनावाहनं चैव [3]सान्निध्यं पाद्यमेव च।
आचमनार्घ्यदानं [4]च स्नानं [5]वस्त्रोपवीतकम्॥ १०॥
भूषणं गन्धपुष्पं च तथैवावरणान्वितम्।
नैवेद्यं चैव [6]पानीयं [7]करप्रक्षालनमेव च॥ ११॥
मुखवासं च ताम्बूलं [8]हुतं नित्योत्सवं तथा।
[9]धूपं दीपं [10]तथारात्रिव्यजनं चामरं तथा॥ १२॥
[11]छत्रं च दर्पणं [12]वेदं स्तोत्रं गानं च नृत्तकम्।
[13]गीतं वाद्यं च [14]पञ्चाङ्गश्रवणं [15]भस्म एव च॥ १३॥
[16]चाष्टपुष्पं [17]स्यादञ्जनं च चुलुकोदकम्।
[18]पञ्चकालेषु मतिमान् पाद्यमाचमनं कुरु॥ १४॥

---

१ भस्ममन्त्रार्पणं पञ्चविंशत्सौख्यमिति स्मृतम्] ऊ, झ; ०समन्वितम्-अ; भस्ममन्त्रार्पणं पञ्च ... -ऋ; भसितं भस्म मा (चा) दाय विंशत्सौख्यमिति स्मृतम्-औ; भसितं भस्ममादाय विं ... त्सौख्यमिति स्मृतम्-अं; ०संख्यमिति स्मृतम्-छ.

२ आसनावाहनं] अ, ऊ, औ, अं, झ; ... सनावाहनं-ऋ; आसनं वाहनं-छ.

३ सान्निध्यं] अ, ऊ, ऋ, औ, छ, झ; वान्नियं-अं.

४ च स्नानं] अ, ऊ, ऋ, औ, अं, छ; चै स्नान-झ.

५ 'अं' मातृकायां "स्त्रोप" इति न दृश्यते।

६ पानीयं] अ, ऊ, ऋ, छ; पानीय-औ, अं; पानियं-झ.

७ करप्रक्षालनमेव च] अ; करोद्वर्तनमेव च-ऊ, औ; ... व च-ऋ; करोद्यर्तनमेव च-अं; करोतु दिनमेव च-छ; करोद्वत्तनमेव च-झ.

८ हुतं] अ, ऋ, औ, अं, झ; सुतं-ऊ; हुत-छ.

९ धूपं दीपं] अ; धूपदीपं-ऊ, औ, अं, छ; "ऋ, झ" मातृकयोरिदं अर्धं न दृश्यते।

१० तथारात्रिव्यजनं] अ, छ; तथारात्री०-ऊ; ०व्यञ्जनं-औ; तथारातिव्यञ्जनं-अं.

११ छत्रं च दर्पणं] अ, ऊ, औ, अं, छ, झ; ... णं-ऋ; 'औ, अं' मातृकयोः '१३' श्लोको '१४' श्लोकस्य च प्रथमार्धं न दृश्येते। तत्र हि "छत्रं च दर्पणं चाष्टपुष्पं (पुष्प-अं) तालवृन् (तालबृन्दं-अं) तथैव च। नीराजनस्य (नीराञ्जनस्य-अं) दीपायामञ्जनं चतुकोदकम्॥" इति श्लोकोदृश्यते।

१२ वेदं स्तोत्रं गानं च नृत्तकम्] अ, ऋ; वेदस्तोत्रगानं ०-ऊ; ०नर्तनम्-छ, झ.

१३ गीतं वाद्यं] अ, छ; गीतवाद्यं-ऊ, ऋ, झ.

१४ पञ्चाङ्गश्रवणं] अ, ऊ, ऋ; ०श्रवणा-छ; पञ्चागं श्रवणं-झ.

१५ भस्म एव च] ऊ भस्ममेव च अ, झ; भ ... -ऋ; भस्मारमेव च-छ.

१६ चाष्टपुष्पं] अ; मन्त्रार्पणं चाष्टपुष्प-ऊ; ... चाष्टपुष्पं-ऋ; मन्त्रार्पणं च पञ्च पुष्पं-छ; मन्त्रार्पणं चाष्टपुष्पं-झ.

१७ स्यादञ्जनं च] अ, ऋ, छ; स्यार्चनं-ऊ; स्यादञ्जन-झ.

१८ पञ्चकालेषु] अ, ऊ, ऋ, औ, अं, छ; ०काले तु-झ। "औ, अं, छ, झ" मातृकासु '१४' श्लोकस्य द्वितीयार्धं '१५' श्लोकस्य च प्रथमार्धं '१६' श्लोकान्ते दृश्येते।

In Public domain. Digitization Muthulakshmi Research Academy

[१]पूजादौ चाभिषेकान्ते पूजान्ते च विशेषतः।
[२]षड्त्रिंशदुपचारेण [३]सौचक्रमिति विद्यते॥ १५॥

[पाद्याचमनदानकालः]

[४]स्नानादौ च तदन्ते च [५]नैवेद्यादौ [६]तदन्तके।
[७]धूपादौ च विशेषेण पाद्यमाचमनं ददेत्॥ १६॥

[अर्घ्यदानकालः]

[८]विलेपने च [९]नैवेद्ये [१०]चोत्सवान्ते विशेषतः।
[११]त्रिकालेष्वर्घ्यदानं स्यात् [१२]त्रिकाले गन्धमाचरेत्॥ १७॥

[अष्टपुष्पदानकालः]

[१३]आवाहनार्घ्यकाले च स्नानान्ते धूपकालके।
पूजान्ते तु [१४]प्रयोक्तव्यम् [१५]अष्टपुष्पं प्रभञ्जन॥ १८॥

[नैवेद्यदानकालः]

स्नानान्ते [१६]चार्चनान्ते च [१७]नैवेद्यं स्याद्द्विकालके।
[१८]पूजाकालेऽर्चयेत्पूर्वं स्नानान्ते [१९]चार्चनान्तके॥ १९॥

---

[१] पूजादौ चाभिषेकान्ते] अ, ऋ, औ, अं, छ, झ; पूजादावभिषेकान्ते-ऊ.

[२] षड्त्रिंशदुपचारेण] अ, ऊ, ऋ, छ; षट् त्रिंश द्दीपचारेण-औ, अं; षट् त्रिंश उपचारेण-झ.

[३] सौचक्रमिति विद्यते] सं० पा०; सौचक ... द्यते-अ; सौचकं त्विति०-ऊ, औ, झ; ... ते-ऋ; सौख्यक द्विति०-अं; सौतकं जाति ०-छ.

[४] स्नानादौ च तदन्ते च] अ, ऊ, ऋ, औ, छ, झ; स्नानान्तौ तदनन्ते चा-अं.

[५] नैवेद्यादौ] झ; निवेद्यादौ-अ, ऊ, ऋ, छ; नैवेद्यान्ते-औ, अं; नैवेद्यादौ-झ.

[६] तदन्तके] औ, अं, छ, झ; तदन्तिके-अ, ऊ, ऋ; तदन्तके-औ, अं, छ, झ.

[७] 'ऋ' मातृकायामिदं अर्धं न दृश्यते।

[८] विलेपने च] अ, ऊ, झ; ... च-ऋ; विलेपनं च-औ, अं; स्नपने चैव-छ। "औ, अं, छ, झ" मातृकास्विदमर्धं '१८' श्लोकस्य प्रथमार्धान्ते दृश्यते।

[९] नैवेद्ये] सं० पा०; नैवेद्यं-अ, ऊ, ऋ, छ, झ; नैवेद्या-औ; नैवेद्य-अं.

[१०] चोत्सवान्ते] अ, ऊ, ऋ, औ, अं, छ; उत्सवान्ते-झ.

[११] त्रिकालेष्वर्घ्यदानं] अ, ऊ, ऋ, औ, छ, झ; ०चाप्यदानं-अं.

[१२] त्रिकाले गन्धमाचरेत्] औ, अं, झ; त्रिकाले गन्धमर्चयेत्-ऊ; त्रिकाले ... त्-अ; त्रि ... त्-ऋ; ०चण्डमाचरेत्-छ.

[१३] आवाहनार्घ्यकाले च] अ, ऊ, ऋ, औ, अं; ०कालेपु-छ, झ.

[१४] प्रयोक्तव्यम्] अ, ऋ, छ, झ; प्रदातव्यम्-ऊ; प्रयोक्तव्या-औ, अं.

[१५] अष्टपुष्पाणि योजयेत्] अ, ऊ, ऋ, औ, अं, छ; अष्टपुष्पं प्रभञ्जना-झ.

[१६] चार्चनान्ते च] अ, ऊ, ऋ, औ; चार्चनानैवा-अं; चार्घ्यकान्ते-छ; चाचनान्ते-झ.

[१७] नैवेद्यं स्याद्द्विकालके] अ, ऋ, झ; ०त्रिकालके-ऊ; द्विकाले एककालके-औ, अं; नेवेद्यं स्यादकालके-छ.

[१८] पूजाकालेऽर्चयेत्पूर्वं] अ; ०तु तत्पूर्वं-ऊ, औ, अं, झ; पृ ... पूर्वैः-ऋ; पूजाकाले तत्पूर्वं ... -छ.

[१९] चार्चनान्तके] अ, ऊ, ऋ, औ, अं, झ; चार्चभा ... -छ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]निवेद्यान्ते विशेषेण [2]धूपं दीपं समाचरेत्।
[3]चतुष्काले तु मतिमान् [4]धूपं दीपं [5]ददेत्प्रभुः॥ २०॥

[महाघण्टाताडनकालः]

[6]स्नानादौ च तदन्ते च अर्चनान्ते तथैव च।
[7]निवेद्यादौ चोत्सवान्ते [8]च तदन्ते [9]नर्तनान्तके॥ २१॥
[10]एवमादिषु कालेषु [11]महाघण्टां तु ताडयेत्।

[वाद्यघोषकालः]

स्नानकाले [12]निवेद्ये च बलिभ्रमणकालके॥ २२॥
धूपदीपादिकाले च [13]उषःकाले समन्विते।
[14]द्विकाले च विशेषेण वाद्यघोषं तु कारयेत्॥ २३॥

[गणिकानर्तनकालः]

[15]आरात्र्याराधने काले [16]पूजान्ते तु विशेषतः।
बलिभ्रमणकाले च [17]तल्लक्षणपुरःसरम्॥ २४॥
त्रिषु कालेषु [18]गणिका [19]मद्दासी नर्तनं चरेत्।

---

[1] निवेद्यान्ते विशेषेण] अ; नैवेद्यं तु०-ऊ; निदेद्य ... -ऋ; वस्त्रमालादिकं दत्वा-औ; वस्त्रमालादिकं कृत्वा-अं; ०प्रदोषे च-झ। "छ" मातृकायामयं पादो न दृश्यते।
[2] धूपं दीपं] अ; धूपदीपं-ऊ, औ, अं, छ; धूपदीप-झ; 'ऋ' मातृकायामिमौ द्वौ पादौ न दृश्येते।
[3] चतुष्काले तु] अ, औ, अं, छ; चतुष्कालेषु-ऊ; रसकाले तु-झ.
[4] धूपं दीपं] अ; धूपदीपं-ऊ, ऋ, औ, अं, छ, झ.
[5] ददेत्प्रभुः] अ, ऋ, अं; ददेत्प्रभोः-ऊ, औ, छ; ददेत्प्रभो-झ.
[6] स्नानादौ] अ, ऊ, ऋ, औ, छ, झ; सनादौ-अं.
[7] निवेद्यादौ चोत्सवान्ते] अ, छ; ०चोत्सवादौ-ऊ; निवेद्य ... न्ते-ऋ; निवेद्यान्ते०-औ, अं; नैवेद्यादौ०-झ.
[8] च तदन्ते] अ, ऋ, औ; तदन्ते-ऊ, छ; चादन्ते-अं; तद ... -झ.
[9] नर्तनान्तके] अ, ऊ, ऋ, छ; नृत्तके तथा-औ, अं; ... नान्तके-झ.
[10] एवमादिषु] अ, औ; विमानादिषु-ऊ; एवमादि च-ऋ, अं; एवमादिक-छ; एवमादीषु-झ.
[11] महाघण्टां] अ, ऊ, ऋ, औ, अं, छ; महाखण्टां-झ.
[12] निवेद्ये] अ, ऋ, औ, अं, छ; निवेद्यं-ऊ; निवेद्या-झ.
[13] उषः काले] अ, ऊ, औ, अं, छ; उषः काल-ऋ; उषकाले-झ.
[14] द्विकाले च विशेषेण] अ, ऊ, औ, अं, झ; द्विका ... षेण-ऋ; अकाले०-छ.
[15] आरात्र्याराधने काले] ऊ; आरात्रिरायने काले-अ; आरात्रि ... -ऋ; ०करथा(याराध)काले-औ; ०यारथाकाले-अं; आराकियाराधकाले-छ; आ ... त्रियरथाकाले-झ.
[16] 'ऋ' मातृकायामिमौ द्वौ पादौ न दृश्येते।
[17] तल्लक्षण] अ, ऊ, औ, अं, झ; ... ण-ऋ; तल्लक्षरा-छ.
[18] गणिका] अ, ऊ, ऋ, औ, अं, छ; गणिकां-झ.
[19] मद्दासी नर्तनं चरेत्] अ, ऊ; मद्दास्या नृत्तनं ०-ऋ; मद्दलं नृत्तमेव च-औ, अं; मद्दास्यानर्चनं०-छ; मन्दास्यानर्तनं०-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[शंखघोषणकालः]

स्नानादौ च तदन्ते च [१]पूजान्ते च विशेषतः ॥ २५ ॥
[२]नैवेद्योत्थापने काले पुष्पकाले तथैव च।
पञ्चकाले विशेषेण [३]शङ्खध्वनिं समाचरेत् ॥ २६ ॥

[धूपदीपदानकालः]

[४]स्नानकाले [५]निवेद्ये च [६]धूपं दीपं [७]तदन्तके।

[ऋगाद्यध्ययनकालः]

[८]ऋगाद्यध्ययनं [९]कुर्यात्त्रिकाले चैव बुद्धिमान् ॥ २७ ॥
[१०]स्नाने नैवेद्यधूपे च पूजान्ते च विशेषतः।

[भक्तानां भाषास्तोत्रादिगानकालः]

[११]भक्तादिस्तोत्रभाषाद्यैः चतुष्काले समाचरेत् ॥ २८ ॥
स्नानकाले [१२]निवेद्ये च [१३]उत्सवे धूपकालके।

[पटावरोहणादि]

[१४]पटावरोहणं कार्यं [१५]चतुष्कालं समाचरेत् ॥ २९ ॥
[१६]एतेनैवोपचारेण [१७]एककालं समाचरेत्।

---

[१] 'ऋ' मातृकायां "जान्ते च विशेष" इति न दृश्यते।

[२] नैवेद्योत्थापने] अ, ऊ, ऋ, औ, अं; नैवेद्यस्थापन-छ; नैवेद्याथापने-झ.

[३] शङ्खध्वनिं समाचरेत्] अ, ऊ, छ; शङ्खध्वनि०-ऋ, अं; शङ्खध्वनिमथाचरेत्-औ; शङ्खध्वनी०-झ.

[४] स्नान] अ, ऊ, ऋ, छ, झ; या(बा)न-औ; बानकाले-अं.

[५] निवेद्ये] अ, ऋ, औ, छ, झ; निवेद्यं-ऊ; निवेद्या-अं.

[६] धूपं दीपं] अ; धूपदीपं-ऊ; धूपदीप-ऋ, अं, छ, झ; धूपदीपौ-औ.

[७] तदन्तके] अ, ऊ, औ, अं, छ; तदन्तिके-ऋ; दन्तके-झ.

[८] ऋगाद्यध्ययनं] ऊ; ऋगद्यध्ययनं-अ; ऋ, औ; ऋगाद्यायनं-अं; ऋगादध्ययनं-छ; ऋगादध्याय ... -झ.

[९] 'झ' मातृकायां 'कु' इति 'त्त्रि' इति च द्वेऽक्षरे न दृश्येते।

[१०] स्नाने] अ, ऊ, अं, छ, झ; स्नान-औ। 'ऋ' मातृकायामयं श्लोको न दृश्यते।

[११] भक्तादिस्तोत्रभाषाद्यैः] ऊ, औ, छ; भक्त्यादिस्तोत्रभाषाद्यैः-अ; भक्तादिस्तोत्रभाषाद्यै-अं, झ.

[१२] निवेद्ये] अ, ऊ, औ, अं, छ; निवेद्या-झ.

[१३] उत्सवे] अ, ऊ, ऋ, अं, छ, झ; ह्युत्सवे-औ.

[१४] पटावरोहणं कार्यं] ऊ; पटावरोहं प्रकर्तव्यं-अ; पटाहवरोहं कर्तव्यं-ऋ; पटापरोहः कर्तव्यः-औ; पाट ... कर्तव्यं-अं; पटावरोहं कर्तव्यं-छ, झ.

[१५] चतुष्कालं] अ, ऊ, ऋ, छ, झ; चतुष्कल-औ, अं.

[१६] एतेनैवोपचारेण] छ; एतेशामपचारेण-अ, ऊ, ऋ; एतानामु०-औ, अं; एतानिमु०-झ.

[१७] एककालं] अ, ऊ, ऋ, अं, छ; ए (त्वे) ककालं-औ; ... कालं-झ.

In Public domain. Digitization Muthulakshmi Research Academy

एवं क्रमेण विधिवत् [१]संध्यैकेन समाचरेत्॥ ३०॥
[२]त्रिपादेन [३]त्रिनाडिका [४]सावश्यकमिति स्मृतम्।
सौभाग्यं पञ्चनाडी तु सौख्यकं [५]याममेव च॥ ३१॥
[६]सौचक्कं [७]दशनाडी स्यादेवं संपूज्य देशिकः।
[८]कालातिक्रमणाद्दोषं न्यूनं चेत्तु न दोषभाक्॥ ३२॥
एवं क्रमेण चाभ्यर्च्य सर्वसंपत्समृद्धिदम्।

॥इति [९]सूक्ष्मशास्त्रे [१०]उपचारविधिः [११]दशमः पटलः॥

---

१ संध्यैकेन] अ, ऋ, औ, छ; सर्वेषां तु-ऊ; स ... केन-अं.
२ त्रिपादेन] अ, ऊ, ऋ, छ; त्रिपादे च-औ; त्रिपादे-अं, झ.
३ त्रिनाडिका] अ, छ; त्रिनाड्या तु-ऊ; त्रिनाडीका-ऋ; त्रिनाडी च-औ, अं; त्रयनाडी स्यात्-झ.
४ सावश्यकम्] ऊ, ऋ, औ, अं, छ, झ; सावयकम्-अ.
५ यामम्] अ, ऊ, औ, छ, झ; धामम्-ऋ; ... म ... -अं.
६ सौचक्कं] अ, ऊ, छ, झ; सौचं-ऋ; सौख्यकं-औ, अं.
७ दशनाडी] अ, ऊ, ऋ, औ, अं, छ; दकनडी-झ.
८ कालातिक्रमणाद्दोषं न्यूनं चेत्तु न] अ, ऊ; ०दोषां नीनादिकं च-औ; कालादिक्रमणाद्दोषादनीनादिकं च-अं; कालादि०-छ; ०न्युनं चेत्तु न-झ। 'ऋ' मातृकायां '३२' तमश्लोकस्य तृतीयचतुर्थपादौ '३३' तमश्लोकस्य च प्रथमपादो न दृश्यन्ते।
९ सूक्ष्मशास्त्रे] अ, ऋ, औ, अं, छ, झ; सूक्ष्मागमे-ऊ.
१० उपचारविधिः] अ, ऋ; उपचारविधि-ऊ; क्रियापादे उपचारविधि-औ; क्रियापादे उपचारविधिर्-अं; क्रियापादे उपचारविधिर्नाम-छ; क्रियापादे उपचारविधिं नाम-झ.
११ दशमः पटलः] अ, ऋ; पटलो दशमः-ऊ; एकादशः पटलः-औ, छ; एकादशपटलः-अं; द्विशतपटलः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

[१] ॥ एकादशः पटलः ॥

[[२]वास्तुहोमविधिः]

वास्तुहोमविधिं वक्ष्ये [३]शृणु त्वं तत्प्रभञ्जन।

[वास्तुहोमकालः स्थानं च]

[४]स्थापने प्रोक्षणे चैव [५]गर्भन्यासे तथैव च॥ १॥
[६]विमानस्थापने चैव [७]चोत्सवे [८]यागमण्डपे।
[९]मण्डपे च सभास्थाने सकलस्थापनेऽपि च॥ २॥
[१०]आद्योपलेष्टकास्थाने [११]सत्रे च [१२]नृत्तरङ्गके।

---

[१] अयं पटलः अ (टि. १९१. पृ० ३९-४१); ऊ (टि. ३८. पृ० ८४-८८); ऋ (टि. ९७. पृ० ४४-४६ ३२, ३३); औ (टि. ३४८. पृ० ६६-६८); अं (टि. ३५३. पृ० ५६-५९); छ (टि. ९६७. पृ० ४४-४६); झ (टि. १०१६. पृ० २५५-२५८) इत्येतेषु कोशेषु दृश्यते। 'ऋ' मातृकायां '१-१८' श्लोकाः ४४-४८ पृष्ठेषु अवशिष्टोभागः (३२-३३) पृष्ठयोश्च दृश्यन्ते।

[२] वास्तुहोमविधिः] सं० पा०; वास्तुहोम (पूजा) विधिपटलः-ऊ; हरिः ओम् अथ वास्तुहोमविधिः-औ; हरिः ओम्-अं; वास्तुहोमम्-झ; 'अ, छ' कोशेष्विदं शीर्षकं न दृश्यते।

[३] शृणु त्वं] अ, ऊ, ऋ, औ, छ; शृणुध्वं-अं, झ.

[४] स्थापने प्रोक्षणे] अ, ऊ, ऋ, छ; स्थापनं प्रोक्षणं-औ, अं; स्धापने०-झ.

[५] 'झ' मातृकायां प्रथमश्लोकस्य चतुर्थपादो द्वितीयश्लोकस्य प्रथमपादश्च न दृश्येते।

[६] 'औ, अं' मातृकयोः प्रथमश्लोकान्ते अधोनिर्दिष्टौ द्वावधिकौ श्लोकौ दृश्येते।
"लिङ्गस्य स्थापनं चैव बेराणां स्थापनं क्रमात्। बेरादिचण्डपर्यन्तं वास्तुहोमविधिक्रमात्॥
संप्रोक्षणाष्टबन्धेन स्थापनं शान्तिहोमकम्। उत्सवानां समायुक्षं वास्तुहोमं समाचरेत्॥
"-औ, "लिङ्गस्थापनेश्चैव बेराणां स्थापनं क्रमात्। शौरादिचण्डपर्यन्तं वास्तुहोमं विधिक्रमात्॥
संप्रोक्षणाष्ट-बन्धेन स्थापनं शान्तिहोमकम्। उत्सवानां समायुक्तं वास्तुहोमं समाचरेत्॥"- अं.

[७] चोत्सवे] अ, ऊ, ऋ, औ, छ; उत्सवे-झ.

[८] यागमण्डपे] अ, ऊ, ऋ, औ; वाग०-छ; ०मण्टपे-झ.

[९] मण्डपे च सभास्थाने सकलस्थापनेऽपि च] अ, ऋ, औ, छ; मण्टपे च सभास्धाने सकलस्धापनेऽपि च-झ। 'ऊ' मातृकायामिदं अर्धं न दृश्यते। 'अं' मातृकायां द्वितीयतृतीयश्लोकौ न दृश्येते।

[१०] आद्योपलेष्टका स्थाने] औ; ०डोने अ; ०योगे-ऊ; ०गेने-ऋ; अद्योपलेष्टकाधाने-छ; ०कस्धाने-झ.

[११] सत्रे] अ, ऋ, औ, छ, झ; शक्ते-ऊ.

[१२] नृत्तरङ्गके] ऊ, ऋ, औ, छ, झ; ०नृत्तारम्भके-अ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]प्रायश्चित्तादिके चान्ये (चान्य ?) [2]स्थापने च [3]समाचरेत्॥ ३॥

[वास्तुपूजाविहीने दोषः]

[4]वास्तुपूजाविधिः प्रोक्तः [5]सर्वसम्पत्समृद्धिदः।
[6]वास्तुपूजाविहीनं [7]स्यात्तद्राष्ट्रं [8]च विनश्यति॥ ४॥
[9]तस्मात्सर्वप्रयत्नेन [10]वास्तुपूजां समाचरेत्।

[आचार्यनियमादि]

[11]आचार्यः शिष्यसंयुक्तः पूर्ववत्स्नानमाचरेत्॥ ५॥
[12]सुशुद्धवस्त्रैराच्छाद्य [13]सकलीकरणं कुरु (गुरुः?)।
सामान्यार्घ्यं च [14]संकल्प्य विघ्नेशं पूजयेत्ततः॥ ६॥
पुण्याहं वाचयेद्धीमान् पञ्चगव्यं तु विन्यसेत्।
तदग्रे [15]स्थण्डिलं कृत्वा [16]शालिभिर्विमलैः [17]शुभैः॥ ७॥

[वास्तुमण्डललेखनम्]

नन्दनन्दपदं कृत्वा [18]मध्ये नवपदं लिखेत्।

---

[1] प्रायश्चित्तादिके चान्ये] ऊ, झ; ०काश्चान्ये अ; ०कान्येव-औ; ०कस् ... ने-छ। 'ऋ' मातृकायां तृतीय श्लोकस्य तृतीयचतुर्थ-पादौ चतुर्थश्लोकस्य च प्रथमपादश्च न दृश्यन्ते।
[2] स्थापने] अ, ऊ, औ, छ; स्धापने-झ.
[3] समाचरेत्] छ; समारभेत्-अ, ऊ, औ, झ.
[4] वास्तुपूजाविधिः प्रोक्तः] अ, ऊ, ऋ, औ, छ; ०विधिं प्रोक्तं-अं; ०विधि प्रोक्तं-झ.
[5] सर्वसम्पत्समृद्धिदः] ऊ, औ; ०मृद्धिदम्] अ, ऋ, अं, छ, झ.
[6] वास्तुपूजाविहीनं] अ, ऊ, ऋ, छ; ०विहनामा-औ, अं; ०विहिन-झ.
[7] स्यात्तद्राष्ट्रं] अ, ऋ; चेत्०-ऊ; स्यादद्दष्ट्वां-औ; स्याद्रष्टं-अं; स्यात्तद्रात्रं-छ; स्यात्तद्रष्ट्रं-झ.
[8] च] अ, ऋ, औ, अं, छ, झ; तु-ऊ.
[9] तस्मात्सर्वप्रयत्नेन] अ, ऊ, ऋ, छ, झ; तस्मादेवंप्र०-औ; भस्मादेवंप्र०-अं.
[10] वास्तुपूजां] अ, ऊ, ऋ, औ, अं, छ; वास्तुपूजा-झ.
[11] आचार्यः शिष्यसंयुक्तः] अ, ऋ, औ; आचार्यशिष्यसंयुक्तं-ऊ, अं; आचार्यः शिष्यसंयुक्तं-छ; आचार्यशिष्यसंयुक्तः-झ.
[12] सुशुद्धवस्त्रैराच्छाद्य] ऊ, ऋ; शुद्धवस्त्रैराच्छाद्य अ; शुद्धवस्त्रैश्चराच्छाद्य-औ, अं; संशुद्ध०-छ; सुशुद्धवस्त्रैर्०-झ.
[13] सकली०] अ, ऊ, ऋ, औ, अं, छ; सकलि०-झ.
[14] संकल्प्य] अ, ऊ, ऋ, औ, अं, छ; संकल्प-झ.
[15] स्थण्डिलं] अ, ऊ, ऋ, औ, अं, छ; स्धण्डिलं-झ.
[16] शालिभिर्] ऊ, औ, अं, छ, झ; शक्तिभिर्-अ; 'ऋ' मातृकायां सप्तमश्लोकस्य चतुर्थपादोऽष्टमश्लोकस्य प्रथमपादश्च न दृश्येते।
[17] शुभैः] अ, ऊ, छ, झ; सभैः-औ, अं.
[18] मध्ये] अ, ऊ, औ, छ, झ; मय्ये-अं; 'ऋ' मातृकायां "मध्ये" इति न दृश्यते।

In Public domain. Digitization Muthulakshmi Research Academy

[१]चतुर्दिक्ष षद्दं कृत्वा कोणे [२]द्वन्द्वपदं [३]ग्रहेत्॥८॥
[४]परितस्तु पदं [५]कृत्वा कोणाग्रे शूलसंयुतम्।
वृत्तं कुर्याच्चतुर्दिक्षु पदं [६]परमशायिकम्॥९॥

[वास्तुदेवताः स्थानं च]

[७]ब्रह्माणं मध्यमेऽभ्यर्च्य [८]गन्धपुष्पैः [९]स्वनामतः।
[१०]समर्यको [११]विवस्वांश्च [१२]मित्रश्च [१३]पृथिवीधरः॥१०॥
[१४]पूर्वादिषु चतुर्दिक्षु [१५]पूजयेत्तत्स्वनामतः।
[१६]आपश्चैवापवत्सश्च [१७]सावित्रश्च [१८]सवित्रकः॥११॥
[१९]इन्द्रो [२०]इन्द्रजयश्चैव रुद्रो [२१]रुद्रजयस्तथा।
[२२]आग्नेयादि समारभ्य [२३]पूजयेत्तत्स्वनामतः॥१२॥

---

१ चतुर्दिक्ष षट् पदं] अ, ऊ, ऋ, औ, अं, छ; चतुर्दिष्टमपदं-झ; । 'औ, अं' मातृकयोरष्टमश्लोकस्य द्वितीयपादानन्तरं द्वावधिकौ पादौ दृश्येते। अनयोः प्रथमः पादोऽष्टमश्लोकस्य तृतीयपादेनैव समः। द्वितीयोऽप्यधिकः पादोऽष्टमश्लोकस्य द्वितीयपादेनैव समः।

२ द्वन्द्व] अ, ऊ, ऋ, औ, छ, झ; द्विद्वा-अं.

३ ग्रहेत्] अ, ऊ, ऋ, अं, छ; लिखेत्-औ; गृहेत्-झ.

४ परितस्तु] औ; परितस्तत्-अ, ऊ, ऋ, अं, छ, झ.

५ कृत्वा] अ, ऋ; त्वेकं-ऊ, औ, अं, छ, झ.

६ ०शायिकम्] ऊ, अं, झ; ०शालिकम्-ऋ; परमशालिकम्-अ; ०शाधिकम्-औ, छ.

७ 'औ' मातृकायां "ब्रह्माणं" इति न दृश्यते।

८ गन्धपुष्पैः] अ, ऊ, छ, झ; गन्धपुष्प-ऋ, औ, अं.

९ स्वनामतः] अ, ऋ, औ, झ; च नामतः-ऊ; स्वनामतम्-अं; सनातनः-छ.

१० समर्यको] अ; समलीयको-ऊ; समरीयको-ऋ, अं, छ; समरिधको-औ; समयको-झ.

११ विवस्वांश्च] अ, ऊ, ऋ, औ, छ; विवस्वाश्च-अं, झ.

१२ मित्रश्च] ऊ, औ, अं, छ; मित्रं च-अ; मित्रश्च-ऋ; मित्र ... -झ.

१३ पृथिवीधरः] अ, ऊ, ऋ, औ, छ; ०धरम्-अं; ... धरः-झ.

१४ पूर्वादिषु] अ, ऊ, छ; पूर्वादि च-औ, अं, झ; 'ऋ' मातृकायामस्य श्लोकस्य स्थाने "पूर्ष ... पितृकः" इति दृश्येते।

१५ पूजयेत्तत्स्वनामतः] अ, ऊ, छ; पूजयेत्तु०-औ; ०स्वनामतम्-अं; ०त्स्वमानतः-झ.

१६ आपश्चैवापवत्सश्च] अ, ऊ, छ, झ; ०वन्सश्च-औ; ०वन्सश्चा-अं.

१७ सावित्रश्च] अ, ऊ, छ; साविन्द्रश्च-औ, अं; सावित्रिश्च-झ.

१८ सवित्रकः]अ, छ; सावित्रकः-ऊ; सविन्द्रकम्-औ; सविद्रकम्-अं; सविन्द्रकः-झ.

१९ इन्द्रो] अ, ऋ, औ, अं, छ, झ; इन्द्र-ऊ.

२० इन्द्रजयश्चैव] अ, ऊ, ऋ, औ, छ; इन्द्रजयं चैव-अं; इन्द०-झ.

२१ रुद्रजयस्तथा] अ, ऊ, ऋ, छ, झ; ०स्थितः-औ; ०स्थतः-अं.

२२ आग्नेयादि] अ, ऊ, ऋ, औ, अं, छ; आग्नेर्यादि-झ.

२३ पूजयेत्तत्स्वनामतः] अ, ऊ, ऋ, औ, छ, झ; ०स्वनामतम्-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[1]ईशानश्चैव पर्जन्यो [2]जयन्तश्च [3]महेन्द्रकः।
[4]आदित्यः [5]सत्यकभ्रंशौ [6]अन्तरिक्षश्च [7]पूर्वभाक्॥ १३॥
[8]अग्निः [9]पूषा च वितथो [10]गृहक्षतो यमस्तथा।
गन्धर्वो [11]भृङ्गराजश्च ऋषयश्चैव दक्षिणे॥ १४॥
[12]निर्ऋतिर्दौवारिकश्चैव [13]सुग्रीवः [14]पुष्पदन्तकः।
वरुणः [15]शोषरोगौ च [16]पापयक्ष्मा च पश्चिमे॥ १५॥
[17]वायुर्नागस्तथा मुख्यो [18]भल्लाटः सोम एव च।
[19] मृगादितिर्दितिश्चैव [20]बाह्ये त्वेकांशभोगिनः॥ १६॥
[21]चरकीं च [22]विदारीं च [23]पूतनां [24]पापराक्षसीम्।

---

[1] ईशानश्चैव पर्जन्यो] अ, ऊ, ऋ, औ, छ, झ; ईशानं चैव पूज ... -अं.

[2] जयन्तश्च] अ, ऊ, औ, अं, छ, झ; जयन्ती च-ऋ.

[3] महेन्द्रकः] अ, ऊ, ऋ, औ, छ; महेन्द्रका-अं; महेन्द्रकाः-झ.

[4] आदित्यः] अ, ऊ, ऋ, छ; आदित्य-औ, अं, झ.

[5] सत्यक] अ, ऋ, औ, अं, छ, झ; सत्यको-ऊ.

[6] अन्तरिक्षश्च] अ, ऊ; अन्तरिक्षं च-ऋ, छ, झ; अनुरूक्षं-औ; अन्दरक्षं च-अं.

[7] पूर्वभाक्] अ, ऊ, ऋ, अं, छ, झ; पूर्वदाक्-औ.

[8] अग्निः] अ, ऊ, ऋ, औ, छ; अग्नि-अं, झ.

[9] पूषा] ऊ, अं, छ, झ; पूजा-अ, ऋ, औ.

[10] गृहक्षतो यमस्तथा] अ, ऋ; ग्रहक्षतो०-ऊ, छ; ... हक्षताश्च०-औ; हधाताश्चयस्तथा-अं; ग्रहक्षत०-झ.

[11] भृङ्गराजश्च] अ, ऊ, ऋ, औ, छ; भृङ्गराजं च-अं; भृङ्गराजश्चो-झ.

[12] निर्ऋतिर्दौवारिकश्चैव] अ; निर्ऋतिर्दौवारिकश्च-ऊ; निर्ऋतिश्चौवारिकश्चैव-ऋ; निरितिद्दौवारिकैश्चैव-औ; निर्ऋति-दौवारिकैश्चैव-अ; नतिद्दौवारिकश्चैव-छ; निरुतिद्दौवारिकश्च-झ.

[13] सुग्रीवः] अ, ऊ, ऋ, अं, छ; सुग्रीवं-औ; सुग्रिवः-झ.

[14] पुष्पदन्तकः] अ, ऊ, ऋ, छ, झ; पुष्पदन्तकम्-औ, अं.

[15] शोषरोगौ च] ऊ; शोषरोगश्च अ, औ, अं, छ, झ; शोकरोगश्च-ऋ.

[16] पापयक्ष्मा] अ; पाप०-ऊ, ऋ, औ; पा ... क्ष्मा-अं; पापयत्तु-छ; वायवक्ष्मा-झ.

[17] वायुर्नागस्] अ, ऊ, ऋ; वायुनागस्-औ, अं, झ; वायुनाथस्-छ.

[18] भल्लाटः] अ, ऊ, ऋ, औ, अं, छ; फल्लाटक-झ.

[19] मृगादितिर्दितिश्चैव] सं० पा०; जगादितिच्य द्युतिश्चैव अ; ऋगादितिर्दितश्चैव-ऊ; ऋगादितिर्द्युतिश्चैव-ऋ; ऋगोतिद्युतिश्चैव-औ, अं; जगदित्युदिश्चैव-छ; ऋगादिति द्युतिश्चैव-झ.

[20] बाह्ये त्वेकांशभोगिनः] अ, ऋ; बाशेत्येकांशभागिनः-ऊ; ०भागिनः-औ; ०भागिनम्-अं; बाह्ये स्वेकांश०-छ; बाह्येस्त्वेकांश०-झ.

[21] चरकी] अ, ऊ, ऋ, छ; चारकी-औ, अं; चरिकि-झ.

[22] विदारी] अ, ऊ, ऋ, औ, अं, छ; विदारि-झ.

[23] पूतना] अ, ऊ, ऋ, औ, अं, छ; पूतन-झ.

[24] पापराक्षसी] अ, ऊ, ऋ, औ, छ; ०राक्षसि-अं; ०रक्षसि-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]ईशानं [२]जृम्भकश्चैव [३]पिञ्चिकं बलिपिञ्चिकम्॥ १७॥
[४]पूर्वादिषु चतुर्दिक्षु [५]पूजयेन्नाममन्त्रकैः।
पाद्यमाचमनं चार्घ्यं [६]गन्धं पुष्पं च धूपकम्॥ १८॥
[७]बलिं नैवेद्यं ताम्बूलं पुष्पमर्घ्यं [८]प्रणामकम्।
[९]स्वनाममन्त्रैरभ्यर्च्य [१०]दद्याद्दध्योदनं बलिम्॥ १९॥
कुक्कुटाण्डप्रमाणेन [११]बलिमेकं प्रदापयेत्।
नमोऽन्तं [१२]बलिनिर्दिष्टः [१३]स्वाहान्तेनैव [१४]हूयते॥ २०॥
[१५]बलिमण्डलमैशान्यां [१६]स्थण्डिलं शालिना [१७]कुरु(गुरुः?)।
लाजैः [१८]पुष्पैस्तिलैर्दर्भैः [१९]पञ्चचूर्णैरलंकृतम्॥ २१॥
[२०]सकूर्चानुदकोपेतान् [२१]सवस्त्रान् [२२]सहिरण्यकान्।

---

१ ईशानो] अ, ऊ; ईशान-ऋ, औ, अं, झ; ईशानं-छ.

२ जृम्भकश्चैव] अ, ऊ, ऋ; जम्भकं चैव-औ, छ; जृम्भकं चैव-अं; जम्भकश्चैव-झ.

३ पिञ्चिकं बलिपिञ्चिकम्] अ; पिञ्चका बलिपिञ्चका-ऊ; पिञ्चकं बलिपिच्छकम्-ऋ; पिञ्च(ञ्छ)कं बलिपिञ्च(ञ्छ)कम्-औ; पिञ्चकं बलिपिञ्चकम्-अं; पञ्चकं बलिपिञ्छकम्-छ; विञ्छिकं बलिपिर्च्छकम्-झ.

४ पूर्वादीनि] अ, ऋ, अं, छ; पूर्वादिषु-ऊ; पूर्वादीनि(दिषु)-औ; पूर्वादिनि-झ.

५ 'ऋ' मातृकायामस्य पादस्य 'पू' इत्यग्रं दृश्यते नान्यत्। अथापि '१८' श्लोकस्य तृतीयचतुर्थपादौ '१९' श्लोकस्य च प्रथमपादो न दृश्यन्ते।

६ गन्धं पुष्पं] अ; गन्धपुष्पं-ऊ, औ, अं, छ, झ.

७ बलिं नैवेद्यं ताम्बूलं] अ; बलिनैवेद्यताम्बूलं-ऊ, अं, छ, झ; बलिनैवेद्यताम्बूलं-औ.

८ प्रणम्य च] अ, ऋ, औ, अं, छ, झ; प्रणामकम्-ऊ.

९ स्वनाममन्त्रैर्] अ, ऊ, ऋ, औ, अं, छ; ०मन्त्रेर्-झ.

१० दद्याद्दध्योदनं] अ, ऊ, ऋ, औ, अं; दद्यान्मन्योदनं-छ; दद्या दध्योदनं-झ.

११ बलिमेकं] अ, ऊ, ऋ, अं, छ, झ; ०एकां-औ.

१२ बलिनिर्दिष्टः] अ, ऋ; ०निर्दिष्टं-ऊ, औ, अं, छ, झ.

१३ स्वाहान्तेनैव] अ, ऊ, ऋ, अं, छ, झ; स्वाहान्तं नैव-औ.

१४ हूयते] अ, ऊ, ऋ, झ; हू(भू)यते-औ; भूयते-अं, छ.

१५ बलिमण्डलमैशान्यां] अ, ऊ, ऋ, औ, छ, झ; ०ईशान्यां-अं.

१६ स्थण्डिलं] अ, ऊ, ऋ, औ, अं, छ; स्तण्डिलं-झ.

१७ कुरु] अ, ऊ, ऋ, औ, छ, झ; गुरुः-अं.

१८ पुष्पैस्तिलैर्दर्भैः] अ, ऊ, ऋ, औ, छ; पुष्पैस्तिलै दर्भैः-अं; ०दर्भै-झ.

१९ पञ्चचूर्णैर्] अ, ऊ, ऋ, छ, झ; ०पूर्वैर्-औ; ०पूर्णैर्-अं.

२० सकूर्चानुदकोपेतान्] अ, ऊ, ऋ, औ, छ, झ; ०उपेतं-अं.

२१ सवस्त्रान्] अ, ऋ, औ, छ; सहस्रान्-ऊ; स्ववस्त्रन्-अं; सवस्त्र-झ.

२२ सहिरण्यकान्] अ, ऊ, ऋ, औ, छ, झ; सहिरण्यक्षान्-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[१]पलाशपल्लवोपेतान् [२]नारिकेलफलैर्युतान्॥ २२॥
[३]संस्थाप्य [४]वास्तुकुम्भं तु [५]परिवारघटं विना।
[६]अर्चयेद्गन्धपुष्पाद्यैः [७]कलशस्थापनोक्तवत्॥ २३॥
[८]ब्रह्मादिवास्तुदेवांश्च समभ्यर्च्य विशेषतः।
बलिमण्डलपूर्वं तु अग्निकार्यं [९]समाचरेत्॥ २४॥
[१०]आधानादिविवाहान्तम् [११]अग्निकार्योक्तमार्गतः। [१२]

॥इति [१३]सूक्ष्मशास्त्रे [१४]वास्तुहोमविधिः [१५]एकादशः पटलः॥

---

[१] पलाशपल्लवोपेतान्] अ, छ, झ; ०पल्लवैर्युक्तान्-ऊ; पालाश०-औ, अं; 'ऋ' मातृकायामस्यार्धश्लोकस्य 'प' इत्यग्रं दृश्यते नान्यत्। अथापि '२३' श्लोकस्य प्रथमपादो न दृश्यते। द्वितीयपादस्य 'विना' इत्यन्तो दृश्यते नान्यत्।

[२] नारिकेलफलैर्युतान्] अ, ऊ; नालिकेरं फलैर्युतम्-औ, अं; नारिकेर०-छ, झ.

[३] संस्थाप्य] अ, ऊ, औ, अं, छ; संस्धाप्य-झ.

[४] वास्तुकुम्भं] अ, औ, अं, छ; ०कुण्डं-ऊ; ०कुम्भास्-झ.

[५] परिवारघटं] अ, ऊ, औ, छ, झ; परिवान०-अं.

[६] अर्चयेद्गन्धपुष्पाद्यैः] अ, ऊ, औ, छ; अर्चद्गन्धपुष्पाद्यैः-ऋ; ०आद्यै-अं, झ.

[७] कलशस्थापनोक्तवत्] अ, ऊ, ऋ, औ, अं; ०वाक्-छ; ०स्धापनोक्तवत्-झ.

[८] ब्रह्मादिवास्तुदेवांश्च] सं ०पा०; ० वास्तु देवानां अ, ऊ, ऋ, औ, अं, छ; ०वस्तुदेवानां-झ.

[९] समाचरेत्] अ, ऊ, ऋ, औ, अं, झ; समारभेत्-छ.

[१०] आधानादिविवाहान्तम्] अ, ऊ, ऋ, छ; आसनादिविहीनान्तम्-औ; आसादिविहीनान्तम्-अं; आथानादि०-झ.

[११] अग्निकार्योक्तमार्गतः] अ, ऊ, ऋ, औ, छ, झ; ०मार्गतम्-अं.

[१२] "छ, झ" मातृकयोः पटलान्ते "वह्निमध्ये विशेषेण कल्पयेदासनं(न-झ) क्रमात्।" इत्यधिकोऽर्धश्लोको दृश्यते।

[१३] सूक्ष्मशास्त्रे] अ, ऋ, औ, अं, झ; सूक्ष्मे-ऊ; श्रीसूक्ष्मशास्त्रे-छ.

[१४] वास्तुहोमविधिः] अ, ऋ; वास्तुपूजाविधि-ऊ; क्रियापादे वास्तुहोमपूजाविधिर्नाम-औ; क्रियापादे वास्तुहोमपूजाविधि-अं; वास्तुहोमविधिर्नाम-छ; वास्तुपूजाविधिं नाम-झ.

[१५] एकादशः पटलः] अ, ऋ; पटल एकादशः-ऊ; एकादशपटलः-औ; द्वादशः पटलः-छ; पटलः-अं; त्रिरुत्तरशतपटलः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

॥ [1]द्वादशः पटलः ॥

[[2]अङ्कुरार्पणविधिः]

[3]बीजनिर्वापणं वक्ष्ये [4]श‍ृणु त्वं [5]तत्प्रभञ्जन।

[अङ्कुरार्पणानुष्ठेयकालनिर्णयः]

[6]स्थापने [7]प्रोक्षणे चैव गर्भन्यासे तथैव च॥ १ ॥
[8]नैमित्तिके च काम्ये च [9]प्रायश्चित्तादिकेऽपि च।
[10]अन्यस्मिन् मङ्गले [11]काले कारयेदङ्कुरार्पणम्॥ २ ॥
[12]बीजानामधिपः [13]सोमस्तस्माद्रात्रौ तु [14]वापयेत्।

---

१ अयं पटलः अ (टि. १९१. पृ० ४२-४६), ऊ (टि. ३८. पृ० ८९-९८), ऋ (टि. ९७. पृ० ३३-३७), औ (टि. ३४८. पृ० ६९-७४), अं (टि. ३५३. पृ० ५९-६४), च (टि. ९५५.पृ० ४३-४८) छ (टि. ९६७. पृ० ४६-५३), झ (टि. १०१६. पृ० २५८-२६३) इत्येतेषु कोशेषु दृश्यते। अङ्कुरार्पणविधिविषये-कामिकागमे पूर्वभागे ६३. तमः पटलः पूर्वकारणागमे (२०) तमः पटलः सुप्रभेदागमे (३५) तमः पटलः दीप्तागमे (८३) तमः पटलः उत्तरकारणागमे (१२) पटलाः रौरवे (१८) पटलः सहस्रागमे (टि. १०७१. पृ० १३१, १३५, अचिन्त्य- विश्वसारदाख्ये (टि. ७.) चिन्त्या-गमः (टि. १०९८. पृ० २६४, २७०), द्रष्टव्याः।

२ अङ्कुरार्पणविधिः] च; अङ्कुरार्पणम्-ऊ, झ; हरिः ओम् अथ अङ्कुरविधिः-औ; हरिः ओम्-अं। 'अ, ऋ, छ' कोशेष्विदं शीर्षकं न दृश्यते; 'औ, अं' मातृकयोः प्रथमश्लोकात्पूर्वं "वह्निमध्ये विशेषेण कल्पयेदासनं कमात्" इत्येकमर्धम् अधिकं दृश्यते।

३ बीजनिर्वापणं] अ, ऊ, ऋ; बीजानि वपनं-औ, अं; बीजानि वापनं-च, झ; बीजादि वापनं-छ.

४ श‍ृणु त्वं] अ, ऊ, ऋ, औ, च, छ; श‍ृणुध्वं-अं, झ.

५ तत्प्रभञ्जन] अ, ऊ, ऋ, औ, च, छ; तत्प्रभञ्जनम्-अं; तत्प्रभञ्जना-झ.

६ स्थापने] अ, ऊ, ऋ, औ, अं, च, छ; स्धापने-झ.

७ 'ऋ' मातृकायां 'प्रो' इत्यनन्तरं द्वितीयश्लोकस्य तृतीयपादे मङ्गले इत्येव दृश्यते। मध्ये विद्यमानो भागो लुप्तः।

८ नैमित्तिके च काम्ये च] अ, ऊ, औ; ०काम्यञ्च-अं; नित्यनैमित्तिके काम्ये-च; नैमित्तिकेन कायेन-छ; नैमित्तिके वा काम्ये वा-झ.

९ प्रायश्चित्तादिकेऽपि च] अ, ऊ, औ, अं, च, छ; ०पि वा-झ.

१० अन्यस्मिन्मङ्गले] झ; अन्ये च मङ्गले-अ, ऊ; ... मङ्गले-ऋ; अन्येषां मङ्गले-औ; अन्येषां मङ्गला-अं; अन्यैश्च मङ्गले-च; अन्यैश्च मङ्गला-छ.

११ काले] अ, ऊ, ऋ, औ, अं, छ, झ; कार्ये-च.

१२ बीजानामधिपः] अ, ऊ, ऋ, औ, अं, च, छ; बिजाना०-झ.

१३ सोमस्तस्माद्रात्रौ तु] ऊ, ऋ, औ, अं, छ; सोमस्तस्माद्रातु-अ; ०द्राद्रौ तु-च; ०द्रातौ ... -झ.

१४ वापयेत्] अ, ऊ, ऋ, च, छ, झ; वापयेत्-औ; पाचयेत्-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[अङ्कुरमध्ये अन्याङ्कुरस्य निषेधः]

अङ्कुरादङ्कुरं नास्ति [१]तत्कर्माभ्यन्तरं विना॥३॥
[२]संकल्पदिवसात्पूर्वे नवमे सप्तमेऽपि वा।
[३]पञ्चाहे वा त्र्यहे वापि [४]सद्यो वाथ समाचरेत्॥४॥

[देशनिर्णयः]

[५]प्रासादस्योत्तरे [६]देशे [७]कुर्यादङ्कुरमण्टपम्।
[८]मण्टपेष्विष्टदेशे वा [९]ह्यन्यदेशे मनोरमे॥५॥
[१०]वितानैश्च ध्वजैश्चैव [११]भूषयेद्भूषणार्हकैः।
गोमयालेपनं कृत्वा [१२]प्रोक्षयेच्छुद्धतोयकैः॥६॥
[१३]स्थण्डिलं [१४]कल्पयेन्मध्ये [१५]शालिभिर्विमलैः शुभैः।

[मण्डलभेदः]

[१६]स्वस्तिकं गोमुखं चैव [१७]द्विविधं [१८]परिकीर्तितम्॥७॥

---

[१] तत्कर्माभ्यन्तरं विना] अ, ऋ, औ, अं, च, छ, झ; तस्मात्कर्मा ... ... -ऊ.
[२] सङ्कल्पदिवसात्पूर्वे] सं० पा०; सङ्कल्प्य०-अ, उ, ऋ, च, छ, झ; सङ्कल्प्य दिवसात् सर्वे-औ, अं.
[३] पञ्चाहे वा त्र्यहे वापि] ऊ; ०त्रियाहे वापि-अ; ०त्रियहे वापि-ऋ, च; ०वा त्रियाहे वा-औ, अं; ०तयहे वापि-छ; पञ्च त्रियाहेवापि-झ.
[४] सद्यो वाथ] ऊ; सद्य एवं-अ, औ, अं, छ; सद्य एव-ऋ, च, झ.
[५] प्रासादस्योत्तरे] अ, ऊ, ऋ, औ, अं, च, झ; प्राविदस्योत्तरे-छ.
[६] देशे] अ, ऊ, च, छ; चैशे-ऋ, औ, अं, झ.
[७] कुर्यादङ्कुरमण्टपम्] अ, ऊ, अं, झ; ०मण्डपम्-ऋ, औ, च, छ.
[८] मण्टपेष्विष्टदेशे वा] अ, च; मण्डपं स्वेष्ट देशे वा-ऊ; मण्डपस्विष्ट ०-ऋ, छ; मण्डपस्पष्ट०-औ; मण्डपस्वष्ट०-अं, मण्टपस्विष्ट०-झ.
[९] ह्यन्यदेशे] अ; अन्यदेशे-ऊ; रम्यदेशे-ऋ, औ, अं, च, छ, झ.
[१०] वितानैश्च ध्वजैश्चैव] अ, ऊ, छ, झ; ०ध्वजे चैव-औ; पीतानैश्च ध्वजे चैव-अं; ०ध्वजश्चैव-च; 'ऋ' मातृकायां ६ श्लोके १, २, ३ पादाः न सन्ति।
[११] भूषयेद्भूषणार्हकैः] ऊ, च, छ; भूषणैर्भूषणार्हकैः-अ; भूषयेभूषणार्हके-औ; भूषयेद्धुपणर्हकैः-अं; भूषयेभूषणार्हके-झ.
[१२] प्रोक्षयेच्छुद्धतोयकैः] अ, ऊ, ऋ, च, झ; प्रोक्षयेच्छुध्य०-औ, अं प्रोक्षयेद् पञ्चगव्यकैः-छ.
[१३] स्थण्डिलं] अ, ऊ, ऋ, औ, अं, च, छ; स्तण्डिलं-झ.
[१४] कल्पयेन्मध्ये] अ, ऊ, ऋ, औ, च, छ, झ; कल्पये मध्ये-अं.
[१५] शालिभिर्विमलैः] ऊ, औ, अं, च, छ, झ; स्थालिभिर्विमलैः-अ, ऋ.
[१६] स्वस्तिकं] अ, ऊ, ऋ, च; स्पष्टकं-औ; स्वष्टकं-अं; स्विष्टकं-छ, झ.
[१७] द्विविधं] अ, ऊ, ऋ, औ, अं, च; माषधं-छ; द्विवियं-झ.
[१८] परिकीर्तितम्] अ, ऊ, ऋ, औ, च, छ; ०कीर्तितः-अं; भवेत्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]स्वस्तिकं [२]भानुसंख्यं च [३]गोमुखं तद्वयं भवेत्।

[पालिकादिदाः]

[४]पालिकाश्च [५]शरावाश्च [६]घटिकाश्च [७]त्रिधा मताः॥८॥
पूर्वोक्तलक्षणेनैव [८]पालिकादीनि [९]संग्रहेत्।

[स्वस्तिकगोमुखमण्डलयोः प्रकारः]

[१०]प्राक्सूत्रं पञ्चसंख्या च उदक्सूत्रं तथैव च॥९॥
[११]मध्ये वेदपदं ग्राह्य पदमेकं परिन्यसेत्।
स्वस्तिकं पदमेवोक्तं क्रमेणैव तु विन्यसेत्॥१०॥
प्राक्सूत्रं वसुसंख्या च उदक्सूत्रं तथैव च।
[१२]मध्ये नवपदं ग्राह्य [१३]चतुर्दिक् षट्पदं न्यसेत्॥११॥
[१४]गोमुखं त्विति विख्यातं [१५]कल्पयेत्तु प्रभञ्जन।

---

[१] स्वस्तिकं] अ, ऊ, ऋ, च, छ, झ; स्वस्तिरम्-औ, अं.

[२] भानुसंख्यं च] ऊ, ऋ; भानुसंख्या च-अ, औ, अं च, छ, झ.

[३] गोमुखं तद्वयं भवेत्] अ, ऊ, ऋ; ०तद्वयं०-औ, च; ... मुखं तद्वयं०-छ; ०तद्विधं०-झ; 'अं' मातृकायां श्लो० ८ द्वितीयपाद-प्रभृति श्लो०११ प्रथमपादपर्यन्तं न दृश्यते।

[४] पालिकाश्च] सं० पा०; पालिका च-अ, ऋ, औ, च, झ; पलाका च०-छ; 'ऊ' मातृकायां श्लो० ८ उत्तरार्धं न दृश्यते। 'अं' मातृकायां श्लो० ८ द्वितीय पादप्रभृति श्लो० ११ प्रथमपादपर्यन्तं न दृश्यते।

[५] शरावाश्च] सं० पा०; शरावा च-अ, ऋ, औ, च, छ, झ; शरावौ-औ.

[६] घटिकाश्च] सं० पा०; घटिका च-अ, ऋ, औ, च, छ, झ.

[७] त्रिधा मताः] अ, ऋ; त्रिया मतः-औ; त्रिधा मतं-च; त्रिधा मतः-छ; त्रिध मतं-झ.

[८] पालिकादीनि] अ, ऊ, ऋ, औ, च, छ; पालिकादिनि-झ.

[९] श्लो० ९ पू० अनन्तरं 'च' मातृकायां "अथवा पालिका चैव तत्संखेनैव संग्रहेत्।" इत्येकमर्धम् अधिकं दृश्यते।

[१०] प्राक्सूत्रं पञ्चसंख्या च] च; ०त्रमुदसंख्या च-अ, ऋ, झ; ०त्रमिद०-ऊ; ०त्रंउद०-औ; ... सूत्रं मुन्दसन्ध्या च-छ.

[११] मध्ये वेदपदं ग्राह्य] ऊ, ऋ, च, छ, झ; ०गृह्य-अ; ०नवपदं ग्राह्य-औ; 'ऋ' मातृकायां मध्ये वे इत्यनन्तरं श्लो० '११' प्रथमपाद एव दृश्यते।

[१२] मध्ये नवपदं ग्राह्य] अ, ऋ, औ, अं, च, छ; मध्ये नवपदं गृत्य-झ.

[१३] चतुर्दिक् षट्पदं न्यसेत्] सं० पा०; ०तत्पदं न्यसेत्-अ, ऊ, ऋ, छ; ०पदां०-औ; ०तत्घटां०-अं; चैत्त्यु दिक्पदं त्यजेत्-च; चतुर्दिक्षु पदं०-झ.

[१४] गोमुखं त्विति विख्यातं] अ, ऊ, ऋ, झ; गोमुखान्विति० औ, अं; गोमुखं ... विख्यातं-छ; '११'. श्लोकानन्तरं 'च' मातृकायां "शकु चुर्णैश्च मृद्भिश्च पालिकादीनि पूरयेत्। शिखिवार्थबिल्वैश्च कण्ठ मध्ये तु बन्धयेत्॥" इति अर्धद्वयं अधिकं दृश्यते।

[१५] कल्पयेत्तु प्रभञ्जन] अ, ऊ, ऋ; कल्पयेत् कल्पीतथा-औ; कल्पयेत् कल्पवी तथा-अं; कल्पयेत् क्रमात्-छ; कल्पयेत् कल्पवित्तमः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]तिलैर्लाजैश्च [2]पुष्पैश्च [3]दर्भैश्चैव परिस्तरेत्॥ १२॥
[4]पालिकासुषिरादीनि [5]दर्भेणैव विघट्टयेत्।

[आचार्यनियमादि]

[6]आचार्यः शिष्यसंयुक्तः [7]पूर्ववत्स्नानमाचरेत्॥ १३॥
[8]नवाम्बरधरोष्णीषः [9]शुक्लगन्धानुलेपनः।
[10]शुक्लवस्त्रोत्तरीयश्च [11]सकलीकरणं गुरुः॥ १४॥

[सामान्यार्घ्य-पुण्याह-पञ्चगव्य-गणेशपूजादि]

[12]सामान्यार्घ्यं च संकल्प्य पुण्याहं वाचयेत्ततः।
[13]पञ्चगव्यं तु संकल्प्य विघ्नेशं पूजयेत्ततः॥ १५॥
[14]भक्ष्यापूपादिकेनैव संतोष्य गणनायकम्।
नालिकेरफलं [15]दद्याद्विखण्डं सर्वसिद्धिदम्॥ १६॥
[16]शैथिल्यं कर्मशैथिल्यं [17]तस्माद्दोषं परीक्षयेत्।

---

१ तिलैर्लाजैश्च] ऊ; तिललाजैश्च-अ, ऋ, औ, च, छ, झ; तीलालाजैश्च-अं.
२ पुष्पैश्च] ऊ, ऋ, च, झ; पुष्पेण-औ, अं, छ; 'अ' मातृकायां पुष्पैः इति न दृश्यते।
३ दर्भैश्चैव परिस्तरेत्] ऊ, ऋ, औ, च, छ; दर्भैश्च परिस्तरे-अ; ० ... रेत्-अं; ०प ... -झ.
४ पालिकासुषिरादीनि] अ, ऊ, ऋ, औ, अं, छ, झ; पालिकासृष्टिदीनि-च.
५ दर्भेणैव विघट्टयेत्] अ, ऊ, ऋ, च, छ, झ; दर्भेणैव विपट्टयेत्-औ, अं.
६ आचार्यः शिष्यसंयुक्तः] अ, ऊ, ऋ, औ; आचार्यं ०-अं; आचार्यः ०-च; आचार्थ ०-छ; आचार्य ०-झ.
७ पूर्ववत्स्नानमाचरेत्] अ, ऊ, ऋ, औ, च, छ, झ; पूर्व व समाचरेत्-अं.
८ नवाम्बरधरोष्णीषः] अ, ऊ, च; ०धरोष्णीषं-ऋ, औ, अं, छ; ... वरधरोष्णीषः-झ.
९ शुक्लगन्धानुलेपनः] अ; शुद्ध०-ऊ; शुक्लग ... -ऋ; ०लेपनं-औ, च, छ; ०गन्धाणि लेपनं-अं; ... न्धानुलेपयेत्-झ.
१० शुक्लवस्त्रोत्तरीयश्च] अ; शुद्धवस्त्रोत्तरीयं च-ऊ; ०त्तरीयं च-औ, च, छ; ०वक्रोत्तरीयं च-अं; ०त्तरीयञ्च-झ; 'ऋ' मातृकायां श्लो०१४ उत्तरार्धं श्लो० १५ प्रथमपादश्च न स्तः।
११ सकलीकरणं गुरुः] अ; ०करणं कुरु-ऊ, अं, च, छ; ०करकं कुरु-औ; सकलि करणं कुरु-झ.
१२ सामान्यार्घ्यं च] अ, ऋ, औ, अं, च, छ, झ; ०र्घ्यं तु-ऊ.
१३ 'ऊ' मातृकायां श्लो० १५ उत्तरार्धं न दृश्यन्ते।
१४ भक्ष्यापूपादिकेनैव] अ, ऊ, ऋ, च, छ, झ; भिक्षापूर्वादिकेनैव-औ; ... क्षापूर्वादिकेनैव-अं.
१५ दद्याद्विखण्डं सर्वसिद्धिदम्] अ, ऊ, ऋ, छ, औ, अं; दद्याद्विखण्डं०-च; दद्याद्वि ... र्वं०-झ.
१६ शैथिल्यं कर्मशैथिल्यं] अ, ऊ, ऋ; ०शैवल्यं-औ; शैवल्यं कर्मशैवल्यं-अं; शैथल्यं कर्मशैथल्यं-च; शाल्रियं कर्म शैयल्यं-छ; शैबील्यं कर्म शैधिल्यं-झ.
१७ तस्माद्दोषं परीक्षयेत्] ऋ, छ; ०परिक्षयेत्-अ, च, झ; तद्दोषं परीक्षयेत्-ऊ; तस्मादेवं०-औ; तस्यायेवं०-अं.

In Public domain. Digitization Muthulakshmi Research Academy

[विघ्नेश्वरप्रार्थना]

विघ्नराज [1]नमस्तेऽस्तु [2]सततं [3]मोदकप्रिय ॥ १७ ॥
[4]विघ्नादनेकसंभूताद् [5]निर्विघ्नत्वं प्रसीद मे।
[6]एवं प्रार्थ्य तु तं भक्त्या [7]अस्त्रेशं पूजयेत्ततः ॥ १८ ॥
[8]देवदेवं [9]नमस्कृत्य [10]कारयेदङ्कुरार्पणम्।

[अङ्कुरार्पणकार्यार्थं मृत्संग्रहणादिकर्मानुष्ठानप्रकारः]

[11]परिचारकमाहूय [12]सोष्णीषं सोत्तरीयकम् ॥ १९ ॥
[13]स्थालिकां पञ्चगव्यं च [14]हविरस्त्रेशमूर्तिनम्।
शिरसा वाहयित्वा तु [15]सर्वालंकारशोभितम् ॥ २० ॥
[16]धामप्रदक्षिणं [17]कुर्यात् पूर्वे वा चोत्तरेऽपि वा।
[18]ऐशान्ये वा प्रकर्तव्यं मृदः स्थानं समाविशेत् ॥ २१ ॥

---

१ नमस्तेऽस्तु] अ, ऊ, ऋ, च, छ, झ; नमस्तुभ्यं-औ, अं.

२ सततं] अ, ऊ, ऋ; सन्ततं-औ, अं, च, छ, झ.

३ मोदकप्रिय] अ, ऊ, ऋ; मोदकं तथा-औ, अं; ०प्रिये-च; मोदकं प्रियं-छ; ०प्रय-झ.

४ विघ्नादनेकसंभूताद्] सं० पा०; ०ननेकसंभूति-अ, ऋ, छ; विघ्ननेक०-ऊ; विघ्नं नानेकसंभूतं-औ; स ... न्न ... नेकभूतं-अं; विघ्नो ननेक संभूता-च; वि ... क संभूता-झ.

५ निर्विघ्नत्वं] ऊ, ऋ, औ, अं, च, छ, झ; निर्विघ्नस्त्वं-अ.

६ एवं प्रार्थ्य तु तं भक्त्या] अ; ०प्रार्थ्यते ०-ऊ, ऋ, औ, झ; ०प्रार्थीयते भक्त्या-अं; ०प्रार्थयेद्०-च; प्रणवं प्रार्थयेद्०- छ.

७ अस्त्रेशं पूजयेत्ततः] अ, ऋ, च, छ, झ; अस्त्रेशः पूजयेत्ततः-ऊ; ०त्तदा-औ; त्तता-अं.

८ देवदेवं] अ, औ, अं, च, छ, झ; तद्देवं-ऊ; 'ऋ' मातृकायां १९ श्लोकस्य अन्ते 'रीयकम्' इत्येव दृश्यते। मध्ये विद्यमानो-भागः लुप्तः।

९ नमस्कृत्य] अ, औ, छ, झ; संस्कृत्य-ऊ; न्तमस्तुत्वा-अं; नमस्तुत्वा-च.

१० कारये दङ्कुरार्पणम्] च; स्थापयेदङ्कुरार्पणम्-अ, ऊ, औ, अं, छ; स्सोचयेदङ्कु ... -झ.

११ परिचारकमाहूय] अ, ऊ, औ, अं, च, छ; पारिचारकमाहूय-झ.

१२ सोष्णीषं सोत्तरीयकम्] ऊ, औ; सोष्णीषः०-अ; ... रीयकं-ऋ; ०षञ्चोत्त०-अं; स्सोष्णीषं चोत्त०-च; ०रियकम्-झ; 'छ' मातृकायां '१९' श्लोकस्य चतुर्थपादः न दृश्यते।

१३ स्थालिकां पञ्चगव्यं च] सं० पा०; स्थालिकां कल्पयेद्धीमान्-अ; स्थलिकं०-ऊ; स्थलिका०-ऋ, अं; स्थलिकां०-औ; स्थलिका पञ्चगव्यैश्च-च; स्थण्डिलं०-छ; स्धालिका०-झ.

१४ हविरस्त्रेशमूर्तिनम्] सं० पा०; ०मूर्तयः-अ, ऊ, ऋ; हवरस्त्रेशमूर्तया-औ; ०मूर्तया-अं; ०मूर्तनम्-च; ०मूर्तयः-छ, झ.

१५ सर्वालंकारशोभितम्] अ, ऊ, ऋ; ०भषितं-औ, छ, झ; ०भूषितं-अं; ०संयुतम्-च.

१६ धामप्रदक्षिणं] अ, ऊ, औ, झ; ... णं-ऋ; यामप्र०-अं, छ; ग्रामप्र०-च.

१७ कुर्यात् पूर्वे वा चोत्तरेऽपि वा] ऊ, ऋ, औ, अं, छ, झ; कुर्या ... पूर्वे०-अ; ०चोत्तरेऽथ वा-च.

१८ ऐशान्ये वा प्रकर्तव्यं मृदः स्थानं-च; ०मादिस्थानं-अ, औ, अं; ०नादस्थानं-ऊ, ऋ, ०मदस्थानं-छ; ०मथस्धानं-झ.

In Public domain. Digitization Muthulakshmi Research Academy

अस्त्रेशं पश्चिमे देशे [1]विन्यसेत् स्थण्डिलोपरि।

[नवकोष्ठलेखनादि]

तदग्रे [2]स्थण्डिलं कल्प्य नवकोष्ठेन लेखयेत्॥२२॥
[3]ईशे त्वेकपदं कल्प्य विघ्नेशं पूजयेत्ततः।
[4]पुण्याहं वाचयेत्तत्र प्रोक्षयेदस्त्रमन्त्रतः॥२३॥

[मृत्संग्रहणस्थाने ब्रह्मादिदेवानां पूजा]

ब्रह्माणं मध्यमेऽ[5]भ्यर्च्य [6]गन्धपुष्पैस्स्वनामभिः।
[7]अनन्ता विनता भद्रा [8]जयन्ता भ्रमरी भ्रमा॥२४॥
[9]प्रस्थिता परिजृम्भी च [10]शूलिनी चेशगोचरे।
पूर्वादीशानपर्यन्तम् [11]अर्चयेत्स्वस्वनामतः॥२५॥
[12]सघृतं गुलसंमिश्रं [13]दद्याद्दध्योदनं बलिम्।
[14]ताम्बूलं दापयेत्पश्चात् [15]तृप्तेरर्घ्यं प्रदापयेत्॥२६॥

---

[1] विन्यसेत् स्थण्डिलोपरि] सं० पा०; विन्यसेद्दण्डिकोपरि-ऊ; ०द्वव्धि०-अ, ऋ, च; ०द्वव्दि०-औ, अं; ०ग्रन्थि०-छ; विन्यसेत् ... परि-झ.

[2] स्थण्डिलं] अ, ऊ, ऋ, औ, अं, च, छ; स्थन्डिलं-झ.

[3] ईशे त्वेकपदं कल्प्य] अ, ऊ, झ; ०त्वक् पदमा कल्प्य-औ, अं; ईशत्वकपदं०-च, ०कल्प्य-छ; 'ऋ' मातृकायां २३ श्लोके ईशे त्वे ... इत्यारभ्य चतुर्थपादे 'त्ततः' इत्येव दृश्यते। मध्ये विद्यमानो भागो लुप्तः।

[4] पुण्याहं वाचयेत्तत्र] अ, ऊ, औ, अं, छ; 'च' मातृकायां 'तत्र' इति नास्ति।; ०वाच ... क्षयेदस्त्र०-झ.

[5] ब्रह्माणं मधमेऽभ्यर्च्य] अ, ऊ, ऋ, औ, अं, च, छ; ०भ्यर्च्या-झ.

[6] गन्धपुष्पैः स्वनामभिः] औ; गन्धं पुष्पं स्वनामभिः-अ; ०पुष्पैः स्वनामतः-ऊ; ०पुष्पस्य नामभिः-ऋ, झ; ०पुष्पास्य नामतिः-अं; ०स्वनामभिः-च; ०सनामभिः-छ.

[7] अनन्ता विनता भद्रा] टि. ९८८ सूक्ष्मे; ०विनन्ता भद्रा-औ; ०विनन्ता भद्रा च-अ, ऋ, च, झ; अनन्त विजयश्चैव-ऊ; ०नन्ता भद्रा च-अं; ०च विनन्ता च-छ.

[8] जयन्ता भ्रमरी भ्रमा] च, छ; ०भ्रमम्-अ; ०ग्रमा-ऊ; जयन्ता ... ऋ; ०भ्रमणाय च-औ; ०भ्रमरणाय च-अं; जयन्ता भ्रमश्चीमरि-झ.

[9] प्रस्थिता परिजृम्भी च] च; ... ता परिजम्भि०-अ; ०द्वरिजृम्भी०-ऊ; ... परिजम्भी०-ऋ; ०परिजाभी०-औ; ०परिजम्भी०-अं, च; प्रस्थिता परि ... -झ.

[10] शूलिनीचेशगोचरे] सं० पा०; शूलिनीमीशगोचरे-अ, ऊ, ऋ, औ; ०गोचरेत्-अं, च; हलिनी०-छ; ... लिनि०-झ.

[11] अर्चयेत्स्वस्वनामतः] अ, ऊ, ऋ, औ, छ; ०नामता-अं; ... स्वनामतः-च; अर्चये०-झ.

[12] सघृतं गुलसंमिश्रं] ऋ, च, झ; ०गुलमिश्रं-अ; सर्षपं०-ऊ; घृतं गुलेन संमिश्रं-औ; घृतं०-अं; संप्रदं०-छ.

[13] दद्याद्दध्योदनं बलिम्] ऊ, ऋ, औ, अं, च, छ, झ; ०दध्योदनीं वलिम्-अ.

[14] ताम्बूलं दापयेत्पश्चात्] अ, ऊ, ऋ, औ, अं, च, छ; ... दापयेत्पश्चात्-झ.

[15] तृप्तेरर्घ्यं प्रदापयेत्] अ, ऊ, ऋ, च; तृप्तिरस्य०-औ; तृप्तिरव्य०-अं; किप्तिरर्घ्यं०-छ; त्रिप्तिरस्य०-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]उद्वास्य सर्वदेवांश्च [२]विष्णुमेव च देशिकः।

[मृद्ग्रहणार्थं तत्रस्थदेवेषु प्रार्थना]

[३]मृदमीश्वरकार्यार्थं गृहीत्वा [४]तदनुज्ञया॥ २७॥
[५]एतत्स्थानाश्रिता देवा [६]गच्छध्वं हि यथासुखम्।
इति विज्ञाप्य संपूज्य बलिमण्डलपूर्वके॥ २८॥

[कुन्दाल्यां पूजाप्रकारः]

[७]पञ्चगव्येन संप्रोक्ष्य [८]कुन्दालीं पृथिवीं तथा।
नववस्त्रेण संवेष्ट्य कूर्चं [९]बद्ध्वा खनित्रके॥ २९॥
गन्धपुष्पादिनाभ्यर्च्य [१०]धूपदीपादिकं ददेत्।
देशिकश्च हृदम्भोजे विन्यसेच्छक्तिमन्त्रतः॥ ३०॥
कुन्दाल्या खानयेद्भूमिं अस्त्रमन्त्रत्रयेण तु।

[मृद्ग्रहणानन्तरं तत्स्थाने अनुष्ठेयपूजादि]

पिधाय नववस्त्रेण भूमिं समतलं गुरुः।
आधारशक्तिमभ्यर्च्य धूपदीपादिकं ददेत्॥ ३१॥

[मङ्गलवाद्यैस्सह मृदमानीय अङ्कुरमण्टपे निक्षेपणम्]

[११]परिचारकमाहूय [१२]सोष्णीषं सोत्तरीयकम्।

---

१ उद्वास्य सर्वदेवांश्च] अ, ऊ, छ; ०देवाश्च-ऋ, च, झ; उदास्या सर्वदेवाश्च-औ; उद्वास्या सर्वदेवाश्च-अं.

२ विष्णुमेव च देशिकः] अ; विष्णुरेणैव०-ऊ, औ, झ; विष्णुमेव च देशिका-अं; निष्ठूरे०-च; विष्करे०-छ; विष्णुरेणैव दे ... ऋ; अत्र "व्युत्क्रमेणैव देशिकः" इति पाठश्चेत् समीचीनम् इति भाति।

३ मृदमीश्वरकार्यार्थं] अ, ऊ, च; मुदमितमिवाकार्या-औ; मुदमितलिपाकार्या-अं; रुद्र०-छ; भ्रमी०-झ; 'ऋ' मातृकायां २७ श्लोके "गच्छध्वं हि यथासुखम्" इति चतुर्थपाद एव दृश्यते।

४ तदनुज्ञया] अ, ऊ, अं, च, छ; तदनुग्ज्ञया-औ; म ... दनुज्ञा-झ.

५ एतत्स्थानाश्रिता देवा] ऊ, औ; ०श्रितो देव व-अ; ०श्रितो देव-अं, च; एतत्स्थानाश्रितो देवः-छ; एतस्धान ...तोदेवा-झ.

६ गच्छध्वं हि यथासुखम्] अ, ऊ, ऋ, च; ०सिद्धार्थं वा०-औ, अं; ०विधयासुखां-छ; ०ध्वंसि०-झ.

७ पञ्चगव्येन०] ऊ, औ, अं, च, छ; पञ्चगव्यं तु संप्रोक्ष्य-अ; ... प्रोक्ष्य-ऋ; ०संप्रो ... -झ.

८ कुन्दालीं पृथिवीं तथा] सं० पा०; कुन्दाल्यां०-अ, ऊ, ऋ, छ; कुन्दाल्या०-औ; कुन्दल्यां पृथिवी०-अं; कुन्दाल्यां पृथिवीं ततः-च; ... ल्यां०-झ.

९ बद्ध्वा खनित्रके] ऊ, अं, झ; बद्ध्वा पवित्रके-ऋ, औ; ०वद्धा पवित्रके-अ; ०बद्ध्वा खनित्रके-च; ०बध्वा खनित्रके-छ.

१० श्लो० ३० तृतीयपादे "धूपदीपादिकं ददेत्" इत्यारभ्य श्लो० ३१ चतुर्थपादे "धूपदीपादिकं ददेत्" इत्यन्तं सर्वासु मातृकासु बहुधा ग्रन्थपातो दृश्यते। अतोऽत्र सर्वासु मातृकासु विद्यमानाः पाठभेदाः न प्रदर्शिताः।

११ परिचारकमाहूय] अ, ऊ, ऋ, औ; परिचारकमहूयत्-अं; परियष्टिसमाहूय-च; परिष्टि च०-छ; परियष्टि०-झ.

१२ सोष्णीषं सोत्तरीयकम्] अ, ऊ, औ, छ; ०चोत्तरीयकम्-अं; स्सोष्णीषःसोत्तरीयकम्-च; ... सोत्त०-झ; 'ऋ' मातृकायां अयं पादः लुप्तः।

In Public domain. Digitization Muthulakshmi Research Academy

[1]शिरसा वाहयित्वा तु [2]गजे वाऽऽरोपयेद्रथे ॥ ३२ ॥
अथवा [3]पादगमनैः सर्वालंकारसंयुतम्।
[4]कुर्यान्मङ्गलवाद्यैश्च [5]स्वस्तिसूक्तसमन्वितम् ॥ ३३ ॥
[6]शनैःप्रदक्षिणं [7]कृत्वा [8]विशेदङ्कुरमण्टपम्।
[9]पुण्याहं वाचयेत्तत्र प्रोक्षयेदस्त्रमन्त्रतः ॥ ३४ ॥
संकल्प्य [10]स्थण्डिले [11]मध्ये [12]चन्द्रकुम्भं निधाय च।
[13]सोदकं कूर्चसंयुक्तं [14]हेमपल्लवसंयुतम् ॥ ३५ ॥
[15]ससूत्रं वस्त्रसंयुक्तं [16]नालिकेरफलैर्युतम्।
अभ्यर्च्य गन्धपुष्पाद्यैः [17]मध्ये चास्त्रं प्रपूजयेत् ॥ ३६ ॥
[18]गन्धाद्यैरुपचारैस्तु [19]तोषयेदोषधीश्वरम्।

[पालिकादिषु मृन्निक्षेपणं वीजनिक्षेपणं च]

[20]पालिकादीनि सर्वाणि [21]न्यसेत् पूर्वोक्तवर्त्मना ॥ ३७ ॥

---

[1] शिरसा वाहयित्वा तु] अ, ऊ, औ, अं, च, छ, झ; ... सा०-ऋ.
[2] गजे वाऽऽरोपयेद्रथे] अ, ऊ, ऋ, च; ०रथे-औ, अं, छ; ०पयेत्रथे-झ.
[3] पादगमनैः] च; पादगमने-अ, ऊ, ऋ, औ, अं, छ, झ.
[4] कुर्यान्मङ्गलवाद्यैश्च] अ, ऊ, ऋ, औ, झ; कुर्यां०-च; कुर्यामर्पभुवाद्यैश्च-छ; कुयान्मङ्गल०-अं.
[5] स्वस्तिसूक्तसमन्वितम्] अ, ऊ, ऋ, औ; ०सूक्तं०-अं, च; स्वस्वसूक्त०-छ; स्वस्तिसूक्त ... -झ.
[6] 'झ' मातृकायां 'शनैः' इत्यत्र (नैः) इत्येव दृश्यते।
[7] कृत्वा] च; कुर्याद्-अ, ऊ, ऋ, औ, अं, छ, झ.
[8] विशेदङ्कुरमण्टपम्] ऊ, च; विशेदङ्कुरमण्टपे-अ, अं; ०मण्डपे-ऋ, छ; विशेषादङ्कुरमण्डपे-औ; विशेषंदङ्कुरमण्डपे-झ.
[9] पुण्याहं वाचयेत्तत्र] अ, ऊ, औ, अं, च, छ, झ; ... येत्तत्र०-ऋ.
[10] स्थण्डिले] अ, ऊ, ऋ, औ, अं, च, छ; स्धण्डिले-झ.
[11] 'मध्ये' "इत्यारभ्य चतुर्थपादे हेमपल्लवं" इत्यन्तं 'ऋ' मातृकायां न दृश्यते।
[12] चन्द्रकुम्भं] अ, ऊ, औ, अं, छ; चन्द्रकुम्भे-च; चन्द्रकुम्भ-झ.
[13] सोदकं कूर्चसंयुक्तं] ऊ, औ, झ; सोदकान् कूर्चसंयुक्तान्-अ; सोमदा कूर्चसंयुक्तं-अं; ०कूर्चसंयुक्ता-च; ०कूर्चसंयक्तं-छ.
[14] हेमपल्लवसंयुतम्] ऊ, औ, अं, छ, झ; हेमपल्लवसंयुतान्-अ, च.
[15] ससूत्रं वस्त्रसंयुक्तं] सं० पा०; ससूत्रान् वस्त्रसंयुक्तान्-अ, औ, अं, च, छ; स्वसूत्रान्०-ऋ; 'श्लो० ३६' पूर्वार्धे 'ऊ, झ' मातृकायोः न दृश्यते।
[16] नालिकेरफलैर्युतम्] औ, अं; नालिकेरफलैर्यथा-अ, ऋ, छ; नालिकेरफलान्वितान्-च.
[17] मध्ये चास्त्रं प्रपूजयेत्] झ; मध्ये देवं समर्चयेत्-अ; ०चन्द्रं०- ऊ; ... येत्-ऋ; ०वस्त्रं (यन्त्रं)-औ, अं; ०वस्त्रं समर्पयेत्-छ; ०चन्द्रनिधाय च-च.
[18] गन्धाद्यैरुपचारैस्तु] अ, ऊ, ऋ, औ, अं, च, छ; ०रुपचो ... -झ.
[19] तोषयेदोषधीश्वरम्] अ, ऊ, औ, छ; ०धीस्वरः-ऋ; दोपये०-अं; ओपधे०-च; ... षये०-झ.
[20] पालिकादीनि सर्वाणि] अ, ऊ; ०सर्वांश्च-ऋ, अं, च, छ; पालिकादींश्च सर्वांश्च-औ; पालीकादिनि सर्वांश्च-झ.
[21] न्यसेत् पूर्वोक्तवर्त्मना] अ, ऊ, ऋ, औ, च, छ; ०पद्मना-अं; ०वन्मना-झ.

In Public domain. Digitization Muthulakshmi Research Academy

मृदमीशानमन्त्रेण [१]पालिकादिषु निक्षिपेत्।
[२]तिलसर्षपमुद्गानि [३]माषशिम्बाढकानि च॥ ३८॥
[४]कुलुत्थयवकार्पासबीजं क्षीरेण सेचयेत्।
[५]या जाता इति मन्त्रेण [६]धान्यपात्रं स्पृशन् जपन्॥ ३९॥
[७]मुहूर्तं [८]निरीक्ष्य देवेशं पूजयेद्देशिकोत्तमः।
पालिकादिसमारभ्य [९]वापयेद्धृदयेन तु॥ ४०॥
[१०]सहस्राङ्गी [११] भूषणी च [१२]पुष्पिणी [१३]मृकटी [१४]तथा।
[१५]शिखण्डिनी [१६]शक्तिनी देवी [१७]शान्तिनी पुष्पिणी तथा॥ ४१॥
[१८]अस्त्राङ्गी च [१९]उषादेवी [२०]साक्षिणी [२१]शङ्खिनी [२२]तथा।

---

१ पालिकादिषु निक्षिपेत्] अ; ०विन्यसेत्-ऊ, च; ०दीनि ०-ऋ, औ; पालिका दधि०-अं; पालिकादिवि०-छ; पालिकादिनि०-झ.

२ तिलसर्षपमुद्गानि] अ, ऊ, ऋ, औ, अं, छ; ०मुद्गं च-च; तिल ... मुद्गानि-झ.

३ माषशिम्बाढकानि च] अ, ऊ, अं; माषशि ... -ऋ; निष्पापं शिम्वाढकैः-औ; ०म्वाडकानि चैः-च; ०म्वाडकानि वैः-छ; ०म्भाडकानिवैः-झ.

४ कुलुत्थयवकार्पासबीजं] अ, ऊ, औ, च; ... लस्यवका पसिं वीजं-ऋ; कुलस्था यवकार्पासं बीजं-अं; ०कार्पांगं भीजं-छ; कुलिस्धय०-झ.

५ या जाता इति मन्त्रेण] ऊ; या जातायेति मन्त्रेण-अ, अं, च, झ; ०त्विति०-औ; ०हुति नन्त्रेण-छ 'ऋ' मातृकस्य उत्तरार्धे 'या जा' इत्यारभ्य ४० तम श्लोकस्य प्रथमपादे 'निरीक्ष्य दे' इत्यन्तं लुप्तम्।; तै० सं ४. २. ६. १.

६ धान्यपात्रं स्पृशन् जपन्] अ, छ; ०स्पृशोज्जपन्-ऊ; ०स्पृशन् जपेत्-औ, अं; स्पृशोज्जपेत्-च; ०स्पृ ... -झ.

७ मुहूर्तं] अ, औ, अं, झ; मूर्तिं-ऊ; मृभूर्तं-च; महूतं-छ; ... ... ऋ.

८ निरीक्ष्य] अ, ऊ, औ, अं, छ; निक्षिप्य-च; निरिक्ष्य-झ.

९ वापयेद्धृदयेन तु] ऊ, औ, अं, च, छ, झ; पावयेद्धृदयेन तु-अ; वापयेद्धदयेन तु-ऋ.

१० सहस्राङ्गी] अ, ऊ, ऋ, औ, अं, च, छ; सहस्त्रङ्गी-झ.

११ भूषणी च] ऊ; भूषणी-अ, स ... ऋ; भूषणी चैव-औ, अं, च, छ; द्धूषणं चैव-झ.

१२ पुष्पिणी] ऋ, औ, अं, च; पुष्पाणि-अ; पुष्पणी-ऊ, छ; पु ... झ; सर्वासु मातृकासु "पुष्पिणी" इति वारद्वयं दृश्यते।

१३ मृकटी] अ, ऋ; मृगती-ऊ; मृगदी- औ; मृगवि-अं; मृकुटी-च; विकरी-छ; मृक ... झ.

१४ तथा] अ, ऊ, ऋ, औ, अं, च, छ; तधा-झ.

१५ शिखण्डिनी] छ; त्रिकं त्रीणि च-अ; तृकर्तृणी-ऊ; त्रिकन्त्रिणी-ऋ; त्रिकं त्रीणि-औ, अं; तिन्त्रिणी-च; त्रिक त्रिकणिश-झ.

१६ शक्तिनी देवी] ऋ, छ; शक्तीनि देवि-अ; शक्तीनि देवी-ऊ; शक्तिनी देवी-ऋ, छ; निदेवि-औ, अं; शक्तनी देवी-च; शक्तिदेवि-झ.

१७ शान्तिनी पुष्पिणी तथा] सं० पा०; शान्तीनि०-अ; शान्तिनि०-ऊ, ऋ, औ, अं, छ; शान्तनि०-च शान्तिनि पुष्पिणि तथा-झ.

१८ अस्त्राङ्गी च] सं० पा०; सहस्राङ्गी-अ, ऊ, ऋ, औ, अं, च, झ; सहसंगौ-छ; चिन्त्यागमानुसारेणात्र पाठः शोधितः।

१९ उषादेवी] अ, ऊ, ऋ, च; ह्युषा०-औ; उषादेवि-अं, झ; उषादेवौ-झ.

२० साक्षिणी] अ, ऋ; संक्षुणी-ऊ; भक्षिणी-औ, अं; भक्षणी-च; भक्षणै-छ; भक्षिनि-झ.

२१ शङ्खिनी] अ, ऊ, ऋ, औ; शंधिनि-अं; शंङ्खनी-च; शंङ्खिनो-छ; शंङ्खिनि-झ.

२२ तथा] अ, ऊ, ऋ, औ, अं, च, छ; तथ-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]स्वस्तिकाङ्कुरदेवाश्च [२]पालिकादिषु [३]देवताः ॥ ४२ ॥
[४]श्रुतिः [५]स्मृतिर्धृतिर्मेधा [६]प्रशा स्वाहा स्वधा क्षमा।
[७]कान्तिर्मोहा जया भद्रा [८]गोमुखाङ्कुरदेवताः ॥ ४३ ॥
[९]अभ्यर्च्य [१०]गन्धपुष्पाद्यैः शुद्धतोयेन [११]सेचयेत्।
[१२]पिधाय नववस्त्रेण [१३]पालिकादीनि [१४]सर्वशः ॥ ४४ ॥
[१५]त्रिरात्राङ्कुरिता [१६]श्रेष्ठा [१७]भूताहाङ्कुरिताधमा।
[१८]तन्मध्ये मध्यमा प्रोक्ता [१९]तदूर्ध्वमशुभं भवेत् ॥ ४५ ॥

---

१ स्वस्तिकाङ्कुरदेवाश्च] सं० पा०; स्वस्तिकादधिदेवाश्च-अ, ऊ, ऋ, च, छ, झ; स्वस्थिका० औ; स्वस्थिकादधितेवे श्च-अं.

२ पालिकादिषु] सं० पा०; पालिकादीनि-अ, ऊ, ऋ, ओ, च, छ; ०दिनि-अं; पालिकादि ... झ.

३ देवताः] छ; देवता-अ, ऊ, ऋ, औ, अं, च, झ.

४ श्रुतिः] अ, ऊ, ऋ; श्रुति- औ, अं, च, छ, झ.

५ स्मृतिर्धृतिर्मेधा] अ, ऊ, छ; ०धृति०-ऋ, च; ०तिथिं मेधा-औ; तिथिमेधा-अं; धृतिमेथा-झ.

६ प्रशा स्वाहा स्वधा क्षमा] ऊ, छ; ०क्षमान्-अ; प्रश स्वाहा स्वधा क्षमान् औ, अं; ... क्षमान्-ऋ; प्रकाशान्ति स्वधा क्षमा-च; ०स्वथा क्षमा-झ.

७ कान्तिर्मोहा जया भद्रा] अ, ऋ; ०मर्हे जय भद्रा-ऊ; कान्तिमोहिनि०-च, औ; कानिमोहिनि०च-अं; कान्तिमोहा०-च, छ; ०भद्र-झ.

८ गोमुखाङ्कुरदेवता] सं० पा०; गोमुखाङ्कुरदेवता-च; गोमुखावधिदेवता-अ, च, झ; गोमुखाङ्कुरादधि०-ऊ, ऋ; गोमुखानि च-औ, अं.

९ 'ऋ' मातृकायां इदमर्धं नास्ति।

१० गन्धपुष्पाद्यैः] अ, ऊ; औ, छ; ०पुष्पाद्यै-अं, च, झ.

११ सेचयेत्] ऊ, औ, अं, च, छ; शोधयेत्-अ; ... -झ.

१२ पिधाय] अ, ऊ, छ; विधाय-औ, अं, च, झ; 'ऋ' मातृकायां पिधाय इति नास्ति।

१३ पालिकादीनि] अ, ऊ, ऋ, औ, अं, च, छ; ०दिनि-झ.

१४ सर्वशः] अ, ऊ, ऋ, औ, च, छ, झ; सर्वशा-अं.

१५ त्रिरात्राङ्कुरिता] च; त्रिरात्रं कुरुते-अ, ऊ, ऋ, औ, अं, छ, झ.

१६ श्रेष्ठा] च; श्रेष्ठे-अ, ऊ, ऋ, औ, अं, छ, झ.

१७ भूताहाङ्कुरिताधमा] अ; भूतरात्रं कुरुतेऽ०- ऊ; भूताहेङ्कुरिताऽ०- ऋ, च, छ; भूताहं वा तथा कुरु-औ, अं; भूताहे गुरुतायमा-झ.

१८ तन्मध्ये मध्यमा प्रोक्ता] औ, अं; तन्मध्ये ... प्रोक्ता-अ; ०मध्यमं प्रोक्तं-ऊ; ... प्रोक्ता-ऋ; तन्मध्य ०-छ; तन्मध्यमे ०-च, झ.

१९ तदूर्ध्वमशुभं भवेत्] अ, ऊ, ऋ; तदूर्ध्वं ०-औ; तदूर्ध्वं शुभरं ०-अं; तदूर्ध्वं मशाभप्रदम्-च; तदूर्ध्वमधमं ०-छ; त ... शुभं ०-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]श्वेता रक्ता च पीता च [२]श्यामा चेति चतुर्विधा।
[३]श्वेताभे कलहं विद्याद् [४]रक्ताभे राष्ट्रनाशनम्॥ ४६॥
[५]पीताभे सर्वसंपत्तिः [६]श्यामाभे राष्ट्रनाशनम्।
[७]अपूर्णानि च कृष्णानि [८]श्यामलानि तथैव च॥ ४७॥
[९]सुधूम्राणि च [१०]कुब्जानि तथा [११] तिर्यग्गतानि च।
[१२]चित्राकारोत्तमं [१३]विद्धि [१४]शिशिराकारमध्यमम्॥ ४८॥

---

१ श्वेता रक्ता च पीता च] अ, ऊ, ऋ, औ, छ; श्वेतरक्ता च०-अं; श्वेताङ्कुराच०-च; ... च पीता च-झ.

२ श्यामा चेति चतुर्विधा] अ, ऊ, ऋ, छ; पीतं श्यामं च कृष्णकम् च-औ, अं; ०विधाः-च; ०विंध-झ.

३ श्वेताभे कलहं विद्याद्] ऊ, ऋ; श्वेतभे०-अ; एकाहे कलहं विद्यान्-औ; एकाहे कलहिं विद्या-अं; ०विद्या-च; ०द्यान्-छ; श्वेताहे कलहं विद्या-झ.

४ रक्ताभे राष्ट्रनाशनम्] अ, ऊ, ऋ, च, छ, झ; द्वयहे राष्ट्रस्य०-औ; द्विधाते०-अं.

५ पीताभे सर्वसंपत्तिः] अ, ऊ, ऋ; त्र्यहे सर्वसंपत्ति-औ; त्रिधाहे सर्वसंपत्ति-अं; पीताहे सर्वसंपत्ति-च; ०सर्वसंपत्ति-छ; पीता सर्वसंपत्ति-झ.

६ श्यामाभे राष्ट्रनाशनम्] सं० पा०; ०वास्तु०-अ, ऊ, ऋ, झ; श्यामाहे०-औ; ०माहे वास्तु०-अं; श्यामाहे ०-च; ०वास्तु-नाशना-छ.

७ अपूर्णानि च कृष्णानि] अ, ऊ, औ, अं, छ; अपूर्णा न च कृष्णा ... ऋ; ०कुब्जानि-च; ... ष्णानि-झ.

८ श्यामलानि] अ, ऊ, औ, अं, च, छ, झ; ... मलानि-ऋ.

९ सुधूम्राणि च] अ, ऊ, ऋ, च, झ; संपूर्णानि च-औ; सपुमनि च-अं; सधूम्राणि च-छ.

१० कुब्जानि तथा] अ, ऋ, औ, अं, च, झ; कृष्णानि०-ऊ; कुंभानि०-छ.

११ तिर्यग्गतानि च] च; दिव्यग०-अ; दिव्यद्र०-ऊ, झ; दिव्य ... -ऋ; दिव्यं०-औ; दिव्यत्गतानि सा-अं; भिषक् ०-छ.

१२ चित्राकारोत्तमं] अ, ऊ, औ, अं, च, छ; चिताककोत्तमं-झ; 'ऋ' मातृकायां इदमर्धं नास्ति।

१३ विद्धि] अ, अं, छ; वृद्धिः-ऊ, औ; विव्र-झ; 'च' मातृकायां 'विद्धि' इति नास्ति।

१४ शिशिराकारमध्यमम्] अ, ऊ; शिशका०-औ; शितिकर्ममध्यं भ्वेत्-अं; विद्याच्छिकराकार०-च; ०रम् मध्यमम्-छ; ०कामध्यमम्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]ध्वजाकृत्यधमं [२]प्रोक्तं [३]दक्षिणावर्तकं [४]शुभम्।
[५]अशुभैर्लक्षणैर्युक्तं [६]शान्तिमाशुकरं [७]जपेत्॥ ४९॥
[८]एवं यः कुरुते मर्त्यः [९]स पुण्यां गतिमाप्नुयात्।

॥ [१०]इति सूक्ष्मशास्त्रेऽङ्कुरार्पणविधिर्द्वादशः पटलः॥

---

१ ध्वजाकृत्यधमं] ऊ, औ; ध्वजाकृत्याधमं-अ, ऋ; ध्वजत्यागं-अं; ध्वजां ०-च; ध्वजाकारधमं-छ; ध्वजाका ... -झ.
२ प्रोक्तं] अ, ऊ, ऋ, औ, अं, च, छ; ... क्तं-झ.
३ दक्षिणावर्तकं] अ, ऊ, ऋ, औ, च, छ, झ; दक्षिणापत्तकं-अं.
४ शुभम्] अ, ऊ, च, छ, झ; शुकम्-ऋ, औ, अं.
५ अशुभैर्लक्षणैर्युक्तं] अ, औ, च, छ; ०र्युक्ते-ऊ; ०युक्तं-ऋ; अशुभेर्ल०-अं; अशुभैल०-झ.
६ शान्तिमाशुकरं] अ, ऋ, औ, छ, झ; शान्ति होमं-ऊ; शान्तिमामा०- अं; शान्तिमाङ्कुरं-च.
७ जपेत्] छ, झ; भवेत्-च; शुभेत्-अ, ऋ; समाचरेत्-ऊ; शुपे-औ, अं.
८ एवं यः कुरुते मर्त्यः] अ, ऊ, ऋ, औ, च, छ, झ; एवं यः कुरुते मर्त्य-अं.
९ स पुण्यां गतिमाप्नुयात्] अ, ऊ, ऋ, औ, अं, च, छ; स पुण्यां गतिमा ... -झ.
१० इति सूक्ष्मशास्त्रेऽङ्कुरार्पणविधिर्द्वादशः पटलः] अ; इति सूक्ष्मे अङ्कुरार्पणविधिः०-ऊ; इति सूक्ष्मशास्त्रेऽङ्कुरार्पणविधिः०-ऋ; ०विधिर्नाम०-औ; ०विधि० हरिः ओं शुभमस्तु-अं; ०विधि पटलः-च; ०र्नाम त्रयोदशः पटलः-छ; ०विधिं नाम चतुरधिकशत पटलः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

॥ [1]त्रयोदशः पटलः ॥

[उत्सवविधिः]

उत्सवस्य विधिं वक्ष्ये [2]श्रृणु त्वं तत् प्रभञ्जन।
[3]कीर्तिदं विजयं पुण्यमायुरारोग्यवर्धनम्॥ १ ॥
[4]भुक्तिमुक्तिप्रदं दिव्यं सर्वकामार्थसाधनम्।

[साकल्यादिचतुर्विधोत्सवः]

[5]साकल्यं [6]पावनं शान्तं [7]मङ्गल्यं [8]च [9]चतुर्विधम्॥ २ ॥
[10]ध्वजारोहादितीर्थान्तं साकल्यं [11]चेति कीर्तितम्।
[12]ध्वजारोहं विना कुर्याच्छेषं पूर्ववदेव तु॥ ३ ॥
पावनं तत् समाख्यातं शान्तिकं च ततः श्रृणु।
[13]बलिहोमादिकं [14]हित्वा पूर्वाह्णे वापराह्णके॥ ४ ॥

---

[1] अयं पटलः अ (टि. १९१, पृ० ४६-८२), ऊ (टि. ३८, पृ० ९९-१७४), ऋ (टि. ९७, पृ० ३७-३८), औ (टि. ३४८, पृ० ७५-११३), अं (टि. ३५३, पृ० ६४-६६), छ (टि. ९६७, पृ० ५३-९०), झ (टि. १०१६, पृ० २६३-३०१), ति (तिरुवावडुतुरैक्षेत्रवर्ति-शैवमठस्थहस्तलिखितकागदमातृका, पृ० १९-३०) इत्येतेषु हस्तलिखितकोशेषु दृश्यते।

[2] श्रृणु त्वं] अ, ऊ, ऋ, छ; श्रृणुध्वं-झ, औ, अं, ति.

[3] कीर्तिदं विजयं पुण्यम्] अ, ऊ, ऋ, औ, अं, छ, ति; कीर्तिदं ... -झ.

[4] भुक्तिमुक्तिप्रदं दिव्यं] ऊ, औ, झ; भुक्तिमुक्तिप्रदं घं ... -अ; भुक्तिप्रदातव्यं-ऋ; भुक्तिमुक्तिप्रदातव्यं-अं, ति; भुक्तिमुक्तिप्रदं तस्य-छ.

[5] 'साकल्यं पावनं शान्तं मङ्गल्यं च चतुर्विधम्। ध्वजारोहा' पर्यन्तं 'ऋ' मातृकायां न विद्यते। साकल्यं साभवं सौख्यं सावश्यं सायुज्यं तथा। इत्येकमर्धं 'औ' 'अं' मातृकयोरधिकं वर्तते।

[6] पावनं] अ, ऊ, औ, अं, छ, ति; पावकं-झ.

[7] मङ्गल्यं] अ, अं, छ; माङ्गल्यं-ऊ, औ, झ, ति.

[8] च] अ, छ, औ, अं, झ, ति; तु-ऊ.

[9] चतुर्विधम्] अ, ऊ, औ, अं, छ, ति; चतुर्विथम्-झ.

[10] ध्वजारोहादितीर्थान्तं] अ, ऊ, औ, अं, छ, ति; ध्वजा ... र्थान्तं-झ.

[11] चेति-अ, ऋ, औ, अं, छ, झ, ति; इति-ऊ.

[12] ध्वजारोहं विना कुर्याच्छेषं पूर्ववदेव तु] ऊ, ऋ, छ; ध्वजमेकं हित्वा पूर्वाह्णे वापराह्णके-अ; ध्वजमेकं विना कुर्याच्छेषं पूर्ववदेव तु-औ, अं, ति; ध्वजमेकं विना कुर्याच्छेष्टं पूर्ववदेव तु-झ.

[13] बलिहोमादिकं] ऊ, अं, छ, ति; वह्निहोमादिकं-ऋ, औ; होमादिकं-झ.

[14] हित्वा] ऋ, औ, अं, ति; हुत्वा-ऊ, छ; हीत्वा-झ.

In Public domain. Digitization Muthulakshmi Research Academy

सायाह्ने चोत्सवं कुर्याच्छान्तिकं [१]त्विति विद्यते।
[२]यजमानेच्छया कुर्यात् प्रातःकाले शिवोत्सवम्॥ ५॥
[३]मङ्गल्यं [४]त्विति विख्यातं तत्कालमधुना शृणु।

[साकल्याद्युत्सवकालनिर्णयः]

सावनं [५]चान्द्रनक्षत्रे सौरं चैव चतुर्विधम्॥ ६॥
[६]एवं [७]चतुर्विधे मासे चोत्सवं [८]सम्प्रकल्पयेत्।
सौरमासे विधेयं स्यात् [९]साकल्यं [१०]पावनोत्सवम्॥ ७॥
[११]सावने [१२]चान्द्रनक्षत्रमासेषु [१३]शान्तिमङ्गलौ।
उत्सवं [१४]कारयेद्वापि सौरे सर्वोत्सवं कुरु॥ ८॥

[प्रकारान्तरेण उत्सवकालः]

पुष्यमासे तु पुष्यान्तं माघमासे मघान्तकम्।
[१५]फाल्गुने चोत्तरान्तं तु चैत्रे [१६]चित्रान्तम् [१७]इष्यते॥ ९॥
वैशाखे तु विशाखान्तं मूलान्तं ज्येष्ठमासके।
[१८]आषाढे [१९]चोत्तराषाढा श्रावणे श्रवणान्तकम्॥ १०॥

---

[१] त्विति] अ, ऊ, ऋ, औ, अं, झ, ति; क्षिति-छ.
[२] यजमानेच्छया] अ, ऊ, ऋ, झ, ति; पौष्टिकं चोत्सवं- औ, अं; यजमानैश्च यः-छ.
[३] मङ्गल्यं] झ, औ, अं; मङ्गलं-अ, ऋ, ति; माङ्गल्यं-ऊ; स्वमङ्गल्यं-छ अत्र श्लोकाः २- ५ पू. कारणागम (उत्तरभागः), २४ तमपटले, ४२- ४५ श्लोकैः सार्धं वहुधा साम्यं भजन्ते।
[४] त्विति] अ, ऊ, ऋ, झ, ति; क्षिति-छ; चेति-औ, अं.
[५] चान्द्रनक्षत्रे] औ; चान्द्रनक्षत्रं-अ, ऊ, ऋ, अं, छ, ति; चाद्रनक्षत्रं-झ.
[६] एवं] अ, ऋ; एतत्-ऊ, छ, झ, औ, अं, ति.
[७] चतुर्विधे] अ, औ, अं, छ, ति; चतुर्विधं-ऊ; चतुर्विथे-झ; [एवं चतुर्वि]धे मासे चोत्सवं सम्प्रकल्पयेत्। सौरमासे विधे' पर्यन्तं 'ऋ' मातृकायां न दृश्यते।
[८] सम्प्रकल्पयेत्] अ, अं, छ, झ, ति; परिकल्पयेत्-ऊ.
[९] साकल्यं] अ, ऊ, ऋ, औ, छ, झ, ति; कल्प्यं-अं.
[१०] पावनोत्सवम्] अ, ऊ, ऋ, छ, झ, ति; पवनोत्सवम्-औ, अं.
[११] सावने] ऊ, झ; सावनं-अ, ऋ, औ, अं, ति; साधने-छ.
[१२] चान्द्रनक्षत्रमासेषु] ऊ, औ, ति; चान्द्रनक्षत्रं मासेषु-अ, ऋ, अं, झ; चान्द्रनक्षत्रे-छ.
[१३] शान्तिमङ्गलौ] ऊ, झ, ति; शान्तमङ्गलौ-अ, ऋ, औ, छ; शान्तशान्तमङ्गलौ-अं.
[१४] कारयेद्वापि] अ, ऋ, औ, अं, छ, झ, ति; कारयेद्विद्वान्-ऊ.
[१५] फाल्गुने] अ, ऊ, ऋ, औ, अं, छ, ति; फल्गुने-झ.
[१६] चित्रान्तम्] अ, ऋ, औ, अं, छ, ति; चैत्रान्तम्-ऊ; चित्तान्तम्-झ.
[१७] इष्यते] छ; उच्यते-अ, ऊ, ऋ, औ, अं, झ, ति.
[१८] आषाढे] अ, ऊ, ऋ, औ, अं, झ, ति; आषढे-छ.
[१९] चोत्तरापाढा] ऊ; चोत्तराषाढे-अ, ऋ, औ, अं, छ, ति; चोत्तराषाढं-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]पूर्वाभाद्रं हि तन्मासे [2]अश्विन्याश्विजमासके।
कार्तिके कृत्तिकान्तं हि [3]शैवान्तं मार्गशीर्षके॥ ११॥
[4]पौर्णयुक्तमयुक्तं [5]वा [6]मासऩक्षं प्रधानकम्।
[7]चतुर्दश्याममायां च [8]षष्ठ्यष्टम्योर्विशेषतः॥ १२॥
[9]राजाभिषेके जन्मर्क्षे युद्धारम्भावसानके।
[10]अन्यपुण्यदिनान्तेषु [11]चोत्सवं सम्प्रकल्पयेत्॥ १३॥

[शैवाद्युत्सवानां नवविधत्वम्]

[12]शैवं गौणं [13]भौतिकं च भौवनं दैविकं तथा।
पैतृकं चैव कौमारं [14]सावित्रं चान्द्रमेव च॥ १४॥
[15]शैवमेकाहमित्युक्तं त्रियहं गौणमुच्यते।
पञ्चाहं [16]भौतिकं प्रोक्तं सप्ताहं भौवनं स्मृतम्॥ १५॥
नवाहं [17]दैविकं प्रोक्तं [18]रुद्राहं पैतृकं [19]स्मृतम्।

---

[1] पूर्वाभाद्रं हि तन्मासे] ति; पूर्वाषाढं हि तन्मासे-अ, झ; पूर्वाषाढां तन्मासे-ऊ; पूर्वाषाढं वितौ चासे-छ; पूर्वाषाढं भाद्रपदे-औ, अं.

[2] अश्विन्याश्विजमासके] सं० पा०; चाश्वान्तश्चाश्वमासके-अ, ऊ, ति; चाश्वान्तं-ऋ; चाण्डं तस्याश्वमासके-छ; चाश्वान्तं चाश्व ... सके-झ; अश्विनीं चाश्वमासके-औ; अश्वन्योश्विजमासके-अं 'चाश्वमासके। कार्त्तिके कृत्तिकान्तं हि' पर्यन्तं 'ऋ' मातृकायां लुप्तम्।

[3] शैवान्तं] ऊ, झ, ति; शैवान्ते- अ, औ, अं, छ; ... -ऋ.

[4] पौर्णयुक्तमयुक्तं] ऊ, ऋ, औ, अं, छ, झ; पूर्णायुक्तमयुक्तं-अ; पूर्वयुक्तमयुक्तं-ति.

[5] वा] अ, ऊ, औ, अं, छ, ति; हि-ऋ; व-झ.

[6] मासऩक्षं प्रधानकम्] अ, ऋ, औ, अं, झ, ति; मासऩक्षप्रधानकम्-ऊ; मासं तर्क्षं प्रधानकम्-छ.

[7] चतुर्दश्याममायां च] औ; चतुर्दश्याममावास्यां-अ, ऊ, ऋ, अं, छ, ति; चतुर्दश्याममा ... -झ.

[8] षष्ठ्यष्टम्योः] अ, औ; षष्ठ्यष्टम्यां-ऊ, ऋ, ति; षष्टाष्टम्यां-छ; षष्ठ्याष्टम्यां-झ, अं.

[9] राजाभिषेके जन्मर्क्षे] ति; राजाभिषेकजन्मर्क्षे-अ, ऊ, ऋ, झ; राजाभिषेकजन्मर्क्ष-औ, अं, छ.

[10] अन्यपुण्यदिनान्तेषु] सं० पा०; अन्यत् पुण्यदिनान्तेषु-अ, ऋ, झ, ति; अन्यपुण्य०-ऊ; अन्यत् पुण्यदिनान्ते तु-छ; अन्यत् पुण्यदिनादेषु-औ, अं.

[11] चोत्सवं सम्प्रकल्पयेत्] अ, ऊ, ऋ, छ, झ, ति; सोत्सवं सम्प्रपूजयेत्-औ; सोत्सवं सम्प्रपूजयेत्-अं.

[12] शैवं गौणं] अ, ऊ, ऋ, औ, अं, छ, ति; शै ... णं-झ.

[13] भौतिकं] ऊ; विभूतं-अ; विभूतिं-ऋ, औ, अं, छ, झ, ति.

[14] सावित्रं] ऊ, ऋ, औ, अं; सावित्रिं-अ, झ, ति; साएं-छ.

[15] शैवमेकाहमित्युक्तं ... पक्षं सावित्रमेव च। पर्यन्तं श्लोकद्वयं 'झ' मातृकायां न विद्यते।

[16] 'भौतिकं प्रोक्तं सप्ताहं भौवनं स्मृतम्। नवाहं' पर्यन्तं 'ऋ' मातृकायां न दृश्यते।

[17] दैविकं] अ, ऊ, ऋ, औ, अं, ति; वैदिकं-छ.

[18] रुद्राहं] अ, ऊ, ऋ, औ, अं, ति; भद्राहं-छ.

[19] स्मृतम्] अ, ऋ, औ, अं, छ, ति; तथा-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

त्रयोदशाहं कौमारं पक्षं सावित्रमेव च॥ १६॥
[१]चान्द्रं सप्तदशाहं स्याद् [२]उत्तमादिक्रमादिके।
शैवं गौणं [३]भौतिकं च [४]उच्यते कन्यसत्रयम्॥ १७॥
[५]भौवनं दैविकं चैव पैतृकं मध्यमत्रयम्।
कौमारं चैव सावित्रं चान्द्रं [६]चैवोत्तमत्रयम्॥ १८॥
एवं नवविधं प्रोक्तमुत्सवं क्रमशो [७]बुधैः।
[८]एतेषां तु क्रमं वक्ष्ये [९]शृणु त्वं तत्प्रभञ्जन॥ १९॥
[१०]वृद्धिदं विजयं [११]सौख्यं त्रिविधं परिकीर्तितम्।

[शैवाद्युत्सवभेदे वृद्धिदाद्युत्सवक्रमः]

[वृद्धिदक्रमः]

[१२]तत्पूर्वे रात्रिसंयुक्ते सायंकाले [१३]समारभेत्॥ २०॥
प्रातःकाले तु तीर्थं स्याद् एकाहे तु बलिद्वयम्।
एवं वै वृद्धिदं प्रोक्तं [१४]विजयं च ततः शृणु॥ २१॥

---

[१] चान्द्रं] ऊ, ऋ, औ, अं, छ, झ, ति; चन्द्रं-अ.

[२] उत्तमादिक्रमादिके] अ, ऊ, ऋ, ति; उत्तमादिकमन्तिके-छ; उत्तमादिक ... के-झ; उत्तमादिक्रमान्तिके-औ; रक्तमादिक्रमान्तिरे-अं.

[३] भौतिकं] ऊ; विभूतिं- अ, ऋ, औ, अं, झ, ति; वा भूतिं-छ.

[४] उच्यते कन्यसत्रयम्] ऊ, ऋ, अं, छ, झ; पंसवं-अ; उच्यन्ते कन्यसत्रयम्-औ; उच्यते कन्यसं धतम्-ति "भौवनं दैविकं चैव पैतृकं मध्यमत्रयम्।कौमारं चैव सावित्रं चान्द्रं चैवोत्तमत्रयम्।एवं नवविधं प्रोक्तम् उत्सवं" इति सार्धैकश्लोकः 'अ' मातृकायां न दृश्यते। 'अं' मातृकायाम् अस्मिन् पटले एतावत्पर्यन्तमेव श्लोकाः सन्ति। अतः परं न विद्यन्ते।भौवने भविकं चैवं न पत्रिकामत्रापिनी कौमारं चैव सावित्रं चान्द्रं वै चोत्तमत्रयम्।एवं नवविधं प्रोक्तम् उत्सवं कामशो बुधैः। इतीमाः पङ्क्तयः 'छ' मातृकायां दृश्यन्ते।

[५] भौवनं] ऊ, ऋ, अं, झ, ति; भौवं-औ; अस्मिन् श्लोकार्धस्थाने "भौवने भविकं चैवं न पत्रिकामत्रापिनी" इति 'छ' मातृकायां विद्यते।

[६] चैवोत्तमत्रयम्] ऊ, ऋ, झ, ति; वै चोत्तमत्रयम्-औ, अं, छ.

[७] बुधैः] अ, ऊ, ऋ, अं, झ, ति; बुधाः-औ.

[८] एतेषां] अ, औ, ति; एषां-ऊ; 'एतेषां तु क्रमं वक्ष्ये' इत्ययं पादः 'ऋ' मातृकायां न विद्यते।

[९] शृणु त्वं] अ, ऊ, ऋ, औ, छ, ति; शृणुध्वं-झ.

[१०] वृद्धिदं] अ, ऊ, ऋ, औ, छ, ति; प्रसिद्धं-झ.

[११] सौख्यं] अ, ऊ, ऋ, छ, झ, ति; सौम्यं-औ.

[१२] तत्पूर्वे रात्रिसंयुक्ते सायंकाले] अ, ऋ, औ, ति; तत्पूर्वरात्रिसंयुक्तसायंकाले-ऊ; तत्पूर्वरात्रिसंयुक्ते-छ; ... र्वरात्रिसंयुक्तसायंकाले-झ.

[१३] समारभेत्] अ, ऊ, ऋ, झ, ति; समाचरेत्-छ.

[१४] विजयं च] अ, ऊ, ऋ, औ, छ, ति; विजय ... -झ.

In Public domain. Digitization Muthulakshmi Research Academy

[विजयक्रमः]

तद्दिनस्य तु रात्रौ तु उत्सवं कारयेत् [१]ततः।
बलिमेकं [२]समापाद्य अन्त्ये तीर्थं समाचरेत्॥ २२॥
[३]एवं वै विजयं प्रोक्तं सौख्यकं च ततः शृणु।
तद्दिनस्य तु पूर्वाह्णे मध्याह्ने वापराह्णके॥ २३॥
यानमेकं समापाद्य अन्त्ये तीर्थं समाचरेत्।

[त्रियाहोत्सवे वृद्धिदाद्युत्सवक्रमः]

एकाहं [४]वृद्धिकारि स्यात् [५]त्रियहं शृणु सुव्रत॥ २४॥

[वृद्धिदक्रमः]

[६]निर्दिष्टदिवसात् पूर्वे [७]सायाह्ने [८]तु समाचरेत्।
[९]यानमेकं [१०]समापाद्य [११]प्रभाते [१२]तीर्थमाचरेत्॥ २५॥
[१३]त्रिदिनं चोत्सवं कुर्याद् [१४]बलिं कौशिकसङ्ख्यया।
चतुर्थेऽहनि सम्प्राप्ते प्रभाते तीर्थमाचरेत्॥ २६॥

[विजयक्रमः]

तद्दिने चास्त्रयागं च [१५]सायाह्नसमये बुधः।
[१६]उत्सवं तु समारभ्य [१७]बलीनां तु चतुर्थकम्॥ २७॥

---

[१] ततः] अ, ऊ, ऋ, औ, छ, ति; बुधः-झ.
[२] समापाद्य अन्त्ये] औ, ति; समापाद्यान्त्ये-अ, ऋ; समासाद्य अन्त्ये-ऊ; समावाह्य प्रभाते-छ; समापाद्य प्रभाते-झ.
[३] एवं वै वि[जयं] प्रोक्तं सौख्यकं च ततः शृणु। तद्दिनस्य तु पूर्वाह्णे मध्याह्ने वापराह्णके। यानमेकं समापाद्य अ[न्त्ये] तीर्थं स[माच]रेत्। इत्ययं सार्धैकश्लोकः 'झ' मातृकायामेव विद्यते।
[४] वृद्धिकारि] औ; वृद्धिकादि-अ, ऊ, ऋ, छ, झ; वृद्धिकादिं-ति.
[५] त्रियहं] ऊ, ऋ; त्रियाहं-अ, छ, औ, झ; त्र्यहं-ति.
[६] इतः परं "कर्मपूरणिकाकोलम्" (श्लोक. ३५५, प्रथमपादपर्यन्तं) 'ऋ' मातृकायां लुप्तम्।
[७] सायाह्ने] ऊ, झ, ति; सायाह्ने-अ, छ, औ.
[८] तु] अ, ऊ, औ, छ, ति; च-झ.
[९] यानमेकं] छ, झ; यानमूर्तिं-अ, ऊ, ति; याजमूर्तिं-औ.
[१०] समापाद्य] छ, झ; समुद्दिश्य-अ, ऊ, ति; रूतुद्दश्या-औ.
[११] प्रभाते] अ, ऊ, औ, ति; अन्त्ये-छ; अत्ये-झ.
[१२] तीर्थमाचरेत्] अ, ऊ, औ, छ, ति; तीर्थ समाचरेत्-झ.
[१३] त्रिदिनं चोत्सवं कुर्याद्] अ, ऊ, छ, ति; त्रिदिना चोत्सवं कुर्याद्-झ; यागपूजाग्निहोमश्च-औ.
[१४] बलिं कौशिकसङ्ख्यया] अ, ऊ, ति; बलिकौशिकसङ्ख्यया-औ, छ, झ.
[१५] सायाह्नसमये बुधः] अ, ऊ, झ, ति; सायाह्ने समये बुधः-छ; सायाह्ने समये यजेत्-औ.
[१६] उत्सवं तु] अ, छ, औ, झ, ति; उत्सवान्ते-ऊ.
[१७] बलीनां] सं० पा०; बलिनां-झ, औ, ति; बलीनं-अ; बलिना-ऊ; बलिनं-छ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]तृतीयदिवसे चैव [2]तीर्थकर्म समाचरेत्।

[त्र्याह्निकक्रमः]

नित्यपूजावसाने तु [3]त्रिदिनं चोत्सवं कुरु॥ २८॥
[4]त्रियहेषु च यानान्ते जलक्रीडां समाचरेत्।

[पञ्चाहोत्सवे वृद्धिदाद्युत्सवक्रमः]

एवं [5]त्र्याहम् इत्युक्तं पञ्चाहं च ततः श्रृणु॥ २९॥

[वृद्धिदक्रमः]

सायंकाले समारभ्य [6]तत्पूर्वदिवसे [7]युतः।
[8]यानं कुर्याद्विशेषेण दशमं बलिमाचरेत्॥ ३०॥
[9]षष्ठेऽहनि प्रभाते तु तीर्थं कुर्यात्तु देशिकः।

[विजयक्रमः]

[10]यथानिर्दिष्टदिवसे सायाह्ने तु समारभेत्॥ ३१॥
वसुसङ्ख्याबलिं दद्यात् पञ्चाहे तीर्थमाचरेत्।

[त्र्याह्निकक्रमः]

[11]तद्दिनाद्दिवम् आरभ्य नित्यपूजावसानके॥ ३२॥
[12]पञ्चाहे चोत्सवं कुर्याद्यानान्तं तीर्थमाचरेत्।
एतत् [13]कन्यसमित्युक्तं मध्यमं च ततः श्रृणु॥ ३३॥

---

[1] तृतीयदिवसे] ति; तृतीये-अ, ऊ, औ, छ; त्रिदिने-झ.
[2] तीर्थकर्म] अ, ऊ, औ, छ, ति; ... -झ.
[3] त्रिदिनं] अ, औ, छ, झ, ति; त्रिदिने-ऊ.
[4] त्रियहेषु] ऊ; त्रियाहेषु-औ, ति; त्रियाह्वेषु-अ; त्रयहेन्दु-छ; त्रिदिनेषु-झ.
[5] त्र्याहम्] ऊ; त्रियाहम्-अ, औ, झ; त्र्ययहम्-छ, ति.
[6] तत्पूर्वदिवसे-अ, ऊ, औ, ति; तदूर्ध्वदिवसे-छ; तत्पूर्वे दिवसे-झ.
[7] युतः] ऊ; युतम्-अ, औ, छ, झ, ति.
[8] यानं] अ, ऊ, झ, ति; धनं-छ; ध्यानं-औ.
[9] षष्ठेऽहनि] अ, ऊ, झ, ति; षष्ठेऽभनि-छ; "षष्ठेऽहनि ... सायाह्ने तु समारभेत्" पर्यन्तं श्लोकः 'औ' मातृकायां न विद्यते।
[10] यथानिर्दिष्टदिवसे] अ, छ, झ, ति; यथोद्दिष्टे तु दिवसे-ऊ.
[11] तद्दिनाद्दिवम्] झ, ति; तद्दिनाद्दिनम्-अ, ऊ, छ; तद्दिनस्य तुम्-औ.
[12] पञ्चाहे चोत्सवं कुर्याद्यानान्तं] अ, ऊ, छ, ति; पञ्चाहे चोत्स ... त्यानान्तं-झ; पञ्चाहोत्सवं कुर्याद्यानान्तं-औ.
[13] कन्यसम्०] अ, ऊ, औ, झ, ति; कान्यसम्०-छ.

In Public domain. Digitization Muthulakshmi Research Academy

[सप्ताहोत्सवे वृद्धिदाद्युत्सवक्रमः]

[वृद्धिदक्रमः]

यथानिर्दिष्टदिवसात् पूर्वरात्रौ समारभेत्।
होमं कुर्यात्तु तद्रात्रौ बलिं [१]चतुर्दशं ददेत्॥ ३४॥
चूर्णोत्सवं [२]चाष्टमेऽह्नि कौतुकं तीर्थमाचरेत्।

[विजयक्रमः]

रात्रौ निर्दिष्टदिवसे उत्सवं तु समाचरेत्॥ ३५॥
[३]होमं बलिं च यानं च [४]तद्रात्रौ कारयेद्बुधः।
भानुसङ्ख्याबलिं कुर्यात् सप्ताहे तीर्थमाचरेत्॥ ३६॥

[ब्राह्मिकक्रमः]

[५]निर्दिष्टदिवसादि स्यात् पूर्वाह्णे वापराह्णके।
[६]केवलं भ्रमणं [७]कुर्यादन्ते तीर्थं समाचरेत्॥ ३७॥
भौवनं त्विति विख्यातं दैविकं च ततः शृणु।

[नवाहोत्सवे वृद्धिदाद्युत्सवक्रमः]

[वृद्धिदक्रमः]

निर्दिष्टदिवसात् [८]पूर्वे सायंकाले [९]समाचरेत्॥ ३८॥
[१०]स्मृतिसङ्ख्याबलिं दद्यात् दशमे तीर्थमाचरेत्।

[ब्राह्मिकक्रमः]

[११]नित्यपूजावसाने तु यानमेकं समाचरेत्॥ ३९॥
तदन्ते कौतुकं तीर्थं [१२]ब्राह्मिकं त्विति विद्यते।

---

१ चतुर्दशं ददेत्] अ, औ, ति; कुर्याचतुर्दशम्-ऊ; चतुर्दशमाचरेत्-छ; च दशमाचरेत्-झ.

२ चाष्टमेऽह्नि] छ, झ; चाष्टाह्नि-अ; तथाष्टाह्नि-ऊ; पञ्चाहे-औ; च चाष्टेऽह्नि-ति.

३ होमं बलिं च यानं च] अ, छ, झ; होमं च बलिदानं च-ऊ, ति; होमं बलिं च तद्भद्रा-औ.

४ तद्रात्रौ कारयेद्बुधः] अ, ऊ, छ, झ, ति; पञ्चपात्रे च कारयेत्-औ.

५ निर्दिष्टदिवसादि स्यात्] अ, औ, छ, ति; निर्दिष्टदिवसादिव्यात्-ऊ; ... ष्टदिवसादि स्या-झ.

६ केवलं भ्रमणं] अ, ऊ, औ, छ, ति; केवलभ्रमणं-झ.

७ कुर्यादन्ते] अ; कुर्यादन्त्ये-ऊ, औ, छ, ति; कुर्यादत्ये-झ.

८ पूर्वे] अ, ऊ, औ, झ, ति; पूर्वं-छ.

९ समाचरेत्] अ, औ, छ, झ, ति; विशेषतः-ऊ.

१० स्मृतिसङ्ख्याबलिं] अ, औ, झ, ति; ०सङ्ख्यबलिं-ऊ; सति सङ्ख्यां बलिं-छ.

११ नित्यपूजावसाने तु यानमेकं] सं० पा०; नित्यपूजावसानान्ते यानमेकं-अ, ऊ, औ, छ, ति; नित्यपूजावसाना ... कं-झ.

१२ ब्राह्मिकं] अ, ऊ, झ; ग्राहिकं-छ; ब्राह्मिकत्वा-औ; ब्राह्मीकं-ति.

In Public domain. Digitization Muthulakshmi Research Academy

दैविकं [1]त्विति विख्यातं पैतृकं च ततः शृणु॥४०॥

[रुद्राहोत्सवे वृद्धिदाद्युत्सवक्रमः]

[वृद्धिदक्रमः]

तद्दिनात् पूर्वदिवसे [2]चास्त्रयागं समाचरेत्।
द्वाविंशतिबलिं [3]दद्यात् तीर्थं [4]तु द्वादशाह्निके॥४१॥
वृद्धिदं त्विति विख्यातं विजयं च ततः शृणु।

[विजयक्रमः]

यथानिर्दिष्टदिवसे [5]साये चोत्सवमाचरेत्॥४२॥
[6]रुद्राहे कौतुकं तीर्थं [7]द्वाविंशद्बलिमाचरेत्।

[त्राह्निकक्रमः]

[8]पूर्वोक्तयानमार्गेण केवलं चोत्सवं कुरु॥४३॥
[9]त्राह्निकं त्विति विख्यातम् [10]अन्ते तीर्थं समाचरेत्।
[11]मध्यमत्रितयं प्रोक्तम् [12]उत्तमत्रितयं शृणु॥४४॥

[त्रयोदशाहोत्सवे वृद्धिदाद्युत्सवक्रमः]

[वृद्धिदक्रमः]

तत्पूर्वदिवसे विद्वान् अस्त्रयागं समाचरेत्।
चतुर्दशाहे तीर्थं स्यात् [13]षड्विंशद्बलिमाचरेत्॥४५॥
[14]एतद्वै [15]वृद्धिदं प्रोक्तं विजयं शृणु सुव्रत।

---

[1] त्विति] अ, ऊ, औ, झ, ति; चेति-छ.
[2] चास्त्रयागं समाचरेत्] अ, ऊ, औ, छ, ति; अ ... चरेत्-झ.
[3] दद्यात्] ऊ; कुर्यात्-अ, औ, छ, झ.
[4] तु द्वादशाह्निके] ऊ; त्रयोदशाहके-अ, औ, झ; त्रयोदशे दिने-छ; त्रयोदशाह्निके-ति.
[5] साये चोत्सवमाचरेत्] अ, ऊ, छ; सा ... चोत्सवमाच ... -झ; सायं सोत्सवमाचरेत्-औ; चोत्सव-माचरेत्-ति.
[6] रुद्राहे] अ, ऊ, औ, ति; रुद्राभे-छ; ... -झ.
[7] द्वाविंशद्बलिमाचरेत्] अ, ऊ, ति; विंशद्बलिमथाचरेत्-छ, झ; चोत्सवं तु समाचरेत्-औ.
[8] पूर्वोक्तयानमार्गेण ... अन्ते तीर्थं समाचरेत्" पर्यन्तं 'औ' मातृकायां न दृश्यते।
[9] त्राह्निकं] अ, ऊ, छ, ति; त्रह्निकं-झ.
[10] अन्ते] अ; अन्त्ये-ऊ, झ, ति; मध्ये-छ.
[11] मध्यमत्रितयं] अ, ऊ, औ, ति; मध्यमे त्रितयं-छ; मध्यमं त्रितयं-झ.
[12] उत्तमत्रितयं] अ, ऊ, औ, छ, ति; मुत्तमं त्रितयं-झ.
[13] षड्विंशद्बलिमाचरेत्] अ, औ, छ, ति; चतुर्विंशद्बलिं ददेत्-ऊ.
[14] एतद्वै] अ, औ, छ, ति; एतत्तु-ऊ.
[15] वृद्धिदं] अ, ऊ, औ, छ, ति; विद्धिदं-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[विजयक्रमः]

तद्दिने [१]चास्त्रयागं स्याच्चतुर्विंशद्बलिं ददेत्॥ ४६ ॥
[२]त्रयोदशाहे [३]तीर्थं स्याद्विजयस्य [४]प्रकीर्तितम्।

[ब्राह्मिकक्रमः]

[५]केवलं भ्रमणं कुर्यादन्त्ये तीर्थं समाचरेत्॥ ४७ ॥
कौमारं त्विति [६]विख्यातं सावित्रं च ततः शृणु।

[पञ्चदशाहोत्सवे वृद्धिदाद्युत्सवक्रमः]

[वृद्धिदक्रमः]

तत्पूर्वरात्रिमारभ्य त्रिंशद्बलिमथाचरेत्॥ ४८ ॥
[७]षोडशेऽह्नि प्रकर्तव्यं तीर्थकर्म विशेषतः।

[विजयक्रमः]

[८]तद्दिने चास्त्रयागं स्यादष्टाविंशद्बलिं ददेत्॥ ४९ ॥
पक्षाहे कौतुकं तीर्थं [९]विजयस्य प्रभञ्जन।

[ब्राह्मिकक्रमः]

नित्यपूजावसाने तु [१०]यानमेकं समाचरेत्॥ ५० ॥
[११]तीर्थकर्म तदन्ते तु [१२]ब्राह्मिकं त्विति कीर्तितम्।
[१३]सावित्रं त्विति विख्यातं शृणु [१४]चान्द्रं प्रभञ्जन॥ ५१ ॥

---

१ चास्त्रयागं] अ, ऊ, औ, छ, ति; यास्त्रयागं-झ.
२ त्रयोदशाहे] अ, औ, छ, ति; त्रयोदशाह्नि-ऊ; त्रयोर्दशाहे-झ.
३ तीर्थं] अ, ऊ, औ, छ, ति; तीर्था-झ.
४ प्रकीर्तितम्] ऊ, औ; प्रकीर्तितः-अ; प्रकीर्तिताः-छ, ति; प्रकीर्तिता-झ.
५ केवलं भ्रमणं] ऊ, औ, झ; केवलभ्रमणं-अ, छ, ति.
६ विख्यातं सावित्रं च ततः शृणु] अ, ऊ, छ, ति; विख्या ... ततः शृणु-झ; विख्यातं विवित्रं च ततः शृणु-औ.
७ षोडशेऽह्नि] अ, ऊ, औ, छ, ति; षोडशेन-झ.
८ तद्दिने चास्त्रयागं स्यादष्टाविंशद्बलिं] अ, ऊ, छ; तद्दि ... स्यादष्टविंशद्बलिं-झ; तद्दिने चास्त्रयागः स्यादष्टाविंशद्बलिं-औ; तद्दिने चास्त्रयागं च अष्टाविंशद्बलिं-ति.
९ विजयस्य] अ, ऊ, औ, छ, ति; विजयं स्यात्-झ.
१० यानमेकं समाचरेत्] अ, ऊ, औ, छ, ति; यान ... -झ.
११ तीर्थकर्म] अ, ऊ, औ, छ, ति; तीर्थकर्मं-झ.
१२ ब्राह्मिकं] अ, ऊ, औ, छ, ति; ब्रह्मीकं-झ.
१३ सावित्रं त्विति] ऊ, छ, झ, ति; ... अ; सावित्रीमिति-औ.
१४ चान्द्रं प्रभञ्जन] ऊ; चन्द्रं प्रभञ्जन-अ, ति; श्वभ्रं°-छ; चान्द्रप्रभञ्जन-झ; चन्द्रप्रभञ्जन-औ.

In Public domain. Digitization Muthulakshmi Research Academy

[सप्तदशाहोत्सवे वृद्धिदाद्युत्सवक्रमः]

[वृद्धिदक्रमः]

तत्पूर्वदिवसे [१]विद्वान् अस्त्रयागं [२]समाचरेत्।
[३]चतुस्त्रिंशद्बलिं दद्यात् तीर्थम् [४]अष्टादशेऽहनि॥५२॥
एतद्वै [५]वृद्धिदं प्रोक्तं विजयं च ततः शृणु।

[विजयक्रमः]

तद्दिनस्य तु सायाह्ने [६]चोत्सवं तु [७]समाचरेत्॥५३॥
द्वात्रिंशद्बलिदानं च तीर्थं सप्तदशेऽहनि।

[ब्रह्मोत्सवक्रमः]

यानमेकं [८]समापाद्य चान्त्ये तीर्थं समाचरेत्॥५४॥
[९]ब्रह्मोत्सवमिदं प्रोक्तम्

[उत्सवसामान्यलक्षणम्]

[१०]आद्यन्तं शृणु सुव्रत।
यानं [११]चावभृथारोहम् [१२]उत्सवाङ्गं [१३]त्रिधा स्मृतम्॥५५॥
एकैकं त्रिविधं प्रोक्तमादिमध्यावसानकम्।

[ध्वजारोहणपूर्वाद्युत्सवत्रैविध्यम्]

[१४]उत्सवं [१५]त्रिविधं प्रोक्तं [१६]ध्वजभेर्यङ्कुरादिकम्॥५६॥

---

[१] विद्वान्] अ, उ, औ, झ, ति; विचार-छ.
[२] समाचरेत्] अ, उ, औ, छ, ति; समा ... -झ.
[३] चतुस्त्रिंशद्बलिं दद्यात्] अ, उ, छ, ति; ... तुर्विंश ... यात्-झ; चतुर्विंशद्बलिं दद्यात्-औ.
[४] अष्टादशेऽहनि] अ, उ, औ, झ, ति; अष्टादशाहनि-छ.
[५] वृद्धिदं] अ, उ, औ, झ, ति; चेदितं-छ.
[६] चोत्सवं तु] अ, औ, छ, ति; चोत्सवान्तं-उ; उत्सवं तु-झ.
[७] समाचरेत्] उ, औ, छ, झ, ति; समानयेत्-अ.
[८] समापाद्य चान्त्ये] औ; समापाद्यान्ते-अ; समासाद्यान्त्ये-उ; समापाद्यान्त्ये-छ, झ; समापाद्य अन्त्ये-ति.
[९] ब्रह्मोत्सवमिदं प्रोक्तम्] अ, उ, छ, झ, ति; ब्रह्मोत्सवोऽयं सम्प्रोक्तः-औ.
[१०] आद्यन्तं] अ, छ; अत्यन्तं-उ; माद्यन्तं-झ; आद्यान्तं-औ; आद्यन्ते-ति.
[११] चावभृथारोहम्] सं० पा०; चावभृतारोहम्-अ, झ, ति; चावभृतं रोह-उ; चावभृतारोह-औ, छ.
[१२] उत्सवाङ्गं] औ, ति; उ ... ङ्ग ... त्रियहं-अ; उत्सवाङ्गत्रयं-उ; उत्सर्वाङ्गं-छ; उत्सवा ... -झ.
[१३] त्रिधा स्मृतम्] औ; त्रियहं स्मृतम्-अ, उ; क्रिया स्मृता-छ; ... स्मृताः-झ; त्र्यह स्मृतम्-ति.
[१४] उत्सवं] अ, उ, छ, झ, ति; उत्सवः-औ.
[१५] त्रिविधं प्रोक्तं] अ, उ, ति; विपयं प्रोक्तं-छ; त्रिविथं प्रोक्तं-झ; त्रिविधः प्रोक्तः-औ.
[१६] ध्वजभेर्यङ्कुरादिकम्] अ, उ, औ, ति; ध्वजभेशाङ्कुरादिकम्-छ; ध्वजाभेर्याकुरादिकम्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

ध्वजम् [1]आरोपयेत् पूर्वं पश्चाद्भेरीं तु ताडयेत्।
अङ्कुराण्यर्पयेत् पश्चाद् [2]ध्वजारोहणपूर्वकम्॥५७॥
[3]भेरीं तु ताडयित्वा तु ध्वजमारोपयेत्ततः।
अङ्कुरार्पणमन्ते तु भेरीताडनपूर्वकम्॥५८॥
अङ्कुराण्यर्पयेत् [4]पूर्वं भेरीघोषमतः परम्।
पताकारोहणं पश्चाद् अङ्कुरार्पणपूर्वकम्॥५९॥
[5]एतेषु [6]त्रितयेष्वेषु ध्वजात् पूर्वं तु वक्ष्यते।
[7]अस्त्रयागदिनात् पूर्वे ध्वजमारोपयेद्बुधः॥६०॥
ध्वजारोहदिनात् पूर्वे [8]द्विदिने त्रिदिनेऽपि वा।
पञ्चाहे वाथ सप्ताहे नवाहे वाङ्कुरार्पणम्॥६१॥

[उत्सवस्य षड्विंशदङ्गानि]

[9]केत्वङ्कुरं तु प्रथमं द्वितीयं [10]वृषयागकम्।
[11]प्रदक्षिणं तृतीयं स्याच्चतुर्थं [12]दण्डशुद्धिकम्॥६२॥
पञ्चमं [13]कौतुकं कर्म [14]कलशस्नानषष्ठकम्।
सप्तमं [15]दण्डपूजा च अष्टमं चास्त्रपूजनम्॥६३॥

---

[1] आरोपयेत् पूर्वं] अ, ऊ, औ, छ, ति; आरोपये ... वं-झ.
[2] ध्वजारोहणपूर्वकम्] ऊ; भेरीताडनपूर्वकम्-अ, औ, ति; ताडनपूर्वकम्-छ.
[3] अयं श्लोकः 'अ' 'औ' 'छ' 'झ' 'ति' मातृकासु न विद्यते।
[4] पूर्वं भेरीघोषमतः परम्] झ; पूर्वं भेरीघोषमतः परम्-अ, ऊ, औ, छ, ति; पूर्वे भेरीघोषस्ततः परम्-औ.
[5] "अङ्कुराण्यर्पयेत् पश्चात् भेरीताडनपूर्वकम्" इतीदमर्धं 'झ' मातृकायाम् अस्मिन् स्थाने दृश्यते। अस्मादर्धात् पूर्वं "पूर्वभेरीं तु सन्ताड्य पताकं रोहणं ततः" इत्येकमर्धं 'झ' मातृकायामधिकतया दृश्यते। "एतेषु त्रितयेष्वेषु ध्वजात् पूर्वं तु वक्ष्यते" इतीदमर्धं 'छ' मातृकायां न विद्यते।
[6] एतेषु त्रितयेष्वेषु] अ, ति; एतेषु त्रययेष्वेषु-ऊ; एते ... ष्वेषु-झ; एतेषु त्रितयेष्वेषा-औ.
[7] अस्त्रयागदिनात्] ऊ, औ, छ, झ, ति; ... गं दिनात्-अ.
[8] द्विदिने त्रिदिनेऽपि] अ, ऊ, औ, ति; द्वितीये त्रिदिनेऽपि-छ; द्वि ... नेऽपि वा-झ.
[9] केत्वङ्कुरं तु प्रथमं] अ, औ, ति; अङ्कुरं प्रथमं प्रोक्तं-ऊ; केत्वङ्कुरं तु प्रथमं-छ.
[10] वृषयागकम्] ऊ, औ, झ, ति; यागकम्-अ; वृषियागकम्-छ.
[11] प्रदक्षिणं तृतीयं] ऊ, औ, छ, ति; प्रदक्षिणत्रितयं-अ; प्रदक्षिणत्रितियं-झ.
[12] दण्डशुद्धिकम्] अ, औ, ति; तत्त्वशुद्धिकम्-ऊ; दण्डशुद्धकम्-छ.
[13] कौतुकं कर्म] ऊ; केतुकर्म- छ; कौतुकर्मं-अ, झ; केतुधर्मं च-औ; कौतुकं चैव-ति.
[14] कलशस्नानषष्ठकम्] औ, झ; कलशस्नानं तु षष्ठकम्-अ, ऊ, छ; घटस्थापं तु षष्ठकम्-ति.
[15] दण्डपूजा] अ, ऊ, औ, छ; दण्डपूजां-झ, ति.

In Public domain. Digitization Muthulakshmi Research Academy

नवमं [१]भेरिताडं च दशमं [२]देवताह्वयम्।
एकादशार्चनं नित्यं द्वादशं तु बलिभ्रमम्॥ ६४॥
त्रयोदशं [३]वास्तुशुद्धिः [४]तत्परं [५]चोत्सवाङ्कुरम्।
रक्षाबन्धं [६]ततः प्रोक्तं षोडशं [७]यागकर्म च॥ ६५॥
[८]सप्तदशं हुतं विद्धि [९]बलिकर्म ततः परम्।
[१०]एकोनविंशद्यानं स्यात् तत्परं [११]परिवेषकम्॥ ६६॥
[१२]नीराजनं त्वेकविंशन्नृत्तावलोकनं परम्।
[१३]तीर्थाङ्कुरं त्रयोविंशत् [१४]तत्परं तीर्थकौतुकम्॥ ६७॥
यात्रार्थस्नपनं पश्चाद्विशेषस्नपनं परम्।
[१५]तीर्थाधिवासनं चैव तीर्थकर्म ततःपरम्॥ ६८॥
[१६]अवभृथं [१७]नवविंशत् [१८]त्रिंशत्पूर्णाहुतिस्ततः।

---

१ भेरिताडं] अ, ऊ, औ; भेरियागं-छ, झ; भेरिताड्यं-ति.

२ देवताह्वयम्] अ, छ, झ, ति; देवता बुधः-ऊ; देवतावाहनम्-औ.

३ वास्तुशुद्धिः] सं॰ पा॰; वास्तुशुद्धिं च-अ; त्रयोदशं-ऊ; वास्तुशुद्धिश्च-छ; वास्तुशुद्धि-झ; बाह्यशुद्धिः-औ; वास्तुशुद्धिं तत्-ति.

४ तत्परं] अ, झ; तत्पश्चात्-ऊ, औ; तत्पादं-छ; पश्चात्-ति.

५ चोत्सवाङ्कुरम्] अ, औ, छ; उत्सवाङ्कुरः-ऊ; चोत्सवं कुरु-झ; उत्सवाङ्कुरम्-ति.

६ ततः प्रोक्तं] अ, ऊ, छ, झ, ति; पञ्चदशं-औ.

७ यागकर्म च] औ, ति; यागकर्मणि-अ, ऊ, छ, झ.

८ सप्तदशं हुतं] औ, ति; सप्तदशाहुतं-छ, झ; सप्तदशाहुतिं-अ; सप्तादश सुतं-ऊ.

९ बलिकर्म ततः] ऊ, औ; बलिक्रममतः-अ, छ, ति; वल ... -झ.

१० एकोनविंशद्यानं-] ऊ, झ, ति; एकोन ध्यान-अ; यानार्थस्नपनं-छ; एकोनविंशतोद्यानं-औ.

११ परिवेषकम्] अ, औ; परिवेषकः-ऊ; विशेषयजनं परम्-छ; परिवेष्टकम्-झ, ति.

१२ नीराजनं त्वेकविंशत्] अ; नीराञ्जनं त्वेकविंशत्-ऊ; निराजनं त्वेकविंशत्-झ; नीराजनं त्वेकविंशन्नृत्तावलोकनं परम् इतीदमर्धं 'छ'मातृकायां न दृश्यते। नीराजनं त्वेकविंशत् स्यात्-औ; नीराजनं त्वेकविंशन् नृत्तस्यावलोकनं परम्-ति.

१३ तीर्थाङ्कुरं त्रयोविंशत्] सं॰ पा॰; अत्र स्थाने एकोनविंशद्यानं स्यात् तत्परं परिवेषकः। नीराजनं त्वेकविंशत् षड्विंशत्तीर्थ-कौतुकम्। यात्रार्थस्नपनं पश्चाद्विशेषस्नपनं परम्। इत्ययं सार्धैकश्लोकः अधिकतया 'ऊ' मातृकायां वर्तते। यात्रार्थस्नपनं पश्चाद्विशेष ... इत्येकः पादः 'झ' मातृकायां दृश्यते। यात्रार्थस्नपनं पश्चाद्विशेषयजनं परम्-इतीदमर्धं 'औ' 'ति' मातृकयोः अधिकं वर्तते।

१४ तत्परं तीर्थकौतुकम्] सं॰ पा॰.

१५ तीर्थाधिवासनं] अ, ऊ, औ, छ, ति; तीर्थाविवासनं-झ.

१६ अवभृथं] अ, ऊ, छ; अवभृतं-औ; अवभृतं-झ; ततः परं त्ववभृतं त्रिंशत् पूर्णाहुतिं-ति.

१७ नवविंशत् त्रिंशत्] ऊ; नो विंशत्रिं ... अ; नवोविंशः त्रिंशत्-औ; नवोविंशत्-छ; द्येकोनविंशत् त्रिंशत्-झ.

१८ पूर्णाहुतिस्ततः] ऊ; ... हुतिं ततः-अ, छ; पूर्णाहुतिस्तथा-औ; पूर्णा ... तः-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]यागकुम्भाभिषेकश्च षोडशस्नपनं परम्॥ ६९॥
[2]महाहव्यादिपूजा च [3]दक्षिणादानकं परम्।
[4]ध्वजावरोहणं पश्चात् पैशाचाय [5]बलिस्ततः॥ ७०॥
[6]एवं षड्विंशदङ्गेन [7]चोत्सवं परिकीर्तितम्।
विघ्नेशं [8]पूजयेद्विद्वान् क्रियां प्रति क्रियां प्रति॥ ७१॥

[ध्वजारोहणम्]

अङ्कुराण्यर्पयेत् पश्चात् पूर्वोक्तविधिना सह।

[ध्वजपटलक्षणम्]

[9]शुक्लं [10]श्लक्ष्णं तथा [11]सूक्ष्मं [12]छिन्नभिन्नादिवर्जितम्॥ ७२॥
उत्तमं नवहस्तं स्यान्मध्यमं सप्तहस्तकम्।
अधमं पञ्चहस्तं स्यात् [13]तत्पटं द्विगुणीकृतम्॥ ७३॥
तत्त्रिभागैकभागं तु पटविस्तारमुच्यते।
[14]मध्ये वेत्रसमायुक्तं वलयत्रयसंयुतम्॥ ७४॥
[15]तन्तुना बन्धयेद्धीमान् [16]सुधयाऽऽलिप्य [17]सर्वशः।
श्वेतं रक्तं तथा पीतं श्यामं [18]कृष्णं च कुङ्कुमम्॥ ७५॥

---

[1] यागकुम्भाभिषेकश्च] औ; यागकुम्भाभिषेकं च-अ, ऊ, छ, झ, ति.
[2] महाहव्यादिपूजा] अ, ऊ, छ; महाहव्यादिपूजां-झ, ति; "महाहव्यादि ... बलिस्ततः" पर्यन्तं 'औ' मातृकायां न विद्यते।
[3] दक्षिणादानकं परम्] ति; दक्षिणादान तत्परम्-अ, ऊ, झ; दक्षिणं मान तत्परम्-छ.
[4] ध्वजावरोहणं] सं० पा०; अवरोहध्वजं-ऊ; अवरोहस्योर्ध्वकं-अ; अवरोप्य ध्वजं-छ; अवरोह्य ध्वजं-झ, ति.
[5] बलिस्ततः] ऊ; बलिं ददेत्-अ, झ; बलिं परम्-छ, ति.
[6] एवं षड्विंशदङ्गेन] अ, ऊ, छ, झ, ति; एवं षड्विंशदङ्गो हि-औ.
[7] चोत्सवं परिकीर्तितम्] अ, ऊ, छ, ति; उत्सवं परिकीर्तितम्-झ; चोत्सवः परिकीर्तितः-औ.
[8] पूजयेद्विद्वान्] अ, ऊ, औ, छ, ति; पूजयेत् पश्चात्-झ.
[9] "शुक्लं श्लक्ष्णं ... पटविस्तारमुच्यते" पर्यन्तं श्लोकद्वयं 'झ' मातृकायां न विद्यते।
[10] शुक्लं श्लक्ष्णं] अ, ति; शुक्लं श्वत्तणं-ऊ; शुक्लं कृष्णं-औ; शुक्लश्लक्ष्णं-छ.
[11] सूक्ष्मं] अ, औ, छ, ति; सुत्मं-ऊ.
[12] छिन्नभिन्नादिवर्जितम्] औ, ति; छिद्य०-ऊ; छिन्नाभिन्नादिवर्जितम्-छ.
[13] तत्पटं द्विगुणीकृतम्] ऊ, ति; तत्पटद्विगुणीकृतम्-अ; पटाग्रं द्विगुणीकृतम्-औ; मारुणीकृतम्-छ.
[14] मध्ये वेत्रसमायुक्तं] ऊ, ति; मर्द्ध वेत्रसमायुक्तं वलयत्रयसंयुतम्-अ; मध्यवेत्र०-छ; मध्ये वेत्रसमायुक्तवलयत्रयसंयुतम्-झ; मध्यमेऽत्र समायुक्तं वलयत्रयसंयुतम्-औ.
[15] तन्तुना बन्धयेत्] अ, ऊ, झ, ति; द्वातुना बन्धयेत्-ऊ; तन्तून् संवेष्टयेत्-औ.
[16] सुधयाऽऽलिप्य] अ, ऊ, औ, झ, ति; सुधया लप्य-छ.
[17] सर्वशः] अ, ऊ, औ, ति; सर्वतः-छ; ... -झ.
[18] कृष्णं] अ, छ, औ, झ, ति; रक्तं-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]गोक्षीरशङ्खवर्णाभं ध्वजवर्णं प्रकीर्तितम्।
सर्वेषामेव वर्णानां सितवर्णं [२]प्रशस्यते॥ ७६ ॥

[वृषविम्वलेखनम्]

[३]तत्पटं गुणतो भज्य मध्यभागे वृषं लिखेत्।
[४]वृषभं श्वेतवर्णाभं [५]वृषलक्षणवर्त्मना॥ ७७ ॥
[६]आस्यं श्रृङ्गौ [७]तथा कर्णौ [८]खुरा [९]रत्ननिभाः स्मृताः।
[१०]वालाग्रं कृष्णवर्णं तु [११]भ्रुवं [१२]तद्वर्णसंयुतम्॥ ७८ ॥
[१३]धूम्रवर्णमयं चाक्षि मध्यमे कृष्णमण्डलम्।
[१४]आसनं श्यामवर्णं तु तन्मध्ये [१५]रक्तपद्मकम्॥ ७९ ॥
[१६]कर्णिका पीतवर्णं तु तद्वर्णं केसराणि तु।
आसनायतवृत्तं तु [१७]परितश्चतुरश्रकम्॥ ८० ॥
[१८]पञ्चवर्णैः [१९]समालिख्य रक्तपुष्पैः [२०]समृद्धिदम्।
[२१]स्फिक्सूत्रमुरसूत्रं च [२२]पादादारभ्य सूत्रकम्॥ ८१ ॥

---

१ गोक्षीरशङ्खवर्णाभं] ऊ, ति; गोक्षीरं शङ्खवर्णाभं-अ, औ, छ, झ.

२ प्रशस्यते] अ, ऊ; विशिष्यते-औ, छ, ति; ... ते-झ.

३ इदमर्धं 'ऊ' मातृकायां न दृश्यते। तत्पटं गुणतो] अ; तत्पटगुणयाभाज्यं-औ; तत्पटं गुणथा-छ, झ; तत्पटं गुणधा-ति.

४ वृषभं] औ, छ, झ, ति; मध्यमं-अ, ऊ.

५ वृषलक्षणवर्त्मना] अ, औ, छ, ति; वृक्षलक्षणवर्त्मना-ऊ; वृषलक्षणवत्मना-झ.

६ आस्यं श्रृङ्गौ] औ; अस्य श्रृङ्गौ-अ, झ; आस्यं श्रृङ्गे-ऊ; अस्य श्री-छ; आस्य श्रृङ्गौ-ति.

७ तथा कर्णौ] ऊ; तु कर्णौ तु-अ, ति; तु कर्णा तु-औ; गौ तु कर्ण तु-छ; तु कर्ण तु-झ.

८ खुरा] अ, ऊ, औ, झ, ति; वारा-छ.

९ रत्ननिभाः स्मृताः] अ, ऊ, छ; रक्तनिभाः स्मृताः-औ, ति; रत्ननिभ ... स्मृ ... -झ.

१० वालाग्रं कृष्णवर्णं] अ, छ, ति; वालश्रं कृष्णवर्णं-ऊ; वलाग्रं कृष्णवर्णं-औ; ... -झ.

११ भ्रुवं] अ, ऊ, औ, झ, ति; ध्रुवं-छ.

१२ तद्वर्णसंयुतम्] ऊ, औ, छ, झ, ति; तत्स्वर्ण०-अ.

१३ धूम्रवर्णमयं चाक्षि] झ; धूम्रवर्णमलं चाक्षि-अ, ऊ; ति धूम्रवर्णमयं चाक्षं-औ; ध्रूमवर्णमयश्चाक्षि-छ.

१४ आसनं-अ, ऊ, छ, झ, ति; अञ्जनं-औ.

१५ रक्तपद्मकम्] अ, औ, झ, ति; रक्तपत्रकम्-ऊ; रत्नपद्मकम्-छ.

१६ कर्णिका] ऊ, औ, छ; कर्णिकां-अ, झ, ति.

१७ परितश्चतुरश्रकम्] अ, ऊ, औ, ति; परितश्चतुरर्थकम्-छ.

१८ पञ्चवर्णैः] ऊ; पञ्चवर्णेन-अ, औ, छ, झ, ति.

१९ समालिख्य] ऊ; संलिख्य-अ, औ, छ, झ, ति.

२० समावृतम्] सं० पा०; समृद्धिदम्-अ, औ, छ, ति; समर्द्धितम्-ऊ; समद्धिदम्-झ.

२१ स्फिक्सूत्रमुरसूत्रं] अ, ति; प्राक्सूत्रमुदक्सूत्रं-ऊ; अस्थिसूत्रमुरसूत्रं-औ; स्फिक्सूत्रमारसूत्रं-छ; स्फिसूत्रमुरसूत्रं-झ.

२२ पादादारभ्य सूत्रकम्] अ, ऊ; पादाधारदलसूत्रकम्-छ; पादाधारस्य सूत्रकम्-औ, झ, ति.

In Public domain. Digitization Muthulakshmi Research Academy

[1]पट्टाकारेण [2]संलिख्य पञ्चवर्णेन बुद्धिमान्।
[3]घण्टा तु [4]हेमवर्णाभा [5]रज्जू [6]रक्तनिभा भवेत्॥ ८२॥
[7]रक्तपुष्पैश्च संलिख्य [8]गलभूषणसंयुतम्।
[9]एवं लक्षणसंयुक्तं [10]स्थितं तु वृषभं लिखेत्॥ ८३॥

[शेषमङ्गललेखनम्]

[11]शेषमङ्गलरूपाणि लेखयेत् परितः क्रमात्।
[12]अधोभागाम्बुजं लिख्य [13]सितवर्णेन [14]सुव्रत॥ ८४॥
दर्पणं सितवर्णेन [15]पूर्णकुम्भं हरीतकम्।
चामरं [16]शुक्लवर्णं तु [17]तन्नालं पीतवर्णकम्॥ ८५॥
नालाग्रे [18]चोत्पलाकारं [19]रक्तपीतदलान्तकम्।
[20]श्रीवत्समरुणाभं च स्वस्तिकं पिङ्गलं भवेत्॥ ८६॥
शङ्खं वै सितवर्णं [21]तु [22]पुच्छाग्रे [23]पीतसंयुतम्।

---

[1] पट्टाकारेण] अ, ऊ, औ, ति; पट्टकारेण-छ, झ.
[2] संलिख्य पञ्चवर्णेन] अ, ऊ, ति; संलिख्य प ... -औ; संयुक्तं पञ्चवर्णेन-छ; सं ... चवर्णेन-झ.
[3] घण्टा तु] ऊ; घण्टा च-अ, छ; घण्टानां-औ; घण्टां च-झ, ति.
[4] हेमवर्णाभा] अ; हेमवर्णं-ऊ; हेमवर्णाभां-औ, ति; हेमवर्णाभं-छ, झ.
[5] रज्जू] अ, ऊ, छ, झ; रज्जुं-औ; रज्जु-ति.
[6] रक्तनिभा भवेत्] अ, झ; रक्तनिभं भवेत्-ऊ; रक्तनिभां भवेत्-औ; रत्ननिभा भवेत्-छ; रक्तनिभं न्यसेत्-ति.
[7] रक्तपुष्पैश्च] ऊ, औ, छ, झ, ति; रत्नपुष्पैश्च-अ.
[8] गलभूषणसंयुतम्] अ, ऊ, औ, झ, ति; गजभूषणसंयुतम्-छ.
[9] एवं लक्षणसंयुक्तं] अ, ऊ, औ, छ, ति; एवं लक्षण ... -झ.
[10] स्थितं] अ, ऊ, ति; स्थित्वा-औ, छ; स्धित्वा-झ.
[11] शेषमङ्गलरूपाणि] अ, ऊ, औ, छ; शेषं मालरूपाणि-झ, ति.
[12] अधोभागाम्बुजं] ऊ; अधोभागं भुजं-अ, औ, छ, झ; अधोभागं ध्वजं-ति.
[13] सितवर्णेन] अ, ऊ, औ, झ, ति; पीतवर्णेन-छ.
[14] सुव्रत] अ, ऊ, औ, छ, ति; सुव्रतम्-झ.
[15] पूर्णकुम्भं हरीतकम्] अ, ऊ, छ, ति; पूर्वकुम्भं हरीतकम्-औ; पूर्णकुम्भहरीतकम्-झ.
[16] शुक्लवर्णं] अ, ऊ, झ, ति; शुद्धवर्णं-छ; शुक्लवर्णे-औ.
[17] "तन्नालं पीतवर्णकं" इत्यारभ्य "शङ्खं वै सितवर्णं तु" पर्यन्तं पादषट्कं 'झ' मातृकायां न विद्यते।
[18] चोत्पलाकारं] अ, ऊ, छ, ति; चोत् ... ल ... रं-औ.
[19] रक्तपीतदलान्तकम्] ति; रक्तं पीतदलान्तकम्-अ, ऊ, औ; रत्नापीतं तु पादकम्-छ; रक्तपीत-दलान्तकम्-ति.
[20] श्रीवत्समरुणाभं] अ, ऊ, औ, ति; श्रीवजं समरुणाभं-छ.
[21] तु] अ, औ, छ, ति; च-ऊ.
[22] पुच्छाग्रे] अ, औ, ति; पिचाग्रे-ऊ; पुष्पाग्रे-छ.
[23] पीतसंयुतम्] ऊ, औ, छ, ति; पीतसंयुतौ-अ.

In Public domain. Digitization Muthulakshmi Research Academy

दीपं वै [1]काञ्चनाभासं [2]दीपाधारं [3]तथैव च॥ ८७॥
[4]धूपं पिच्छकवर्णं स्यात् घण्टा [5]रजतसन्निभा।
[6]मध्यभागादधोभागे पूर्णकुम्भं समालिखेत्॥ ८८॥
[7]मध्यभागोर्ध्वभागे तु [8]श्वेतच्छत्रं प्रकल्पयेत्।
[9]धूपं घण्टा गलाधस्ताद्दीपं [10]तत्कुम्भपार्श्वयोः॥ ८९॥
वृषाग्रे दर्पणं [11]पृष्ठे [12]श्रीवत्सं चोत्तरांशके।
[13]शङ्खं पीठसमायुक्तं पादयोरन्तरं लिखेत्॥ ९०॥
[14]श्वेतच्छत्रस्य पार्श्वे तु चामरद्वयमालिखेत्।
[15]पटस्योभयपार्श्वे तु तत्तदङ्गं समालिखेत्॥ ९१॥
[16]तयोरन्तरदेशे तु पद्ममष्टदलं लिखेत्।

[वृषस्थापने वृषयागपूर्वकृत्यम्]

एवं [17]ध्वजक्रमः प्रोक्तः तस्य यागविधिं शृणु॥ ९२॥
सम्पूज्य देवदेवेशं नैवेद्यान्तं समाचरेत्।
गणेशं पूजयेत् पश्चात् पायसान्नं निवेदयेत्॥ ९३॥

---

[1] काञ्चनाभासं] अ, औ, छ, झ, ति; काञ्चनं भासं-ऊ.
[2] दीपाधारं] अ, ऊ, झ, ति; दीपाराधं-औ, छ.
[3] तथैव च] ऊ; तदेव हि-अ, औ, छ, ति; तथैव हि-झ.
[4] धूपं पिच्छकवर्णं] अ; धूपं पिञ्छकवर्णं-ऊ, छ; धूपं पञ्चकवर्णं-औ; धूप ... वर्णं-झ; धूपं पिञ्छिकवर्नं-ति.
[5] रजतसन्निभा] अ, ऊ, ति; रजतसन्निभम्-औ, छ; रजितसन्निभम्-झ.
[6] मध्यभागादधोभागे] अ, औ, छ, ति; मध्यभागे अधोभागे-ऊ; मध्यभागदधोभागे-झ.
[7] मध्यभागोर्ध्वभागे] अ, ऊ, औ, छ, ति; मध्यभागोध्वभागे-झ.
[8] श्वेतच्छत्रं] अ, औ, छ, झ, ति; श्वेतेचक्रं-ऊ.
[9] धूपं घण्टा गलाधस्ताद्दीपं] अ, ऊ; धूपघण्टं दलियस्तातदीपात्-औ; धूपगण्डगभ्य-छ; ... ण्टगलाथस्ताद्दीपं-झ; धूपं घण्टां गलाधस्ताद्दीपं-ति.
[10] तत्कुम्भपार्श्वयोः] अ, ऊ, ति; कुम्भपार्श्वयोः-औ; दीपं तु जलपार्श्वयोः-छ; तत्कुम्भपाश्वयोः-झ.
[11] पृष्ठे] अ, छ, झ, ति; प्रोक्तं-ऊ; प्रष्टे-औ.
[12] श्रीवत्सं चोत्तरांशके] अ, ऊ, औ, ति; श्रीवत्सं चोत्तरान्तिके-छ; श्रीवत्सचोत्तरांशके-झ.
[13] शङ्खं पीठसमायुक्तं] अ, औ, छ, झ, ति; शङ्खपीठसमायुक्तं-ऊ.
[14] इदमर्धं 'झ' मातृकायां न विद्यते। श्वेतच्छत्रस्य पार्श्वे तु चामरद्वयमालिखेत्। पटस्योभयपार्श्वे तु तत्तदङ्गं समालिखेत्। इत्ययं श्लोकः 'औ' मातृकायां न दृश्यते।
[15] पटस्योभयपार्श्वे] अ, ऊ, ति; पटर्घ्योभयपार्श्वे-छ; पटस्योभयपाश्वे-झ.
[16] तयोरन्तरदेशे तु] अ; तयोरन्तरदेशेषु-ऊ, औ, छ; तयोरत्तरदेशेषु-झ.
[17] ध्वजक्रमः प्रोक्तः] अ; ध्वजक्रमं प्रोक्तं-ऊ, छ, झ, ति.

In Public domain. Digitization Muthulakshmi Research Academy

शिवं प्रणम्य [१]विधिवद्विज्ञाप्योत्सवमुत्तमम्।
भूषणाद्यैरलङ्कृत्य सुमना देशिकोत्तमः॥ ९४॥
[२]अङ्गन्यासं करन्यासं पूर्वोक्तविधिना [३]कुरु।

[कुम्भविन्यासः]

स्थण्डिलं कारयेद्विद्वान् [४]सुश्वेतद्रोणशालिना॥ ९५॥
[५]आलिख्य मध्यमे पद्मम् [६]अष्टपत्रं सकर्णिकम्।
नवकुम्भान् समादाय त्रिसूत्रेणैव वेष्टयेत्॥ ९६॥
क्षालयेदस्त्रमन्त्रेण पूरयेद्गन्धतोयकैः।
[७]वृषकुम्भं न्यसेन्मध्ये तस्य वामे तु वर्धनीम्॥ ९७॥
अभितः कलशानष्टौ पूर्वादीनि च विन्यसेत्।
पाद्यं तु पूर्वतः स्थाप्य [८]दक्षिणाचमनीयकम्॥ ९८॥
[९]पश्चिमे विन्यसेदर्घ्यं पञ्चगव्यं तथोत्तरे।
शेषाणि [१०]शुद्धतोयानि पूर्वादीनि ततो न्यसेत्॥ ९९॥
[११]सकूर्चं सापिधानं च वस्त्रपल्लवसंयुतम्।
[१२]स्वर्णश्रृङ्गसमायुक्तं [१३]श्यामदूर्वासमन्वितम्॥ १००॥
पूर्वादीशानपर्यन्तं विन्यसेत् [१४]तत्क्रमेण तु।

---

[१] विधिवद्विज्ञाप्योत्सवमुत्तमम्] अ, ऊ, औ, झ, ति; विभवमाज्ञाप्योत्सवमुत्तमम्-छ.

[२] अङ्गन्यासं करन्यासं] अ; अङ्गन्यासकरन्यासं-ऊ, औ, छ, झ, ति.

[३] कुरु] औ, छ, झ, ति; गुरुः-अ, ऊ.

[४] सुश्वेतद्रोणशालिना] अ, ऊ, औ, झ, ति; सुश्वेतं द्रोणशालिना-छ.

[५] "आलिख्य मध्यमे पद्मम्" इत्यारभ्य "वृषे चलासनं यद्वा कुम्भमध्ये समर्चयेत्" पर्यन्तं श्लोकाः 'औ' मातृकायामत्र न विद्यन्ते।

[६] अष्टपत्रं सकर्णिकम्] औ, छ, झ, ति; अष्टपद्मं सकर्णिकम्-अ; अष्टपत्रसुकर्णिकम्-ऊ.

[७] वृषकुम्भं] अ, औ, छ, झ, ति; वृषकुम्भान्-ऊ.

[८] दक्षिणाचमनीयकम्] अ, औ, छ, ति; पञ्चगव्यं तथोत्तरे-ऊ; दक्षि ... मनीयकम्-झ.

[९] पश्चिमे विन्यसेदर्घ्यं] अ, औ, छ, झ, ति; अयं पादः 'ऊ' मातृकायां नास्ति।

[१०] शुद्धतोयानि] औ; शुद्धतोयेन-अ, ऊ, छ, झ, ति.

[११] सकूर्चं सापिधानं च वस्त्रपल्लवशोभितम्] ऊ; सकूर्चौ सापिधानौ च वस्त्रपल्लवसंयुतौ-अ, छ, ति; सकूर्चं ... पिधानचलवस्त्रपल्लवसंयुतम्-झ; सकूर्चे सापिधाने च वस्त्रपल्लवसंयुतम्-औ.

[१२] स्वर्णश्रृङ्गसमायुक्तं] ऊ; स्वर्णलिङ्गसमायुक्तौ-अ; स्वर्णश्रृङ्गसमायुक्तौ-छ, ति; स्वर्ण ... समायुक्तौ-झ; स्थण्डिलङ्गसमायुक्तौ-औ.

[१३] श्यामदूर्वासमन्वितम्] ऊ, ति; श्यामदूर्वासमन्वितौ-अ; श्यामपूर्वासमन्वितौ-छ; श्यामान्तर्व-समन्वितौ-झ.

[१४] तत्क्रमेण] औ; तु क्रमेण-अ, ऊ, छ, झ, ति.

In Public domain. Digitization Muthulakshmi Research Academy

[1]पुण्याहं वाचयेत् पश्चाद् [2]अर्घ्यपात्रादिकं क्रमात्॥ १०१॥
प्रोक्षयेच्छङ्खतोयेन [3]शुद्धैरुक्थैरिति [4]ब्रुवन्।

[स्थण्डिलद्वारपूजा]

स्थण्डिलस्य चतुर्दिक्षु द्वारपालान् समर्चयेत्॥ १०२॥
[5]प्राचि नन्दिमहाकालौ याम्ये भृङ्गिविनायकौ।
पश्चिमे वृषभस्कन्दौ [6]देवीचण्डौ तथोत्तरे॥ १०३॥
आदित्यमग्निदिग्भागे नैर्ऋते वास्तुदैवतम्।
वायव्ये गणनाथं तु गुरुमूर्तिं [7]तथैशके॥ १०४॥
स्थण्डिलस्य तु मध्ये तु आधाराख्यमनन्तकम्।
पद्मासनं तु सङ्कल्प्य [8]घटरूपं विचिन्तयेत्॥ १०५॥
[9]गन्धाद्यैर्वृषबीजेन पूजयेत्तु विचक्षणः।

[वृषकुम्भपूजा]

पञ्चगव्यामृतैः कुम्भैः [10]स्नापयेद् [11]वृषदैवतम्॥ १०६॥
[12]गन्धादिभिः समभ्यर्च्य मुद्गान्नं [13]दापयेत्ततः।
ताम्बूलं दापयेत् पश्चात् पुण्याहं वाचयेत्ततः॥ १०७॥
स्थण्डिलं कारयेत्तत्र [14]पूजयेद्विधिना सह।
[15]वृषे चलासनं [16]यष्ट्वा कुम्भमध्ये समर्चयेत्॥ १०८॥

---

[1] इदमर्धं 'ऊ' मातृकायां न विद्यते।
[2] अर्घ्यपात्रादिकं] अ, ऊ, छ, झ, ति; अर्घ्यं पाद्यादिकं-औ.
[3] शुद्धैरुक्थैरिति] सं० पा०; शुद्धेरुत्कैरिति-अ; शुद्धैरिद्धैरिति-ऊ, ति; शुद्धैर्लब्धैरिति-छ; शुद्धैरुद्धैरिति-झ; शुद्धैरथैरिति-औ.
[4] ब्रुवन्] अ, छ, ति; ब्रवीत्-ऊ, औ; ब्रिवीत्-झ.
[5] प्राचि] अ, ऊ, छ, झ, ति; प्राच्यां-औ.
[6] देवीचण्डौ] औ, ति; देव्यै चण्डं-अ, छ, झ; देवीचण्ड-ऊ.
[7] तथैशके] अ, ऊ, छ, झ, ति; तथैव च-औ.
[8] घटरूपं] ऊ, औ, छ, ति; घण्टरूपं-अ; घ ... पं-झ.
[9] गन्धाद्यैर्वृषबीजेन] अ, ऊ, ति; गन्धाद्यैर्वर्षमश्चेन-छ; गन्धाद्यै वृषबीजेन-झ; गन्धाद्यै ... पूजेन-औ.
[10] स्नापयेद्] अ, ऊ, छ, झ, ति; स्थापयेद्-औ.
[11] वृषदैवतम्] अ, ऊ, औ, झ, ति; वृषदैवतः-छ.
[12] गन्धादिभिः] अ, ऊ, छ, झ, ति; गन्धादीनां-औ.
[13] दापयेत्ततः] अ, ऊ, छ, झ, ति; स्थापयेत् क्रमात्-औ.
[14] पूजयेद्विधिना सह] अ, ऊ, छ, झ, ति; क्रमेण विधिपूर्वकम्-औ.
[15] वृषे चलासनं] अ, ऊ, झ; वृषे चलासां-छ; वृषे दाचमनं-औ; वृषभे चासनं-ति.
[16] यष्ट्वा] अ, औ, झ, ति; कल्प्य-ऊ; यज्वा-छ.

In Public domain. Digitization Muthulakshmi Research Academy

तस्य वामे तु वर्धन्यां पूजयेद्विधिना सह।
मन्त्रन्यासं ततः कृत्वा गन्धपुष्पादिना यजेत्॥ १०९॥
कुम्भमुत्थापयेत् पश्चात् स्थापयेत् स्थण्डिले बुधः।
वर्धनीमुत्तरे स्थाप्य पूजयेत् स्थिरमासनम्॥ ११०॥
वृषभं [१]मध्यमेऽभ्यर्च्य वृषाणीं तस्य वामके।
[२]अभितोऽष्टघटान् [३]न्यस्य [४]पूजयेद्वृषपालकान्॥ १११॥
[५]उक्षाणं शृङ्गिणं [६]नन्दिं वेदपादं च गोपतिम्।
उग्रशृङ्गं [७]वृषानाथं वृषेश्वरमथाष्टकम्॥ ११२॥
पूर्वादीशानपर्यन्तम् अर्चयेत् [८]स्वस्वनामतः।

[होमादिकृत्यानि]

तस्याग्रे स्थण्डिलं कृत्वा शिवाग्निं विधिना नयेत्॥ ११३॥
तन्मध्ये वृषमावाह्य पूर्ववद्धोममाचरेत्।
समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान्॥ ११४॥
सद्यादीशानपर्यन्तं प्रत्येकं भूतसङ्ख्यया।
द्रव्यान्ते व्याहृतिं हुत्वा तदन्ते देशिकोत्तमः॥ ११५॥

[वृषाक्षिमोचनादि]

[९]तत्पटं हृदयेनैव [१०]स्थण्डिले स्थापयेद्बुधः।
[११]गौर्धेनुभव्यान्त्रेण पटम् [१२]आलोकयेत् सुधीः॥ ११६॥
[१३]वृषगायत्रिया पश्चात् प्रोक्षयेदर्घ्यवारिणा।

---

[१] मध्यमेऽभ्यर्च्य] अ, ऊ, औ, झ, ति; मध्यमभ्यर्च्य-छ.
[२] अभितोऽष्टघटान्] अ, औ, झ, ति; अभिताष्टघटान्-ऊ; अभितोऽष्टघटं-छ.
[३] न्यस्य] अ; न्यस्त्वा-ऊ, छ; यष्ट्वा-झ, ति; यष्पात्-औ.
[४] पूजयेद्वृषपालकान्] अ, ऊ, छ, झ, ति; अष्टपालकान्-औ.
[५] उक्षाणं शृङ्गिणं] अ, ऊ, छ, ति; उक्षं च शृङ्गिणं-झ; उक्षाणं च गणं-औ.
[६] पदमिदं 'ऊ' मातृकायां नास्ति।
[७] वृषानाथं] अ, ऊ, छ, ति; वृषं नाथं-झ; वृषान ... -औ.
[८] स्वस्वनामतः] अ, ऊ, औ, छ, झ; तत्स्वनामभिः-ति.
[९] तत्पटं] अ, औ, छ, झ, ति; तद्धटं-ऊ.
[१०] स्थण्डिले] अ, औ, छ, झ, ति; स्थण्डिलं-ऊ.
[११] गौर्धेनुभव्यामन्त्रेण] ति; गौर्धेनुभव्यमन्त्रेण अ, छ; ०गव्य०-ऊ; ०हव्य०-औ.
[१२] आलोकयेत्] अ, ऊ, औ, ति; आलोपयेत्-छ, झ.
[१३] वृषगायत्रिया] औ, झ, ति; वृषगायत्र्या-अ, ऊ, छ. तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि। तन्नो वृषः प्रचोदयात्। इति वृषगायत्रीमन्त्रः। (कारणागम, पूर्वभागः, ९१: ७).

In Public domain. Digitization Muthulakshmi Research Academy

[1]सम्मार्ज्य [2]द्विकुशेनैव [3]वृषमूलमनुस्मरन्॥ ११७॥

[विजयक्रमः]

[4]त्रिलिङ्गं वर्णसंयुक्तं द्विकुशाग्रेण देशिकः।
[5]तेनाक्षिमोचनं कुर्यात् सूर्यसोमाधिदैवतम्॥ ११८॥
[6]वृषाधिवासनार्थाय वृषगायत्रिया बुधः।
पञ्चगव्येन सम्प्रोक्ष्य पवमानमुदीरयन्॥ ११९॥
[7]गोपतिरम्बिकानाथो [8]दर्शनाद्भक्तवत्सलः।
[9]सर्वानुकूलसम्भोगवृषेन्द्रः [10]शयितो [11]भवेत्॥ १२०॥
पुष्पाञ्जलित्रयं [12]दत्त्वा [13]वृषेन्द्रं [14]शयितं त्विति।
मनसा भावयेद्विद्वान् मन्त्रन्यासं समाचरेत्॥ १२१॥
[15]मूर्धादिगलपर्यन्तं शिवतत्त्वं प्रकीर्तितम्।
[16]गलाद्युरःस्थलान्तं च विद्यातत्त्वं प्रकल्पयेत्॥ १२२॥
हृदयादिखुरान्तं [17]तु आत्मतत्त्वं प्रकीर्तितम्।
[18]तत्त्वतत्त्वेश्वरान् यष्ट्वा [19]गन्धपुष्पादिभिर्यजेत्॥ १२३॥

---

[1] सम्मार्ज्य] अ, ऊ, औ, झ, ति; सममाज्य-छ.
[2] द्विकुशेनैव] औ, छ, झ, ति; द्विगुणेनैव-अ, ऊ.
[3] वृषमूलमनुस्मरन्] अ, ऊ, औ, छ, झ; वृषमूलमनुं स्मरन्-ति.
[4] त्रिलिङ्गं वर्णसंयुक्तं] अ; त्रिलिङ्ग्यां वर्णसंयुक्तं-ऊ; वर्णमन्त्रसमायुक्ता-औ; तिलं गां वर्णसंयुक्तं-छ; त्रिलिङ्गां वर्णसंयुक्तं-झ, ति.
[5] तेनाक्षिमोचनं] अ, औ, छ, झ; ०मोक्षणं-ऊ.
[6] वृषाधिवासनार्थाय] अ, ऊ, औ, झ; वृषाधिवासनार्थो या-छ.
[7] गोपतिरम्बिकानाथो] सं० पा०; गोपतेरम्बिकानाथं-अ, ऊ, ति; गोपतेरम्बिकानाथ-औ, छ, झ.
[8] दर्शनाद्भक्तवत्सलः] अ, छ, ति; ०भक्तवत्सलम्-ऊ, औ; ०भक्तवत्सला-झ.
[9] सर्वानुकूलसम्भोगवृषेन्द्रः] अ, ति; ०वृषभः-ऊ; सर्वानुकूलसन्तोष वृषो-छ; सर्वानुकूलसम्भोगा-प्रेषेन्द्रांशादि-औ.
[10] शयितो] अ, छ, ति; शयनो-ऊ; ... धितो-झ; ... -औ.
[11] भवेत्] अ, ऊ, ति; अभवम्-छ; भव-झ; ... -औ.
[12] दत्वा] औ, छ, ति; कृत्वा-अ, ऊ, झ.
[13] वृषेन्द्रं] अ, ऊ, छ, ति; वृषेन्द्र-झ; प्रेषेन्द्रं-औ.
[14] शयितं त्विति] अ; शयितस्त्विति-छ; शयितत्वति-ऊ, झ, ति; तथा त्विति-औ.
[15] मूर्धादिगलपर्यन्तं] अ, ऊ, छ, ति; मूध्रादिगलपर्यन्तं-झ; मूर्ध्रादिगलपर्यन्तं-औ.
[16] गलाद्युरःस्थलान्तं] अ, ऊ, ति; गलाद्युरःस्थलान्-छ; मङ्गलाद्युरस्धलान्तं-झ; गलादूरुस्थलान्तं च-औ.
[17] तु] ऊ; च-अ, औ, छ, झ, ति.
[18] तत्त्वतत्त्वेश्वरान्] ऊ, ति; तत्रतत्रेणश्वरान्-अ; तत्सेतमष्टेरवण-छ; तत्त्वतत्त्वेश्व ... -झ; तत्त्वतत्त्वे-श्वराभ्यां वा-औ.
[19] गन्धपुष्पादिभिर्यजेत्] अ, औ, छ, ति; गन्धपुष्पादिना यजेत्-ऊ; ... पुष्पादिभिर्यजेत्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]अग्न्यायतनमापाद्य स्थण्डिलं [२]त्वब्जपूर्वके।
[३]नवकुम्भं समादाय स्थण्डिले पूर्ववद्बुधः॥ १२४॥
पूरयेद्गन्धतोयेन [४]वस्त्रकूर्चपिधानयुक्।
पूजयेद्गन्धपुष्पाद्यैः [५]पटं [६]कुम्भं [७]यथाक्रमम्॥ १२५॥
[८]प्रासादेन तु मन्त्रेण [९]होमयेत्तदनन्तरम्।
शतमर्धं तदर्धं वा दश पञ्चैकमाहुतिम्॥ १२६॥
द्रव्यं प्रति विशेषेण [१०]हुत्वान्ते स्पर्शयेत् [११]पटम्।
कुम्भे चलासनं दत्त्वा संग्राह्य देशिकोत्तमः॥ १२७॥
होमसङ्ख्या जपं कुर्यात् प्रोक्षयेत् तत्क्रमेण तु।
पूर्ववत् स्थापयेत् कुम्भमर्चयेत् [१२]स्थिरमासनम्॥ १२८॥
[१३]ध्वजकुम्भान् समाराध्य [१४]गन्धपुष्पादिभिर्बुधः।
[१५]ध्वजकुम्भाग्रतो विद्वान् वास्तुनाथं [१६]समर्चयेत्॥ १२९॥
स्थण्डिले विन्यसेत् कुम्भं [१७]सरत्नं वारिप्रपूरितम्।
पूजयित्वा विधानेन नैवेद्यान्तं विशेषतः॥ १३०॥

---

१ अग्न्यायतनमापाद्य] अ, ति; अन्यायतनमापाद्य-ऊ; अध्यायनारमा प्राख्या-छ; अग्न्यायतनमासाद्य-झ; अ ... तनमापाद्य-औ.
२ त्वब्जपूर्वके] अ, ऊ, औ, झ, ति; च प्रपूर्वके-छ.
३ नवकुम्भं] ऊ, छ; नवकुम्भान्-अ, औ, ति; नवकुम्भ-झ.
४ वस्त्रकूर्चपिधानयुक्] छ; वस्त्रकूर्चाभिधानयुक्-अ, ऊ; नवकूर्चाभिधानयुत्-झ; वस्त्रकूर्चविविहानयुक्-औ; वस्त्रकूर्चापिधानयुक्-ति.
५ पटं] अ, औ, छ, झ; घटं-ऊ; "पटं कुम्भं यथाक्रमम्" इत्यारभ्य "ग्रन्थिं पश्चिमभागे तु" पर्यन्तं 'ति' मातृकायां श्लोकाः न सन्ति।
६ कुम्भं] अ, ऊ, झ; पुष्पं-छ; कुर्यात्-औ.
७ यथाक्रमम्] अ, ऊ, औ, झ; यथाविधि-छ.
८ प्रासादेन] अ, औ, छ, झ; प्रसेदिरमन्त्रेण-ऊ.
९ होमयेत्तदनन्तरम्] अ, ऊ, औ, झ; गोमयेष्वदनन्तरम्-छ.
१० हुत्वान्ते] अ, ऊ, औ, झ; स चान्ते-छ.
११ पटम्] अ, औ, छ, झ; पटः-ऊ.
१२ स्थिरमासनम्] अ, ऊ, औ, झ; स्थिरमानसः-छ.
१३ ध्वजकुम्भान् समाराध्य] अ, ऊ, औ; ध्वजकुम्भाश्चस्ताराद्य-छ; ध्वजकुम्भाग्रिमारभ्य-झ.
१४ गन्धपुष्पादिभिर्बुधः] अ, झ; गन्धपुष्पादिना-ऊ; गन्धपुष्पादिभिर्यथा-छ; गन्धपुष्पादिभिर्युतम्-औ.
१५ ध्वजकुम्भाग्रतो] औ; ध्वजकुम्भाग्रके-अ, ऊ, छ, झ.
१६ समर्चयेत्] अ, औ, छ; प्रपूजयेत्-ऊ; ... येत्-झ.
१७ सरत्नं वारिपूरितम्] औ, छ, झ; रत्नवारिप्रपूरितम्-अ, ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

तुभ्यं नमोऽस्तु [१]तत् सर्वं वास्तुनाथ वरप्रभो।
एतद्बलिं समादाय [२]रक्षय [३]यागमन्दिरम्॥ १३१॥
इति विज्ञापयेद्विद्वान् [४]रात्रौ जागरणं कुरु।
विजयस्य [५]क्रमो ह्येवं [६]वृद्धिदं त्वधुना शृणु॥ १३२॥

[वृद्धिदक्रमः]

[७]स्थण्डिलं कारयेद्विद्वान् [८]अष्टद्रोणेन शालिना।
विधिना वृषमावाह्य स्थापयेत् [९]स्थण्डिलोपरि॥ १३३॥
वृषगायत्रिमन्त्रेण पूजयित्वा विधानतः।
[१०]वृषकुम्भादिलोकेशकुम्भान् सम्पूजयेत्ततः॥ १३४॥
[११]अग्न्याधानादिकं सर्वं पूर्वोक्तविधिना यजेत्।
[१२]तन्मण्टपस्य [१३]पुरतः [१४]क्षेत्रपालबलिं ददेत्॥ १३५॥
[१५]वृद्धिदं त्विति विख्यातं [१६]ध्वजस्यारोपणं शृणु।

[ध्वजदण्डलक्षणम्]

क्रमुकं चन्दनं वापि [१७]खदिरं नालिकेरकम्॥ १३६॥
[१८]त्वक्सारमन्तःसारं वा [१९]सङ्ग्राह्य देशिकोत्तमः।

---

१ तत् सर्वं] सं० पा०; तत् सर्वे-अ; ते सर्वे-ऊ; सर्वेभ्यः-छ, झ; तस्त्वे-औ.
२ रक्षय] सं० पा०; रक्षयेद्- अ, ऊ, औ, छ, झ.
३ यागमन्दिरम्] अ, औ, छ, झ; देवमन्दिरम्-ऊ.
४ रात्रौ जागरणं कुरु] अ, ऊ, औ, झ; मातृतौजारणं कुलम्-छ.
५ क्रमो ह्येवं] सं० पा०; क्रमं त्वेवं-अ, झ; क्रमं ह्येवं-ऊ; कबन्धे वा-छ; समन्त्वेव-औ.
६ वृद्धिदं त्वधुना] अ, औ, झ; वृद्धिदमधुना-ऊ; वृद्धिं दत्वाधुना-छ.
७ स्थण्डिलं] सं० पा०; मण्टपं-अ, ऊ, औ, छ, झ.
८ अष्टद्रोणेन शालिना] अ, ऊ, औ, झ; अष्टद्रोणैश्च शालिभिः-छ.
९ स्थण्डिलोपरि] अ, ऊ, छ, झ; तण्डुलोपरि-औ.
१० वृषकुम्भादिलोकेशकुम्भान् सम्पूजयेत्ततः] अ, ऊ, औ, छ; ०लोकेशकुम्भांशं पूजयेत्ततः-झ.
११ अग्न्याधानादिकं] अ, औ, छ, झ; अग्न्यायादिकं-ऊ.
१२ तन्मण्टपस्य] अ, ऊ, झ; न मण्टपस्य-छ; तद्विम्व-औ.
१३ पुरतः] ऊ; परितः-अ, छ, झ; परितः क्षेत्रं-औ.
१४ क्षेत्रपालबलिं] अ, औ; क्षेत्रपा[य] बलिं-ऊ; ... पालबलिं-झ.
१५ वृद्धिदं] अ, ऊ, औ, झ; प्रसिद्धं-छ.
१६ ध्वजस्यारोपणं] अ, ऊ, छ, झ; स्वस्यां वारोपणं-औ.
१७ खदिरं] अ, छ; जातिनं-ऊ; खादिरं-औ, झ.
१८ त्वक्सारमन्तःसारं] ऊ, छ; असारम् अन्तःसारं-अ; त्वक्सारमन्न ... -झ; त्वक्सारमतिसारं वा-औ.
१९ संग्राह्य] औ, छ, झ; ग्राह्यं-अ; संगृह्यात्-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]अन्यत् शूलोक्तवृक्षैर्वा [२]अवक्रं [३]निर्व्रणमृजुम्॥ १३७॥
[४]एकद्वित्रितलान्तं वा [५]वृषस्थलसमं तु वा।
गलान्तं [६]शिखरान्तं वा [७]महानासीसमं तु वा॥ १३८॥
स्थूप्यन्तं [८]गोपुरान्तं वा ध्वजदैर्घ्यं प्रकल्पयेत्।
[९]पूर्ववत् [१०]यष्टिकादीनि [११]मात्राङ्गुलेन कारयेत्॥ १३९॥
[१२]चतुस्त्रिंशच्च षड्विंशत् [१३]चत्वार्यङ्गुलनाहकम्।
षड्सप्तपञ्चतालेन [१४]ध्वजयष्टिर्विधीयते॥ १४०॥
[१५]तदायामं त्रिधा कृत्वा एकांशं चतुरश्रकम्।
[१६]शेषं दीर्घाकृतिं कुर्यात् [१७]नानालङ्कारसंयुतम्॥ १४१॥
[१८]सुषिरद्वयसंयुक्तम् [१९]अर्धछिद्रमथैककम्।
[२०]उपदण्डसमायुक्तं तस्याग्रे वलयं न्यसेत्॥ १४२॥
[२१]तन्मध्ये [२२]रज्जुसम्बद्धं द्विगुणं मूलमाश्रितम्।

---

१ अन्यत् शूलोक्तवृक्षैर्वा] छ, झ; अन्यत् श्मलोक्तवृक्षैर्वा-अ; अन्यशुलोक्तवृक्षैर्वा-ऊ; वकुलं चान्यवृक्षैर्वा-औ.
२ अवक्रं] अ, झ; अवृकं-ऊ; अवकं-छ; वक्राश्च-औ.
३ निर्व्रणमृजुम्] अ; निर्व्रणकमृजुः-ऊ; निर्वणं जजुम्-छ; निर्व्रण रिजु-झ; कृमिवर्जयेत्-औ.
४ एकद्वित्रितलान्तं] अ, औ, छ; एकद्वित्रितन्तं-ऊ; एकद्वित्रित ... -झ.
५ वृषस्थलसमं] अ, औ, छ; वृषभस्थनसमं-ऊ; ... स्धलसमं-झ.
६ शिखरान्तं] अ, औ, छ, झ; वा शिरान्तं वा-ऊ.
७ महानासीसमं] ऊ; महानासिसमं-अ, औ; महानासिसमन्तं वा-छ; ... नासिसमं-झ.
८ गोपुरान्तं वा ध्वजदैर्घ्यं प्रकल्पयेत्] अ, ऊ, छ, झ; वा गलान्तं गोपुरार्घ्यस्य दीर्घिकम्-औ.
९ पूर्ववत्] ऊ, औ, छ, झ; पूर्वादिं-अ.
१० यष्टिकादीनि] सं० पा०; शान्तिकादीनि-अ, ऊ, औ, छ, झ.
११ मात्राङ्गुलेन] अ, ऊ, औ, छ; शूलेन-झ.
१२ चतुस्त्रिंशच्च षड्विंशत्] अ, ऊ, झ; चतुर्विंशच्च षड्विंशत्-छ; चतुस्त्रिंशच्च चत्वारि-औ.
१३ चत्वार्यङ्गुलनाहकम्] अ; चद्वयाङ्गुलनाहकम्-ऊ; चत्वार्यं शूलनाहकम्-झ युगायाङ्गुलनाहकम्-औ.
१४ ध्वजयष्टिर्विधीयते] अ, ऊ, झ; ध्वजयन्तिर्विधीयते-छ; अध्वयष्टि विधीयते-औ.
१५ तदायामं त्रिधा] अ, ऊ, छ, झ; तदायामत्रयं-औ.
१६ शेषं दीर्घाकृतिं] औ; शेषं दैर्घ्याकृतिं-अ, ऊ; शेषं दर्वाकृतिं-छ; शेषद्रव्याकृतिं-झ.
१७ नानालङ्कारसंयुतम्] औ, छ; न नालङ्कारसंयुतम्-अ, ऊ; ... कारसंयुतम्-झ.
१८ सुषिरद्वयसंयुक्तम्] अ; सुभिरद्वय०-ऊ; द्वयं सुषिरसंयुक्तम्-औ, छ; द्वयसुषिरसंयुक्तं-झ.
१९ अर्धछिद्रमथैककम्] छ, झ; अर्धचन्द्रम्०-ऊ; अद्धच्छिद्रम्०-अ; ... घोग्य०-औ.
२० उपदण्डसमायुक्तं] ऊ, छ, झ; उपदण्डे समायुक्तं-अ; उपदण्डं समायुक्तं-औ.
२१ तन्मध्ये] अ, ऊ, औ, झ; तदर्धे-छ.
२२ रज्जुसम्वद्धं] अ; रज्जुसम्बन्धं-ऊ, औ, छ, झ.

In Public domain. Digitization Muthulakshmi Research Academy

[ध्वजदण्डस्थापनम्]

पीठगोपुरयोर्मध्ये वृषपीठाग्रकेऽपि वा ॥ १४३ ॥
स्थापयेद्विधिना विद्वान् [१]तन्मूले वेदिकां कुरु।
[२]प्रातःस्नानादिकं कृत्वा सकलीकरणं कुरु ॥ १४४ ॥
[३]ततः सम्पूज्य गन्धाद्यैः [४]पटं कुम्भं यथाक्रमम्।
पूर्णाहुतिं ततो हुत्वा सर्वमङ्गलसंयुतम् ॥ १४५ ॥
दण्डशुद्धिं पुरा कृत्वा पूजयेत्तु विधानतः।
[५]परिचारकमाहूय [६]सोष्णीषं सोत्तरीयकम् ॥ १४६ ॥
संग्राह्य विधिवत् कुम्भं ध्वजं वै [७]चास्त्रमूर्तिनम्।
देवेशेन समायुक्तं ग्रामप्रदक्षिणं कुरु ॥ १४७ ॥
सर्वातोद्यसमायुक्तं [८]ध्वजस्थानं [९]समाविशेत्।
पुण्याहं वाचयेत्तत्र वृषकुम्भेन [१०]तत्पटम् ॥ १४८ ॥
[११]स्थापयेद्विधिना विद्वान् [१२]पूजयेत् तत्क्रमेण तु।
[१३]रज्जुनाऽऽबध्य [१४]तत्पश्चाद् वृषगायत्रिमन्त्रतः ॥ १४९ ॥
[१५]दर्भमालासमायुक्तं [१६]क्षुद्रघण्टासमन्वितम्।
विज्ञाप्य देवदेवेशं प्रणम्याभ्यर्च्य देशिकः ॥ १५० ॥

---

[१] तन्मूले वेदिकां कुरु] अ, ऊ, झ; तन्मूलेन वेदिकाङ्गुलम्-छ; दण्डानां वैदिकां कुरु-औ.

[२] "प्रातःस्नानादिकं" इत्यारभ्य "सर्वमङ्गलसंयुतम्" पर्यन्तं सार्धैकश्लोकः 'अ' 'ऊ' मातृकयोः न दृश्यते। "आलिख्य मध्यमे पद्मम्" इत्यारभ्य "वृषे चलासनं यष्ट्वा कुम्भमध्ये समर्चयेत्" पर्यन्तं श्लोकाः 'औ' मातृकायां अत्र दृश्यन्ते।

[३] ततः] सं० पा०; तत्-औ, छ, झ.

[४] पटं] छ, झ; पटकं तु-औ.

[५] परिचारकम्] अ, ऊ, झ; चारकम्-छ; परिचारक-औ.

[६] सोष्णीषं सोत्तरीयकम्] ऊ, छ, झ; सोष्णीषः सोत्तरीयकः-अ; वोष्णीषं ... चोत्तरीयकम्-औ.

[७] चास्त्रमूर्तिनम्] अ, ऊ; चास्त्रमूर्तिनि-छ; श्वास्त्रमूर्तिनम्-झ; ध्व वै चास्त्रमूर्तिकम्-औ.

[८] ध्वजस्थानं] अ, औ, छ, झ; ध्वजस्नानं-ऊ.

[९] समाविशेत्] अ, औ, छ, झ; समाचरेत्-ऊ.

[१०] तत्पटम्] ऊ, औ, छ, झ; तद्वटम्-अ.

[११] स्थापयेद्विधिना] ऊ, औ; स्नापयेद्विधिना-अ, छ, झ.

[१२] पूजयेत् तत्क्रमेण तु] अ, ऊ, छ, झ; पूजयेत् तु यथाक्रमम्-औ.

[१३] रज्जुनाऽऽवध्य] अ; रज्जुना वन्धयेत्-ऊ, छ, झ; "वृषगायत्रिमन्त्रेण ध्वजानारोहयेत् क्रमात्" इतीदमर्धं 'औ' मातृकायामधिकतया विद्यते।

[१४] तत्पश्चाद्-अ; पश्चाद्-ऊ, छ; ... -झ.

[१५] दर्भमालासमायुक्तं] अ, ऊ, छ, झ; दर्भमालाम्वरं वद्धा-औ.

[१६] क्षुद्रघण्टासमन्वितम्] अ, ऊ, झ; क्षत्रखण्डासमन्वितम्-छ.

In Public domain. Digitization Muthulakshmi Research Academy

[ध्वजारोपणम्]

आरोपयेत् ततो मन्त्री बहुरूपमनुस्मरन्।
[१]पटस्य च [२]दर्भमाला च [३]ह्याचार्यो मूर्तिपैः सह॥ १५१॥
ग्रन्थिं पश्चिमभागे तु शीघ्रं [४]शिष्यावरोहणम्।
[५]दण्डे सव्यक्रमेणैव [६]कुशैर्मूलेन बन्धयेत्॥ १५२॥
[७]वृषविघ्नेशकुम्भैश्च वेद्यूर्ध्वे चाभिषेचयेत्।
गन्धपुष्पादिनाभ्यर्च्य मुद्गान्नं दापयेत् [८]ततः॥ १५३॥
पानीयाचमनं दत्त्वा [९]धूपदीपं प्रदर्शयेत्।
ताम्बूलं दापयेत्तत्र आशीर्वादं समब्रुवन्॥ १५४॥
[१०]स्तोत्रसङ्गीतनृत्ताद्यैः सन्तोष्य वृषभध्वजम्।
विजयं त्विति विख्यातं [११]वृद्धिदं च ततः शृणु॥ १५५॥

[वृद्धिदक्रमः]

रथे वा शिबिकायां वा समारोप्य वृषध्वजम्।
[१२]धामप्रदक्षिणं कृत्वा नीत्वा दण्डस्य सन्निधिम्॥ १५६॥
पुण्याहं वाचयेत्तत्र ध्वजमारोपयेत् [१३]ततः।
[१४]संस्नाप्य पञ्चगव्याद्यैराधाराख्यं प्रपूजयेत्॥ १५७॥
पुनः पुर्णाहुतिं दत्त्वा कुम्भान् संग्राह्य देशिकः।

---

[१] पटस्य] अ, ऊ, औ, झ; पटसङ्घा-छ; पादस्यास्य पूर्वोत्तरग्रन्थयोश्च सङ्गतिः न स्पष्टा।
[२] दर्भमाला] अ, औ, छ, झ; दर्भमालाः-ऊ.
[३] ह्याचार्यो] अ; आचार्यो-ऊ, छ, झ; आचार्यैः-औ.
[४] शिष्यावरोहणम्] ऊ; शिष्यावरोहकम्-अ, औ, छ, झ.
[५] दण्डे सव्यक्रमेणैव] अ, औ, छ, ति; दण्डसव्यक्रमेणैव-ऊ; दण्डे ... व्यक्रमेणैव-झ.
[६] कुशैर्मूलेन] अ, ऊ, छ, ति; कुम्भमूले तु-झ; कुशमूलेन-औ.
[७] वृषविघ्नेशकुम्भैश्च] छ, ति; वृषकुम्भेशकुम्भैश्च-अ, ऊ; वृ ... शकुम्भैश्च-झ; वृषविघ्नेशकुम्भे च-औ.
[८] ततः] अ, ऊ, च, झ, ति; क्रमात्-औ.
[९] धूपदीपं] ऊ, औ, छ, झ, ति; धूपं-अ.
[१०] स्तोत्रसङ्गीतनृत्ताद्यैः] अ, ऊ, औ, झ, ति; स्तोत्रसङ्गीतततोद्यैः-छ.
[११] वृद्धिदं च] अ, ऊ, औ, झ, ति; वृद्धितश्च-छ.
[१२] धामप्रदक्षिणं] अ, ऊ, छ, झ, ति; ग्रामप्रदक्षिणं-औ.
[१३] ततः] अ, ऊ, छ, झ, ति; तदा-औ.
[१४] संस्नाप्य] अ, औ, छ, झ, ति; संस्थाप्य-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]धामप्रदक्षिणं कृत्वा [2]स्नापयेद् वेदिकोपरि॥ १५८॥
नैवेद्यं दापयेद्विद्वान् [3]गुलदध्युपदंशकैः।
[4]अत्रानुक्तं तु यत्सर्वं [5]विजयस्योक्तमाचरेत्॥ १५९॥
वृद्धिदं त्विति विख्यातं भेरीताडनकं शृणु।

[भेरीताडने विजयक्रमः]

[6]तस्मिन्नेव दिने रात्रौ सायरक्षावसानके॥ १६०॥
देवाग्रे ध्वजमूले वा [7]देवताह्वानम् आचरेत्।

[शूलभेर्योर्विन्यासः]

स्थण्डिलद्वितयं कल्प्य [8]शूलमेकत्र विन्यसेत्॥ १६१॥
तस्याग्रे [9]दक्षिणे भेरीं विन्यसेद् [10]कोणसंयुतम्।
पुण्याहं वाचयेत् तत्र अस्त्रेशं पूजयेत् ततः॥ १६२॥

[देवताह्वानम्]

[11]मध्यपत्रे भवेद् [12]रुद्रो [13]ब्रह्मा [14]दक्षिणपत्रके।
वामे विष्णुः समाख्यातो [15]फलकायां तु पार्वती॥ १६३॥
[16]सेनानीः कुम्भदेशे तु [17]तदास्ये [18]विघ्ननायकः।

---

[1] धामप्रदक्षिणं] अ, ऊ, छ, झ; ग्रामप्रदक्षिणं-औ; धाम प्रदक्षिणीकृत्वा-ति.
[2] स्नापयेद्] अ, ऊ, औ, झ, ति; स्थापयेत्-छ.
[3] गुलदध्युपदंशकैः] अ, झ, ति; गुलदधिघृतादिकैः-ऊ; गुलमध्युपदंशकैः-छ.
[4] अत्रानुक्तं] अ, औ, झ, ति; अत्रान्योक्तं-ऊ; आज्ञानं तं-छ.
[5] विजयस्योक्तमाचरेत्] अ, औ, छ, झ, ति; विजयोक्तं समाचरेत्-ऊ.
[6] "तस्मिन्नेव दिने रात्रौ" इत्यारभ्य "देवताह्वानमाचरेत्" पर्यन्तमर्धद्वयं 'औ' मातृकायां न विद्यते।
[7] देवताह्वानम्] अ, ऊ, झ, ति; देवताबानम्-छ.
[8] शूलमेकत्र] अ, ऊ, छ, झ, ति; मूलमन्त्रेण-औ.
[9] दक्षिणे] अ, औ, छ, झ, ति; स्थण्डिले-ऊ.
[10] कोणसंयुतम्] सं० पा०; घोणसंयुतम्-औ, ति; घोषसंयुतम्-अ; ... णसंयुतम्-ऊ; घोरसंयुतम्-छ; केणसंयुतम्-झ.
[11] मध्यपत्रे] अ, औ, ति; मध्यपात्रे-ऊ, झ; मध्यभागे-छ.
[12] रुद्रो] ऊ; रुद्रं-अ, छ, ति; मृदं-झ; रुद्रा-औ.
[13] ब्रह्मा] अ, ऊ, छ, झ, ति; ब्राह्मी-औ.
[14] दक्षिणपत्रके] अ, औ, छ, ति; दक्षिणपात्रके-ऊ; दप ... के-झ.
[15] फलकायां] ऊ, छ, झ, ति; फलकां-अ; पलकायां-औ.
[16] सेनानीः] ऊ; सेनानी-औ, छ, ति; सेनानीं-अ; ... नानि-झ.
[17] तदास्ये] अ, ऊ, ति; तथास्ये-औ, छ; तथास्यै-झ.
[18] विघ्ननायकः] अ, औ; विघ्ननायकम्-ऊ, छ, झ, ति.

In Public domain. Digitization Muthulakshmi Research Academy

दण्डाग्रे [1]मदनो ज्ञेयो भास्करो दण्डमध्यमे॥ १६४॥
दण्डमूले तु चण्डेशो लक्ष्मीः पूर्वदलाग्रके।
मातरः सप्त [2]दक्षे तु [3]ज्येष्ठा पश्चिमदिग्दले॥ १६५॥
कात्यायनी [4]कुबेरे स्यात् शूलमूले [5]मता इमे।
[6]रुद्रार्कौ वसवोऽश्विन्यावष्टादशगणाश्च ये॥ १६६॥
[7]सम्पूज्याः गन्धपुष्पाद्यैस्ताण्डवान्तं यथाक्रमम्।

[भेरीपूजा]

ततः सम्पूजयेद्भेरीं [8]नववस्त्रेण वेष्टयेत्॥ १६७॥
तन्मध्ये दक्षिणे वामे [9]शम्भुं विष्णुं चतुर्मुखम्।
मातरः सप्त [10]कीलेषु चन्द्रार्कौ वलयाधिपौ॥ १६८॥
[11]चर्मसूत्रे भुजङ्गेन्द्रः [12]स्कन्दं कोणाधिदैवतम्।

[भेरीताडनम्]

सम्पूज्य गन्धपुष्पाद्यैः [13]तत्तन्मन्त्रेण देशिकः॥ १६९॥

---

[1] मदनो] औ, ऊ, छ, ति; दमनो-अ; मदने-झ.

[2] दक्षे] अ, ऊ, औ, छ, ति; देशे-झ.

[3] ज्येष्ठा] ऊ, औ, छ, झ, ति; ज्येष्ठां-अ.

[4] कुबेरे स्यात्] औ; कुबेरस्य-अ, ऊ, छ, झ, ति.

[5] मता इमे] सं० पा०; "मध्यपत्रे" इत्यारभ्य "वसवोऽश्विन्यावष्टादशगणाश्च ये" पर्यन्तश्लोकानां कामिकागमोत्तरभागस्थ-महोत्सवविधिपटलस्य श्लो० ९९ उ०-१०३ पू० भागैः सह बहु साम्यं दृश्यते। मताधिकम्-अ, ऊ, झ, ति; मतासिकम्-छ; नमताधिकम्-औ.

[6] रुद्रार्कौ वसवोऽश्विन्यावष्टादशगणाश्च ये] अ; रुद्रार्कवसवोश्विन्यावष्टादशगणाश्च योः-ऊ; रुद्रार्कौ वसवोऽश्विन्यां पर्वादश-गुणाश्च योः-छ; रुद्रार्कवसवेविन्यादष्टादशगणा ... -झ; रुद्रार्कवसवश्चान्या-वष्टादशगणाश्च ये-औ; रुद्रार्कौ वसवोऽश्विन्या-वष्टादशगणादयः-ति.

[7] सम्पूज्याः] औ; सम्पूज्य-अ, ऊ, छ, झ, ति.

[8] नववस्त्रेण] अ, ऊ, छ, झ, ति; नीलवस्त्रेण-औ.

[9] शम्भुं विष्णुं चतुर्मुखम्] अ, ऊ, ति; शम्भुविष्णुचतुर्मुखम्-छ; शम्भुर्विष्णुश्चतुर्मुखः-औ; शं ... श्चतुर्मुखम्-झ.

[10] कीलेषु] सं० पा०; कीले स्युः-ऊ; कीलाः स्युः-अ, छ, झ, ति; कला सूश-औ.

[11] चर्मसूत्रे भुजङ्गेन्द्रः] सं० पा०; चर्मसूत्रे भुजङ्गेन्द्रं-अ, ऊ; चर्वसूत्रभुजागेन्द्रं-छ, झ; चर्मसूत्रभुजङ्गेन्द्राः-औ; चर्मसूत्रं भुजङ्गेन्द्रं-ति.

[12] स्कन्दं कोणाधिदैवतम्] सं० पा०; स्कन्दं कोणाधिदेवतम्- झ; स्कन्दं घोणाधिदैवतम्-अ, ऊ, छ, ति; कुण्डं कोणाधिदैवतम्-औ; अस्मिन् विषये अजितागमः (प्रथमभागः), २७ तम पटले १२१ तमश्लोको द्रष्टव्यः।

[13] तत्तन्मन्त्रेण-छ, झ, ति; सिक्तमन्त्रे तु-अ; स्वस्तिमन्त्रेण-ऊ; तक्षमन्त्रेण-औ.

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वं [१]सन्ताडयेदेकं त्र्यम्बकेन [२]तु मन्त्रतः।
द्वितीयं ताडयेद्विद्वान् [३]इदं विष्णिवति मन्त्रतः॥ १७०॥
तृतीयं [४]ब्रह्मजज्ञानमन्त्रेण ताडयेत् [५]त्रिधा।
[६]ततोऽस्त्रराजमभ्यर्च्य तन्मूले चतुराननम्॥ १७१॥
आहूय [७]सकलान् देवान् अष्टादशगणेश्वरान्।
[८]तत्तत्स्वनाममन्त्रेण चार्चयेद्देशिकोत्तमः॥ १७२॥
ततो वाद्यकमाहूय भस्म दत्त्वा नियोजयेत्।
[९]तद्धृत्वा शिवमन्त्रेण [१०]देशिकानुज्ञया सह॥ १७३॥
कण्ठे भेरीं समारोप्य ताडयेत् [११]तु विचक्षणः।
[१२]वाद्यकस्ताडयेत् पश्चात् [१३]बलितालं विशेषतः॥ १७४॥

[बलिदानविधिः]

[१४]पश्चाच्छ्लोकेन सर्वेषां श्रावयेद् [१५]उत्सवान्तकम्।
[१६]अस्त्रेशमानयेत् पूर्वं [१७]सर्वातोद्यसमायुतम्॥ १७५॥
[१८]धामप्रदक्षिणं कुर्याद्देवस्याग्रे [१९]स्थितो बुधः।

---

१ सन्ताडयेदेकं] अ, छ, झ, ति; सन्ताडयेद् भेरीं-ऊ; शिन्तयेद्देशीं-औ.
२ तु] अ, ऊ, औ, छ, ति; एव-झ.
३ इदं विष्णिवति] ऊ, औ, ति; इदं विष्णुरिति-अ; विचारितं विष्णोरिति-छ; इन्दं विष्णोति-झ.
४ ब्रह्मजज्ञानमन्त्रेण] ऊ, औ, ति; ब्रह्मजज्ञानं मन्त्रेण-अ, छ, झ.
५ त्रिधा] ऊ, छ, ति; हृदा-अ; यथाविधि-औ; त्रिथा-झ.
६ ततोऽस्त्रराजमभ्यर्च्य] अ, ऊ, झ, ति; तत्स्त्वराजमभ्यर्च्य-छ; ततःस्त्रीराजमभ्यर्च्य-औ.
७ सकलान् देवान्] अ, ऊ, छ, झ, ति; सर्वदेवानाम्-औ.
८ तत्तत्स्वनाममन्त्रेण] अ, औ, छ, झ, ति; ०मन्त्रैः-ऊ.
९ तद्धृत्वा] औ, छ, झ, ति; तद्धृत्व-अ; तद्दत्वा-ऊ.
१० देशिकानुज्ञया] अ, ऊ, छ, झ, ति; देशिकोऽनुज्ञया-औ.
११ तु] अ, ऊ, छ, झ, ति; तं-औ.
१२ वाद्यकः] ऊ, औ, झ; वाद्यकान्-अ; वाद्यकं-छ, ति.
१३ बलितालं] ऊ, औ, झ, ति; बलिताडं-अ, छ.
१४ पश्चाच्छ्लोकेन] अ, औ, छ, झ, ति; पश्चात्स्तोकेन-ऊ.
१५ उत्सवान्तकम्] अ, औ, छ, झ, ति; उत्सवान्तिकम्-ऊ.
१६ अस्त्रेशमानयेत् पूर्वं] अ, छ, झ, ति; अस्त्रे समानयेत् पूर्वं-ऊ; अस्त्रेशमानयेत् सर्वा-औ.
१७ सर्वातोद्यसमायुतम्] अ, ऊ, औ, ति; सर्वातोद्यसमन्वितम्-छ; सर्वातोद्य समावृतम्-झ.
१८ धामप्रदक्षिणं] ऊ; धामप्रवेशनं-अ, छ, झ, ति; ग्रामप्रवेशनं-औ.
१९ स्थितो] अ, औ, छ, झ, ति; ततो-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

देवस्य देवताह्वानं [१]सन्निवेद्य स [२]चोत्सवम्॥ १७६॥
बलिबेरसमायुक्तं [३]सर्वातोद्यसमन्वितम्।
वृषादिपरिवाराणां बलिं दद्यात् स्वनामतः॥ १७७॥
इन्द्रादीशानपर्यन्तं नित्यवत् सर्वमाचरेत्।
[४]ब्रह्मस्थानादिकं वाऽथ इन्द्रस्थानादिकं तु वा॥ १७८॥
सन्धिदेवान् [५]समावाह्य [६]बलिमेवं समाचरेत्।
एवमावाह्य देवांश्च प्रविशेदालयं प्रति॥ १७९॥
विजयस्य [७]क्रमः प्रोक्तः [८]वृद्धिदस्य ततः शृणु।

[भेरीताडने वृद्धिदक्रमः]

अस्त्रं भेरीं च सम्पूज्य [९]पूर्वोक्तविधिना सह॥ १८०॥
[१०]चच्चपुटेन तालेन [११]वादयेत् [१२]सर्वतालवित्।
शिवादिसर्वदेवांश्च [१३]आहूयाभ्यर्चयेत् क्रमात्॥ १८१॥
अस्त्रराजं समादाय सर्वातोद्यसमन्वितम्।
देवालये [१४]प्रयुञ्जानो [१५]बलिदानं समाचरेत्॥ १८२॥
[१६]स्थानसङ्कटधामेषु [१७]प्राकारादिविशेषतः।

---

[१] सन्निवेद्य] ऊ, औ, छ, झ, ति; सन्निवेद्यं-अ.
[२] चोत्सवम्] अ, छ, झ, ति; चोत्सवः-ऊ; स चोरवम्-औ.
[३] सर्वातोद्यसमन्वितम्] अ, ऊ; सर्वातोयसमायुतम्-छ, झ, ति; सर्वातोद्यं समाचरेत्-औ.
[४] ब्रह्मस्थानादिकं वाथ] अ, ऊ, औ, ति; ब्रह्मस्नानाधिकं वाथ-छ; ब्रह्मस्थानाथदिकं वाथ-झ.
[५] समावाह्य] अ, ऊ, औ, झ, ति; समासाद्य-छ.
[६] बलिमेवं] अ, ऊ, औ, झ, ति; बलिदेवं-छ.
[७] क्रमः प्रोक्तः] औ; क्रमं प्रोक्तं-अ, ऊ, छ, ति; ... क्तं-झ.
[८] वृद्धिदस्य] ऊ; वृद्धिकं च-अ, औ, छ, झ, ति.
[९] पूर्वोक्तविधिना] अ, ऊ, औ, झ, ति; पूर्वान्तविधिना-छ.
[१०] चच्चपुटेन] सं० पा०; चर्चपुटेन-छ; चञ्चपुटेन-अ, ऊ; शाचपुटेन-औ; चचुपुटेन-झ; चञ्चुपुटेन-ति.
[११] वादयेत्] अ, ऊ, झ, ति; ताडयेत्-छ; पातयेत्-औ.
[१२] सर्वतालवित्] अ, ऊ, औ, झ, ति; सर्वतो भुवि-छ.
[१३] आहूयाभ्यर्चयेत्] ऊ, छ, झ; आहूयाभ्यर्च्यते-अ, औ, ति.
[१४] प्रयुञ्जानो] अ, ति; प्रियुन्तानो-ऊ; प्रयुञ्जीत-छ; प्रपूज्याथ-औ; प्रयुञ्जाना-झ.
[१५] बलिदानं] अ, ऊ, झ, ति; चलिमानं-छ; बलियानं-औ.
[१६] स्थानसङ्कटधामेषु] ऊ, झ, ति; ०याम्येषु- अ; स्नानसङ्कटधामेषु-छ; "स्थानसङ्कटयाम्येषु" इत्यारभ्य "बलिं तत्र प्रकल्पयेत्" पर्यन्तं श्लोकः 'औ' मातृकायां न विद्यते।
[१७] प्राकारादिविशेषतः] छ, झ, ति; प्रकारादिविशेषतः-अ, ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

लभ्यते यत्र देशे तु बलिं तत्र प्रकल्पयेत्॥ १८३॥
पादप्रक्षालनं कृत्वा प्रविशेदालयं प्रति।
देवेशं पूजयेत्तत्र [१]नित्यपूजावसानकम्॥ १८४॥
भेरीताडनम् [२]एवोक्तम् अस्त्रयागविधिं श्रृणु।

[अस्त्रयागः]

रवेरस्तमयात् [३]पूर्वं निर्दिष्टदिवसे [४]तथा॥ १८५॥
वास्तुहोमं पुरा कृत्वा पर्यग्निकरणं कुरु।
ततोऽङ्कुरार्पणं कुर्यादुत्सवार्थं यथाक्रमम्॥ १८६॥

[कौतुकबन्धनम्]

कौतुकं बन्धयेद्धीमान् [५]महेशाग्रे विशेषतः।
शालिभिः स्थण्डिलं कृत्वा पुण्याहं वाचयेत्ततः॥ १८७॥
[६]स्थलिकां तण्डुलैः पूर्य [७]दर्भपुष्पैः समन्वितम्।
[८]क्रमुकफलसंयुक्तं [९]नागवल्लीसमन्वितम्॥ १८८॥
[१०]भस्माधारं न्यसेन्मध्ये कौतुकं विन्यसेत्ततः।
सौवर्णं राजतं वापि [११]क्षौमं कार्पासकं तु वा॥ १८९॥
[१२]नवाम्बरसमायुक्तं [१३]गन्धमाल्यसमायुतम्।

---

१ नित्यपूजावसानकम्] ऊ; नित्यपूजावसानतः-अ, औ, झ, ति; नित्यपूजाङ्गना ततः-छ.
२ एवोक्तम्] अ, ऊ, छ, झ, ति; इत्युक्तम्-औ.
३ पूर्वं] ति; पूर्वे-अ, ऊ, छ, झ, औ.
४ तथा] औ; ततः-अ, ऊ, छ, झ, ति.
५ महेशाग्रे] ऊ, औ, छ, झ, ति; विशेषाग्रे-अ.
६ स्थलिकां तण्डुलैः पूर्य] अ, ति; स्थलिकं स्थण्डिले पूर्वे-ऊ; स्थालिकां तण्डुलैः पूर्वे-छ; स्थलिका तण्डुलैः पूर्वा-औ; स्थलिका तण्डुले पूर्य-झ.
७ दर्भपुष्पैः समन्वितम्] ऊ, झ; दर्भैः पुष्पसमन्वितम्-अ, ति; दर्भैः पुष्पैः समन्विताः-औ.
८ क्रमुकफलसंयुक्तं] छ; क्रमुकं फलसंयुक्तं-अ, ऊ, झ, ति; क्रमुकफ ... -औ.
९ नागवल्लीसमन्वितम्] अ; नागवल्लीदलैर्युतम्-ऊ, छ, झ, ति; नागवल्लीसमन्वितं ... कौतुकं विन्य-सेत्ततः सौवर्णं राजतं" पर्यन्तं 'औ' मातृकायां न विद्यते।
१० भस्माधारं न्यसेन्मध्ये] ऊ, ति; ... अ; भस्माधारसुसेन्मध्ये-छ; भस्मधारान् न्यसेन्मध्ये-झ.
११ क्षौमं कार्पासकं तु वा] अ, ति; क्षौमं कार्पासतन्तुना-ऊ; क्षौमं कार्पासिकं तु वा-छ; क्षौमकार्पासकं तु वा-औ; क्षौमकार्पासिकं तु वा-झ.
१२ नवाम्बरसमायुक्तं] अ, ऊ, छ, झ, ति; नवाम्बरसमायुक्तः-औ.
१३ गन्धमाल्यसमायुतम्] अ, छ, झ, ति; गन्धमाल्यसमायुतः-औ; गन्धमाल्यैः समायुतम्-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

स्थण्डिलोर्ध्वे तु विन्यस्य रक्षासूत्रमनुं जपेत्॥ १९०॥
पश्चात् संस्नाप्य यागेशं गन्धतोयेन देशिकः।
अभ्यर्च्य गन्धपुष्पाद्यैर्धूपदीपादिकं ददेत्॥ १९१॥
[1]युवं वस्त्रेति मन्त्रेण [2]वस्त्रेणाच्छादयेत् प्रभुम्।
[3]त्र्यम्बकेन तु मन्त्रेण [4]सूत्रं संसिच्य भस्मना॥ १९२॥
तण्डुलं [5]धारयेद्धस्ते ओं नमो ब्रह्मणेत्यपि।
देवस्य दक्षिणे हस्ते [6]देव्या वामकरे बुधः॥ १९३॥
[7]बृहत्सामेति मन्त्रेण [8]कौतुकं बन्धयेत्ततः।
[9]यो [10]ब्रह्मा इति मन्त्रेण [11]भसितं दापयेत् ततः॥ १९४॥
[12]दूर्वाक्षतैश्च विप्राणामाशिषो [13]वचनं [14]ब्रुवन्।
शूलस्य [15]मध्यपत्रे तु बल्यर्थं [16]कौतुकक्रिया॥ १९५॥
[17]उत्सवार्थं च देवानां कौतुकं बन्धयेत् ततः।

[यागमण्डपनिर्माणम्]

हर्म्यस्य पूर्वदिग्भागे [18]ऐशान्ये चोत्तरेऽपि वा॥ १९६॥

---

[1] युवं वस्त्रेति] अ, छ, झ, ति; युग्मवस्त्रेति-ऊ; पुष्पं व ... ति-औ.
[2] वस्त्रेणाच्छादयेत् प्रभुम्] झ; वस्त्रेणाच्छादयेत् प्रभोः-अ, ऊ, छ, ति; आश्छाद्येत् सुधीः-औ.
[3] त्र्यम्बकेन तु] औ; त्रियम्बकेन-अ, ऊ, छ, ति; त्रयम्बकेन-झ.
[4] सूत्रं संसिच्य] औ, झ; सूत्रं संसिच्य-अ, ऊ, ति; सूत्रे संसिच्य-छ.
[5] धारयेद्धस्ते ओं नमो] ऊ, ति; दापयेद्धस्ते ओं नमो-छ; धारयेद्ध ... -अ; दापयेत् पश्चाद्धस्त ओं नमो-झ "दापयेद्धीमान् रक्षासूत्रं विधीयते। नागवल्लीदलैः पूर्य नालिकेरफलं तथा। ओं नमो ब्रह्मण इत्यतेनुवाकम्" इति 'औ' मातृकायामधिकतया दृश्यते।
[6] देव्या वामकरे] अ, औ, छ, झ, ति; देवीवामकरे-ऊ.
[7] बृहत्सामेति] अ, औ, छ, झ, ति; ब्रह्मासोति-ऊ.
[8] कौतुकं बन्धयेत्ततः] ऊ; कौतुकं बन्धयेद्व हृदा-अ, औ, झ, ति; माशिषो वाचमब्रुवन्-छ.
[9] यो ब्रह्मा इति मन्त्रेण भसितं दापयेत् ततः। दूर्वाक्षतेन मन्त्राणामाशिषो वाचमब्रुवन्। इत्ययं श्लोकः 'छ' मातृकायां न विद्यते।
[10] ब्रह्मा इति मन्त्रेण] ऊ; ब्रह्मादिमन्त्रेण-अ; ब्रह्मा त्विति मन्त्रेण-औ; ब्रह्मादितिमन्त्रेण-झ, ति.
[11] भसितं दापयेत् ततः] अ, ऊ, झ; सीतं दूरे न दापयेत्-औ; भसितं दापयेत् तदा-ति.
[12] दूर्वाक्षतैश्च विप्राणां] ति; दूर्वाक्षतेन मन्त्राणाम्-अ; दूर्वाक्षतमन्त्रेण-ऊ; दूर्वाक्षतेन विप्राणाम्-औ, झ.
[13] वचनं] सं० पा०; वाचम्-अ, ऊ, छ.
[14] ब्रुवन्] सं० पा०; अब्रुवन्-अ, ऊ, औ, ति; अब्रवीत्-झ.
[15] मध्यपत्रे] ऊ, औ, छ, झ, ति; मध्यपात्रे-अ.
[16] कौतुकक्रिया] अ; कौतुकं क्रियात्-ऊ, ति; कौतुकं विना-औ, छ, झ.
[17] उत्सवार्थं च] ऊ; उत्सवोद्दिश्य-अ, औ, छ, झ, ति.
[18] ऐशान्ये] अ, औ, छ, झ, ति; ईशाने-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वोक्तलक्षणोपेतं कारयेद्यागमण्डपम्।
[१]गोमयालेपनं कृत्वा [२]पिष्टसिक्तेन तन्तुना॥ १९७॥
प्रागग्रं दश [३]सूत्रं तु उदगग्रं तथैव च।
यागशालां प्रविश्याथ सकलीकरणं कुरु॥ १९८॥
पुण्याहं वाचयेत् तत्र प्रोक्षयेद्यागमण्डपम्।
सौरादिगुरुपर्यन्तं [४]मण्डपे संप्रपूजयेत्॥ १९९॥
वेद्यूर्ध्वे स्थण्डिलं कृत्वा [५]चाष्टद्रोणैश्च शालिभिः।
तण्डुलैस्तिललाजैश्च दर्भैः पुष्पैः परिस्तरेत्॥ २००॥

[कुम्भविन्यासक्रमः]

नवकुम्भान् समादाय तन्तुना परिवेष्टयेत्।
क्षालयेदस्त्रमन्त्रेण पूरयेच्छुद्धवारिणा॥ २०१॥
सकूर्चान् पल्लवोपेतान् नालिकेरफलान्वितान्।
[६]सरत्नान् [७]वस्त्रसंयुक्तान् स्थापयेद् [८]वेदिकोपरि॥ २०२॥
[९]मध्यमे शिवकुम्भं तु तस्य वामे मनोन्मनीम्।
[१०]पूर्वादिष्वष्टकुम्भेषु विद्येशान् सम्प्रपूजयेत्॥ २०३॥
[११]दशायुधानि परितः पूजयेत् [१२]कुम्भवर्जितम्।
[१३]तद्बाह्ये पूजयेद्विद्वान् [१४]अभितश्चाष्टमङ्गलम्॥ २०४॥
तत्तत्स्वनाममन्त्रेण गन्धपुष्पैः समर्चयेत्।

---

[१] "गोमयालेपनं कृत्वा" इत्यारभ्य "प्रोक्षयेद्यागमण्डपम्" पर्यन्तं 'झ' मातृकायां न विद्यते।
[२] पिष्टसिक्तेन] अ, औ, ति; पिष्टसक्तेन-ऊ; पिष्टासिक्तेन-छ.
[३] सूत्रं] अ, ऊ, औ, ति; सूक्ष्मं-छ.
[४] मण्डपे] सं० पा०; मण्डपम्-अ, ऊ, औ, छ, झ, ति.
[५] चाष्टद्रोणैश्च शालिभिः] अ, औ, छ, ति; अष्टद्रोणेन शालिना-ऊ; अष्टद्रोणैश्च शालिभिः-झ.
[६] सरत्नान्] ऊ, औ, छ, झ, ति; सवस्त्रान्-अ.
[७] वस्त्रसंयुक्तान्] अ, ऊ, झ, ति; वस्त्रसंशुद्धान्-छ; वस्त्रसंयुक्तं-औ.
[८] वेदिकोपरि] अ, औ, छ, झ, ति; देशिकोपरि-ऊ.
[९] मध्यमे] ऊ, औ, छ, झ, ति; मध्ये- अ.
[१०] पूर्वादिष्वष्टकुम्भेषु] अ, ऊ, औ; पूर्वादीन्यष्टकुम्भेषु-छ, झ, ति.
[११] अस्मिन् स्थाने "लोकेशान् पूजयेत् कृत्वा दशायुधानानि पूजयेत्" इतीदमर्धं 'औ' मातृकायां विद्यते।
[१२] कुम्भवर्जितम्] अ, ऊ, औ, झ; कुम्भवर्जितः-छ, ति.
[१३] "कुम्भपूजिततद्बाह्ये पूजयेदष्टमङ्गलम्" इतीदमर्धम् अस्मिन् स्थाने 'औ' मातृकायां दृश्यते।
[१४] अभितश्चाष्टमङ्गलम्] अ, ऊ, ति; अभितथार्हमङ्गलम्-छ, झ.

In Public domain. Digitization Muthulakshmi Research Academy

[अस्त्रहोमः]

विधिना [१]कुण्डसंस्कारं कृत्वाग्निं [२]सम्प्रकल्पयेत्॥ २०५॥
[३]समिदाज्यचरून् लाजान् माषशालिं यवं तिलम्।
[४]सद्यादिशिखापर्यन्तं प्रत्येकं होममाचरेत्॥ २०६॥
शतमर्धं तदर्धं वा नव पञ्चैकमेव वा।
द्रव्यान्ते व्याहृतिं हुत्वा [५]पूर्णाहुतिमथाचरेत्॥ २०७॥
नैवेद्यं दापयेत् [६]पश्चाद्धूपदीपादिकं ददेत्।
[७]अस्त्रयागमिदं प्रोक्तं [८]बलिदानक्रमं शृणु॥ २०८॥

[बलिदानक्रमः]

होमान्ते तु बलिं [९]दद्यात् सायं प्रातः क्रमेण तु।
द्रोणं वापि तदर्धं वा बल्यर्थं तण्डुलं पचेत्॥ २०९॥
कटाहं [१०]स्थलिकां [११]वापि क्षालयेत् पुरुषेण तु।

[अन्नलिङ्गकल्पनम्]

तत्पात्रे निक्षिपेदन्नं बलिद्रव्यसमायुतम्॥ २१०॥
[१२]पाचयेदन्नलिङ्गार्थं तण्डुलं [१३]पात्रसङ्ख्यकम्।
[१४]स्थलिकाभ्यन्तरे [१५]क्षिप्त्वा [१६]फलं दधिसमायुतम्॥ २११॥
द्वादशाङ्गुलमुत्सेधं तन्नाहं द्विगुणं भवेत्।

---

१ कुण्डसंस्कारं कृत्वाग्निं] अ, झ, ति; कुण्डसंस्कारं कृत्वा चाग्निं-ऊ; कुण्डसंस्कारं कृत्वार्थं-छ; कुण्डलं कृत्वाग्नीनां-औ.
२ सम्प्रकल्पयेत्] अ, औ, छ, झ; प्रकल्पयेत्-ऊ; संप्रपूजयेत्-ति.
३ समिदाज्यचरून् लाजान् माषशालिं] अ; समिदाज्यचरुं लाजं माषशालि-ऊ, औ, छ; समिधाज्यचरू लाजामाषशालि-झ; समिदाज्यचरुं लाजान् माषशालि यवान् तिलान्-ति.
४ सद्यादिशिखापर्यन्तं] ति; सद्यादिशिवपर्यन्तं-अ, ऊ; सद्यादिशिखपर्यन्तं-औ, छ, झ.
५ पूर्णाहुतिमथाचरेत्] अ, औ, छ, झ, ति; ०समाचरेत्-ऊ.
६ पश्चात्०] ऊ; तस्मात्०-अ, औ, छ, ति; तस्मिन्०-झ.
७ अस्त्रयागमिदं प्रोक्तं] अ, छ, झ; अस्त्रयागमिति प्रोक्तं-ऊ; अस्त्रयागो ह्ययं प्रोक्तः-औ.
८ बलिदानक्रमं] अ, औ, छ, झ, ति; बलियागक्रमं-ऊ.
९ दद्यात्] अ, औ, छ, झ, ति; दत्वा-ऊ.
१० स्थलिकां] औ, छ, ति; स्थालिकां-अ, ऊ; स्घलिकां-झ.
११ वापि] अ, औ, छ, झ; चैव-ऊ.
१२ पाचयेदन्नलिङ्गार्थं] ऊ, औ (मातृकयोरेव शोधितः पाठः); ०अन्नलिङ्गस्थं-अ, छ, झ, ति.
१३ पात्रसङ्ख्यकम्] अ, औ, छ, झ, ति; पात्रसोदकम्-ऊ.
१४ स्थलिकाभ्यन्तरे] ति; स्थालिकाभ्यन्तरे-अ, ऊ, छ; स्थालिकामन्तरे-औ; स्घलिकाभ्यन्तरे-झ.
१५ क्षिप्त्वा] अ, औ, छ, झ, ति; स्थित्वा-ऊ.
१६ फलं दधिसमायुतम्] ऊ; फलोदधिसमायुतम्-अ, छ, झ, ति; फलोदधिसमायुतः-औ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]अग्रमग्न्यङ्गुलं [2]प्रोक्तमामूलाग्रं क्रमात् [3]कृशम्॥ २१२॥
[4]लिङ्गं कृत्वा तु तच्छेषम् अन्नम् [5]अप्सु विनिक्षिपेत्।
तल्लिङ्गस्य तु मध्ये तु रौद्रं पाशुपतं यजेत्॥ २१३॥
ततोऽलङ्कृतमाहूय [6]वस्त्रपुष्पस्त्रगादिकम्।
[7]गृहीत्वा तु विशेषेण [8]ततो गर्भगृहं [9]गतः॥ २१४॥
देवदेवाय विज्ञाप्य बलिदानं समन्त्रकम्।
कुर्यात् पञ्चमहाशब्दं बलितालसमन्वितम्॥ २१५॥

[प्रासादस्य प्राकारे वलिप्रदक्षिणम्]

अस्त्रेशमन्त्रलिङ्गं च बलिबेरसमन्वितम्।
छत्रचामरसंयुक्तं [10]घण्टारवसमन्वितम्॥ २१६॥
सर्ववाद्यसमायुक्तं गणिकादिभिरावृतम्।
बलिदीपसमायुक्तं बलिपात्रसमन्वितम्॥ २१७॥
[11]स्वस्तिसूक्तसमायुक्तं [12]बलिं दत्त्वा विचक्षणः।
[13]नन्दिकालौ [14]वृषं चैव [15]भानुमुण्डिनि मातरः॥ २१८॥
[16]वीरभद्रं गणेशं च [17]विघ्नेशं चाच्युतं गुहम्।

---

[1] अग्रमग्न्यङ्गुलं] अ, ऊ, झ, ति; अग्रमध्यङ्गुलं-छ; अग्रं द्व्यङ्गुलं-औ.
[2] प्रोक्तमामूलाग्रं] अ, छ, ति; ०मध्यमूलं-ऊ; ०मूलाग्रं तु-औ; ०मूलादग्रं-झ.
[3] कृशम्] ऊ, छ, झ, ति; कुशम्-अ, औ.
[4] लिङ्गं कृत्वा तु तच्छेषमन्नम्] अ, ऊ, औ, ति; लिङ्गं कृत्वा कृतार्थेष अन्नम्-छ; लिङ्गत्वा तु समाश्लेषमन्नम्-झ.
[5] अप्सु] अ, ऊ, छ, ति; भुवि-औ; मधु-झ.
[6] वस्त्रपुष्पस्त्रगादिकम्] अ, औ, झ, ति; वस्त्रपुष्पस्त्रगादिषु-ऊ; वस्त्रपुष्पाद्यदादिकम्-छ.
[7] गृहीत्वा तु] औ; ग्राहयित्वा-अ, ऊ, छ, झ, ति.
[8] ततो] अ, ऊ, औ, ति; ज्ञातो-छ, झ.
[9] गतः] सं० पा०; ततः-अ, ऊ, छ, झ, ति; तथा-औ.
[10] घण्टारवसमन्वितम्] अ, औ, झ, ति; बुदारुसमन्वितम्-ऊ; घण्टानादसमन्वितम्-छ.
[11] स्वस्तिसूक्तसमायुक्तं] अ, औ, छ, झ, ति; स्वस्तिसूत्रसमायुक्तं-ऊ.
[12] वलिं दत्वा विचक्षणः] औ, झ, ति; ... क्षणः-अ; बन्दत्वा च विचक्षणः-ऊ; बलिं दत्वा प्रियार्थकम्-छ.
[13] "नन्दिकालौ वृषश्चैव भानुमुण्डिनि मातरः" इत्यारभ्य "नागं देशगिरिर्युक्तमीशदेशे प्रियार्थकम्" इति पर्यन्तं श्लोकाः 'छ' मातृकायां न विद्यन्ते।
[14] वृषं चैव] ऊ, औ; वृषश्चैव-अ, झ, ति.
[15] भानुमुण्डिनि] अ, औ, झ, ति; भानुकुण्मिनि-ऊ.
[16] वीरभद्रं गणेशं च] सं० पा०; वीरभद्रो गणेशश्च-अ, ऊ, औ, झ, ति.
[17] विघ्नेशं चाच्युतं गुहम्] औ, झ, ति; विघ्नेशश्चाच्यतो गुहः-अ; विघ्नेशश्चाच्यतं गुहम्-ऊ.

In Public domain. Digitization Muthulakshmi Research Academy

[1]दुर्गां चण्डेश्वरं चैव प्रथमावरणे यजेत्॥ २१९॥
[2]द्वितीयावरणे चैव [3]दण्डिभृङ्गिवृषध्वजान्।
महापीठं वृषं शूलं त्रिःकृत्वा तु प्रदक्षिणम्॥ २२०॥
महापीठाग्रके [4]देवराजाय बलिमाचरेत्।
[5]अग्निर्यमो निर्ऋतिश्च अपांपतिश्च [6]मारुतः॥ २२१॥
यक्षेशं क्षेत्रपालं च [7]ईशानं चैव पूजयेत्।

[नगरे बलिदानभ्रमणम्]

[8]द्वितीयावरणं त्वेवं प्रविश्य नगरादिकम्॥ २२२॥
[9]प्रासादनिर्गमद्वारदेशे द्वारबलिं ददेत्।
[10]प्रविश्य चोत्तरे भागे कुर्यात् [11]कुम्भोदरं बलिम्॥ २२३॥
तस्य दक्षिणभागे तु बलिं दत्त्वा [12]महोदरम्।
तयोर्मध्ये [13]महानेतद्बलिं दत्त्वा विशेषतः॥ २२४॥
ब्रह्मस्थानादितो वापि [14]इन्द्रस्थानादि वा क्रमात्।
[15]इष्टकां वा [16]मृदं वापि [17]कारयेद्बलिपीठकम्॥ २२५॥

---

[1] दुर्गां चण्डेश्वरं चैव] ऊ, औ, झ, ति; दुर्गा चण्डेश्वरश्चैव-अ.
[2] "द्वितीयावरणे चैव ... महापीठाग्रके देवरा" पर्यन्तं 'औ' मातृकायां न विद्यते। परं तत्स्थाने "द्वितीयाजानां" इत्येव दृश्यते।
[3] दण्डिभृङ्गिवृषध्वजान्] सं० पा०; दण्डीभृङ्गीवृषध्वजः-ऊ; दण्डिभृङ्गिवृषध्वजः-अ; दण्डिभृङ्गिवृषध्वजम्-झ, ति.
[4] देवराजाय] सं० पा०; देवराजानां-अ, झ; देवराजानं-ऊ; पुनः देवे राजानं-ति.
[5] अग्निर्यमो निर्ऋतिश्च] ऊ; अग्निवैवस्वतो दिग्ब-अ; अग्निर्वैवस्वतो स्त्रत्वं-औ; अग्निर्वैवस्वतो सृकः-झ; अग्निर्वैवस्वतो सृक्प-ति.
[6] मारुतः] अ, ऊ, झ, ति; मारुतम्-औ.
[7] ईशानं चैव पूजयेत्] अ; ईशे विष्णुं विरिञ्चकम्-ऊ; ईशे विष्णुविरिञ्चकम्-औ; ईशो विष्णुविरिञ्चकम्-झ; ईशं विष्णुं विरिञ्चकम्-ति.
[8] द्वितीयावरणं त्वेवं] झ; द्वितीयावरणं चैव-अ, ऊ, ति; द्वितीयावरणं त्वेवेचं-औ.
[9] प्रासादनिर्गमद्वारदेशे द्वारबलिं] औ, झ; प्रासादान्निर्गमद्वारदेशाच्चारबलिं-अ; प्रासादान्तहर्म्यद्वारदेशे द्वारबलिं-ऊ; प्रासादान्निर्गमद्वारदेशेच्चारबलिं-ति.
[10] प्रविश्य चोत्तरे भागे] ऊ; प्रवेशस्योत्तरे भागे-अ, झ, ति; प्रवेशान्तं रम्भके-औ.
[11] कुम्भोदरं बलिम्] ऊ, झ, ति; कुम्भोदरं बलिः-अ; कुम्भोदरबलिं ददेत्-औ.
[12] महोदरम्] अ, औ, झ, ति; विशेषतः-ऊ.
[13] महानेतद्बलिं] औ (मातृकायां शोधितः पाठः); महायेति बलिं-अ; महायेत०-ऊ, ति; महाबेत०-झ.
[14] इन्द्रस्थानादि वा] ऊ; इन्द्रस्थानादितः-अ, झ, ति; इन्द्रस्थानादिकं क्रमात्-औ.
[15] इष्टकां-औ, झ; इष्टं-अ; इन्दिका-ऊ; इष्टिका-ति.
[16] मृदं] अ, झ, ति; मृतं-ऊ, औ.
[17] कारयेद्बलिपीठकम्] अ, औ, झ, ति; ०बलिपीठके-ऊ. ति; दुर्गा चण्डेश्वरश्चैव- अ.

In Public domain. Digitization Muthulakshmi Research Academy

गोमयालेपनं कृत्वा प्रोक्षयेत् पञ्चगव्यकैः।
[१]ज्वालाजिह्वज्वलत्केशी [२]महाक्रोशो महाबलः॥ २२६॥
[३]मर्त्यान्यश्च चण्डवेगो वास्तुपालो बलिप्रियः।
महाभूताश्च [४]विज्ञेया [५]ब्रह्मस्थानादितः क्रमात्॥ २२७॥
[६]पूर्वं त्यक्त्वाथ देवाश्च इन्द्रस्थानादितो [७]बलिः।
एवं भूतबलिं दत्त्वा ग्रामशान्तिकरं भवेत्॥ २२८॥
पीठाग्रे गोपुराग्रे वा [८]ऐशान्यां पीठवामतः।

[बलिदानसामान्यविधिः]

[९]दिनमेवं बलिं दद्याद्दिनं प्रति बलिद्वयम्॥ २२९॥
[१०]सर्वदेवानां तृप्त्यर्थमीशेऽस्त्राय बलिं ददेत्।

[बलिदानादिषोडशोपचाराः]

[११]षोडशैरुपचारैश्च बलिं [१२]दद्याद्विचक्षणः॥ २३०॥
पाद्यमाचमनं चार्घ्यं गन्धपुष्पं च धूपकम्।
दीपं बलिप्रदानं च [१३]बलिमुद्रां [१४]प्रदर्शयेत्॥ २३१॥
[१५]अर्घ्यदाननमस्कारस्तोत्रं वै भेरिघोषणम्।
नृत्तगीतं च वाद्यं च ब्रह्मतालसमन्वितम्॥ २३२॥

---

१ ज्वालाजिह्वज्वलत्केशी] अ; ज्वालाजिह्वज्वलत्केशं-ऊ, औ, झ; ज्वालाजिह्वाज्वलत्केश-ति.
२ महाक्रोशो महाबलः] अ, ति; महात्योश महाबलः-ऊ; महाकोशो महाबलिः-औ.
३ मर्त्यान्यश्च चण्डवेगो] ऊ; मर्त्योनश्चण्डवेगो वा-झ, ति; मर्त्यानश्चण्डवेगोश्च-अ; भक्तानश्चण्डवेगो वा-औ.
४ विज्ञेया] अ, झ, ति; विज्ञाय-ऊ; विज्ञेयं-औ.
५ ब्रह्मस्थानादितः] अ, ऊ, झ, ति; ब्रह्मस्थानादिकं-औ.
६ पूर्वं त्यक्त्वाथ] झ, ति; पर्वं न्यात्त्वाथ-अ; पूर्वं त्यक्त्वार्थ-ऊ; पूर्वां त्यक्त्वाथ-औ.
७ बलिः] ऊ; बलिम्-अ, औ, झ, ति.
८ ऐशान्यां] ऊ; ऐशान्ये-अ, औ, झ, ति.
९ दिनमेवं] ऊ, झ, ति; दिनमेव-अ, औ.
१० सर्वदेवानां] सं० पा०; सर्वदेवाश्च-अ, ऊ, औ, छ, झ, ति.
११ षोडशैरुपचारैश्च] सं० पा०; षडशेरुपचारेण-अ; षोडशोपचारैश्च-ऊ; षोडशैवोपचारेण-औ, झ, ति.
१२ दद्यात्] ऊ; दत्त्वा-अ, औ, झ, ति.
१३ बलिमुद्रां] औ, झ, ति; बलिरुद्रां-अ; बलिं मुद्रां-ऊ.
१४ प्रदर्शयेत्] झ; प्रयार्थकम्-अ; प्रियार्थकम्-ऊ, औ, ति.
१५ अर्घ्यदाननमस्कारस्तोत्रं वै भेरिघोषणम्। नृत्तगीतं च वाद्यं च ब्रह्मतालसमन्वितम्। इत्ययं श्लोकः 'झ' मातृकायामेव दृश्यते।

In Public domain. Digitization Muthulakshmi Research Academy

[बलिदानसमये गेयाः स्वराः]

[1]गानं मलहरीयुक्तं प्रत्यालीढं च मट्टयम्।
प्रवालिगिरिनागं च ब्रह्मदेशे प्रियार्थकम्॥ २३३॥
[2]गान्धारस्वरसंयुक्तं पुष्पाञ्जलिस्तु [3]जम्भटा।
[4]वराटिस्त्विन्द्रदेशे तु देवताप्रीतिकारणम्॥ २३४॥
[5]कोल्लीस्वरसमायुक्तं [6]प्रत्यालीढं च मट्टयम्।
[7]पूर्वाळी गिरिनागं च [8]अग्निदेशे प्रियार्थकम्॥ २३५॥
[9]नट्टभाषा भुजङ्गं च तालं चच्चपुटं तथा।
वासन्तगानसंयुक्तं याम्ये देशे प्रियार्थकम्॥ २३६॥
[10]कौशिकं [11]मङ्गलावर्तम् [12]एकतालसमन्वितम्।
[13]गानं देशागिरियुक्तम् [14]नैर्ऋते तु प्रियार्थकम्॥ २३७॥
[15]श्रीकामरं स्वसायन्तं तालं [16]चच्चपुटं तथा।
गानं [17]सोमगिरिर्युक्तं वारुण्यां दिशि [18]चाचरेत्॥ २३८॥

---

[1] गानं मलहरीयुक्तं प्रत्यालीढं च मट्टयम्। प्रवालिगिरिनागं च ब्रह्मदेशे प्रियार्थकम्। इत्ययं श्लोकः 'झ' मातृकायामेव दृश्यते।
[2] गान्धारस्वरसंयुक्तं] अ, ऊ, झ, ति; गन्धाक्षरसंयुक्तं-औ.
[3] जम्भटा] औ, झ, ति; जम्भटाः-अ; सम्पुटा-ऊ.
[4] वराटिस्त्विन्द्रदेशे] झ; वारादिस्विन्द्रदेशे-अ; वाराटीस्त्विन्यदेशे-ऊ; ननादिसिन्धुदेशे-औ; वरास्विन्द्रदेशे-ति.
[5] कोल्लीस्वरसमायुक्तं] अ, औ, ति; कोल्वीश्वरसमायुक्तं-ऊ; ठकाल्लिस्वरसमायुक्तं-झ.
[6] प्रत्यालीढं] झ; प्रत्यालीसं-अ, औ; प्रत्यालीथं-ऊ; प्रत्यासं-ति.
[7] पूर्वाळी गिरिनागं] अ, ति; भूपालभूगिनिगानं-ऊ; पूर्वालि गिगागानं-औ; प्रवालि गिरिगानं-झ.
[8] अग्निदेशे प्रियार्थकम्] अ, ऊ, औ, ति; लच्चचजं पुटं तथा-झ.
[9] नट्टभाषा भुजङ्गं च तालं चच्चपुटं तथा। वासन्तगानसंयुक्तं याम्ये देशे प्रियार्थकम् इत्ययं श्लोकः 'ऊ' मातृकायामेव वर्तते।
[10] "कौशिकं मङ्गलावर्तम्" इत्यारभ्य "तालं चच्छप्रियं तथा" पर्यन्तं 'झ' मातृकायां न विद्यते।
[11] मङ्गलावर्तम्-अ, ऊ, ति; मङ्गलापर्ता-औ.
[12] एकतालसमन्वितम्] औ, ति; एकस्वरसमन्वितम्-अ; मेघतालसमन्वितम्-ऊ.
[13] गानं देशागिरियुक्तं] औ, ति; नागं देशागिरिर्युक्तम्-अ; गानदेशेऽग्निरीयुक्तम्-ऊ.
[14] नैर्ऋते तु] ऊ; ईशदेशे-अ; नैर्ऋदेशे-औ; यातुदेशे-ति.
[15] श्रीकामरं स्वसायन्तं] सं० पा०; श्रीकान्तं स्वसायन्तं-अ, ति; श्रीकामनं च नामर्थं-ऊ; श्रीकुमारं स्वसायन्तं-छ; श्रिकामनं स्वसायान्तं-औ.
[16] चचपुटं] औ; चच्छप्रियं-अ; चचपुटं-ऊ; सचपुटं-छ; चञ्चुपुटं-ति.
[17] सोमगिरिर्युक्तं] अ, औ, छ, झ, ति; सोमगिनीयुक्तं-ऊ.
[18] चाचरेत्] ऊ, औ; आचरेत्-अ, छ, ति; ... चरेत्-झ.

In Public domain. Digitization Muthulakshmi Research Academy

[१]तक्केशि [२]भुजगालीढं [३]बलितालसमन्वितम्।
[४]गानं मालवसंयुक्तं [५]वायुदेशे प्रियार्थकम्॥ २३९॥
[६]पञ्चमोद्घटितं चैव [७]कुम्भतालसमन्वितम्।
शुद्धगौडसमायुक्तं सौम्यदेशे प्रियार्थकम्॥ २४०॥
[८]ऐशान्यां चैन्दलं प्रोक्तं कुञ्चितं [९]वर्मतालकम्।
[१०]छायागौडसमायुक्तम् [११]ईशदेशे प्रियार्थकम्॥ २४१॥
एवं प्रदक्षिणं कृत्वा प्रविशेदालयं प्रति।

[बलिदानान्ते कार्याणि]

पादप्रक्षालनं कृत्वा महापीठे बलिं क्षिपेत्॥ २४२॥
[१२]धामप्रदक्षिणं कृत्वा प्रविशेद्देवमण्डपम्।
[१३]नीराजनं ततः कृत्वा बलिबेरस्य देशिकः॥ २४३॥
अन्नलिङ्गं जले क्षिप्त्वा [१४]चास्त्रेशं यागमण्डपे।
[१५]पुष्पाञ्जलित्रयं [१६]दत्त्वा मूलबेरस्य सन्निधौ॥ २४४॥
[१७]पूर्वोक्तेन विधानेन सन्ध्याशेषं समापयेत्।

---

१ तक्केशि] अ, औ, झ, ति; तक्केशी-ऊ; तद्वैरिभं-छ.
२ भुजगालीढं] अ, ऊ; प्रभालीढं-छ; भुजङ्गलालीढं-औ; भुजताल ... म्-झ; भुजङ्गालीढं-ति.
३ बलितालसमन्वितम्] ऊ, औ, झ, ति; दद्यशत् बलिसमन्वितम्-अ; दद्यशत् बलिताम्बु समन्वितम्-छ.
४ गानं माळवसंयुक्तं] ऊ, झ, ति; दानवं माळसंयुक्तं-अ; गानं माम् इव संयुक्तं-छ; गानं मालवनं युक्तं-औ.
५ वायुदेशे प्रियार्थकम्] ऊ, औ, छ, झ, ति; वायुदेशप्रियार्थकम्-अ.
६ पञ्चचोद्घटितं] ऊ; पञ्चमोघद्रुतं-अ; पञ्चमो घट्टितं-छ; पञ्चमोद्घट्टितं-औ; पञ्चमोदघटिं-झ; पञ्चमोघट्टितं-ति.
७ कुम्भतालसमन्वितम्] अ, ऊ, औ, झ, ति; कुम्भताम्बूलसमन्वितम्-छ.
८ ऐशान्यां चैन्दलं] ऊ; ऐशान्ये चैदलं-अ, छ; ऐशान्ये चैन्दलं-झ, ति; "ऐशान्ये चैदलं प्रोक्तम्" इत्यारभ्य "ईशदेशे प्रियार्थकम्" पर्यन्तं 'औ' मातृकायां न विद्यते।
९ वर्मतालकम्] ऊ; वामतालकम्-अ; वर्त्मनांशुकम्-छ; पम्मतालकम्-झ; वम्मतालकम्-ति.
१० छायागौडसमायुक्तं] छ, ति; छायागौढसमायुक्तम्-अ; फयाषौडसमायुक्तम्-ऊ; गासागौढ-समायुक्तम्-झ.
११ ईशदेशे] अ, ऊ, झ, ति; धीशदेशे-छ.
१२ धामप्रदक्षिणं कृत्वा] ऊ; धामप्रदक्षिणवशात्-अ, औ, झ, ति; यामप्रदक्षिणवशात्-छ.
१३ नीराजनं] ऊ, औ, छ, झ, ति; नीराञ्जनं-अ.
१४ चास्त्रेशं] अ, औ, छ, ति; चास्त्रेणैव-ऊ; अस्त्रेशं-झ.
१५ इदमर्धं 'छ' 'झ' मातृकयोः न विद्यते।
१६ दत्त्वा] अ, औ, ति; कृत्वा-ऊ.
१७ पूर्वोक्तेन विधानेन] ऊ; पूर्वोक्तविधिनानेन-अ, औ, छ, झ, ति.

In Public domain. Digitization Muthulakshmi Research Academy

[यात्रादिसामान्यक्रमः]

ततः [१]सन्ध्यावसाने तु [२]सकलेशमलङ्कृतम्॥ २४५॥
[३]रथे वा शिबिकायां वा [४]खेटे वाऽऽरोपयेत् ततः।

[नगरालङ्कारः]

[५]वीथीसम्मार्जनं कृत्वा [६]जलेनैव तु सेचयेत्॥ २४६॥
कदलीक्रमुकैश्चैव [७]सफलैः पूर्णकुम्भकैः।
चित्रवस्त्रं च गन्धं च [८]कुन्दकं [९]हिमतोयकम्॥ २४७॥
दर्पणं [१०]केशशोधं च कृष्णगन्धं च साञ्जनम्।
उशीरं [११]गिरिबेरं च कल्हारं जातिचम्पकम्॥ २४८॥
नालिकेरसमायुक्तं ताम्बूलं क्रमुकं तथा।
शतपुष्पं च दीपं च गृहद्वारं प्रति प्रति॥ २४९॥

[यात्राक्रमः]

[१२]नानादीपसमायुक्तं [१३]नानाभक्तजनैर्युतम्।
नानाच्छत्रसमायुक्तं [१४]नानाध्वजसमन्वितम्॥ २५०॥
नानावाद्यसमायुक्तं नानास्त्रीपरिसेवितम्।
चामरं [१५]तालवृन्तं च [१६]दासीभिश्च प्रदापयेत्॥ २५१॥
महाशैवास्तदन्ते तु तदन्ते भूसुरास्तथा।

---

१ सन्ध्यावसाने] अ, औ, ति; सन्ध्यावाहने-ऊ; सन्ध्यवसाने-छ, झ.
२ सकलेशमलङ्कृतम्] अ, औ, ति; सकले समलङ्करु-ऊ; सकलेबरमलङ्कृतम्-छ; सकलेशमलङ्कृतः-झ.
३ रथे] अ, ऊ, औ, ति; रङ्गे-छ, झ.
४ खेटे वारोपयेत्] ऊ; खेटकारोपयेत्-अ, औ, छ, झ, त.
५ वीथीसम्मार्जनं] ऊ, झ, ति; विधिसम्मार्जनं-अ, औ, छ.
६ जलेनैव तु सेचयेत्] अ, औ, छ, झ, ति; सफलैः पूर्णकुम्भकैः-ऊ.
७ सफलैः पूर्णकुम्भकैः] अ, ऊ, छ, झ, ति; पनसैः फलपूर्णकुम्भकैः-औ.
८ कुन्दकम्] सं० पा०; कन्तुकं-अ, छ, झ, ति; कुन्तुकं-ऊ; कौतुकं-औ.
९ हिमतोयकम्] अ, ऊ, औ, झ, ति; हिमतोयदम्-छ.
१० केशशोधं] अ, ऊ, झ, ति; कोशशोधं-औ, छ.
